CC-0. In Public Domain. Digitization by eGangotri

कृष्णा दिग्दर्शिका

श्रीसम्पूर्णानन्द संस्कृत विश्वविद्यालय वाराणसी के
नवीनतम पाठ्यक्रमानुसार

शास्त्री द्वितीय खण्ड

अनिवार्य विषय : संस्कृत

[प्रथम प्रश्न-पत्र]

सांख्यकारिका :

वेदान्तसार :

लघु एवं अति लघु प्रश्नोत्तर सहित

लेखक :

श्रीराम प्रवेश शुक्ल

एम. ए. बी. एड. व्यकरणाचार्य
साहित्याचार्य

प्रकाशक :

कृष्णा प्रकाशन मन्दिर, वृन्दावन

मूल्य ३०) रुपये

द्वितीय संस्करण

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सम्पूर्णानन्द संस्कृत विश्वविद्यालय वाराणसी की
परीक्षाओं में निश्चित सफलता के लिए
'कृष्णा दिग्दर्शिका'
का अध्ययन करें।

'कृष्णा दिग्दर्शिका' ही क्यों

क्योंकि !

सम्बन्धित विषयों के

योग्य एवं अनुभवी

अध्यापकों द्वारा लिखित सम्पूर्ण पाठ्यक्रम
पर आधारित, बाजार में चल रही सभी गाइडों आदि से
अधिक परीक्षोपयोगी सामग्री तथा सम्पूर्ण विषय एक में अर्थात्
गागर में सागर एक मात्र

"कृष्णा दिग्दर्शिका" ही है

प्रमुख वितरक :
हिम्मतसिंह, मोहनसिंह
पुस्तक विक्रेता
गोपीनाथ बाजार, वृन्दावन—२८११२१

आवरण पृष्ठ—श्रीवेङ्कटेश प्रेस, वृन्दावन।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कृष्णा दिग्दर्शिका

श्रीसम्पूर्णानन्द संस्कृत विश्वविद्यालय वाराणसी के
नवीनतम पाठ्यक्रमानुसार

शास्त्री द्वितीय खण्ड

अनिवार्य विषय : संस्कृत

[प्रथम प्रश्न-पत्र]

सांख्यकारिका :
वेदान्तसार :
लघु एवं अति लघु प्रश्नोत्तर सहित

लेखक :

श्रीराम प्रवेश शुक्ल

एम. ए. बी. एड. व्यकरणाचार्य
साहित्याचार्य

प्रकाशक :

कृष्णा प्रकाशन मन्दिर, वृन्दावन

द्वितीय संस्करण

मूल्य ३०) रुपये

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सांख्यकारिकायाः

लघूत्तरीयाणि अतिलघूत्तरीयाणि च प्रश्नोत्तराणि

प्रश्नः १—सांख्यशास्त्रस्य कः प्रवर्तकः ?

उत्तरम्—सांख्यशास्त्रस्य प्रवर्तकः महर्षिः भगवान् कपिलमुनिः।

प्रश्नः २—सर्वप्रथमं कपिलमुनिः सांख्यज्ञानं कस्मै प्रददौ ?

उत्तरम्—आसुरीति शिष्याय सर्वप्रथमं सांख्यज्ञानं महर्षि प्रददौ।

प्रश्नः ३—इदं सांख्यज्ञानं आसुरिः कस्मै प्रददौ ?

उत्तरमं—आसुरिः स्वशिष्याय पञ्चशिखाय सांख्यज्ञानं प्रददौ।

प्रश्नः ४—पञ्चशिखाचार्यः कस्मै सांख्यज्ञानं प्रददौ ?

उत्तरम्—स्वशिष्येभ्यः पञ्चशिखाचार्यः सांख्यज्ञानं प्रायच्छत्।

प्रश्नः ५—सांख्यकारिका ग्रन्थस्य कः प्रणेताकर्ता वा ?

उत्तरम्—सांख्यकारिकायाः कर्ता आचार्य ईश्वरकृष्णोऽस्ति।

प्रश्नः ६—आचार्य ईश्वरकृष्णः कुतः सांख्यज्ञानं प्राप्तवान् ?

उत्तरं—आचार्य ईश्वरकृष्णः सांख्यदर्शनं पञ्चशिखाचार्यस्य शिष्य-प्रशिष्य-परम्परागतां सांख्यज्ञानं प्राप्तवान्।

प्रश्नः७—सांख्यकारिकायां कति कारिकाः (श्लोकाः) सन्ति ?

उत्तरम्—अत्र ग्रन्थे द्वासप्ततिः (७२) कारिकाः सन्ति।

प्रश्नः८—सांख्यकारिकायां कस्य वृत्तस्य (छन्दसः) प्रयोगः विद्यते ?

उत्तरम्—सांख्यकारिकायां आर्याछन्दसः प्रयोगः विद्यते।

प्रश्नः ९—सांख्यशब्दस्य कोऽर्थः ?

उत्तरम्—एकत्वादिव्यवहारहेतुः संख्येति प्रथमोऽर्थः। द्वितीयश्च—विवेकज्ञान-रूपं भेदज्ञानम्।

प्रश्नः १०—सांख्यदर्शनस्य नामकरणे को हेतुः ?

उत्तरम्—पञ्चविंशतितत्त्वानां परिसंख्यायाः परिगणनमेव कारणम्।

प्रश्नः ११—सांख्यदर्शने कतिविधं दुःखम् ?

उत्तरं—त्रिविधं दुःखं—१. आध्यात्मिकं, २. आधिभौतिकं, ३. आधि-दैविकश्चेति।

प्रश्नः १२—दुःखत्रयस्य विनाशं कथं भवति ?

उत्तरम्—दुःखत्रयस्य विनाशं व्यक्ताव्यक्तपुरुषविज्ञानाद् भवति।

प्रश्नः १३—पञ्चविंशतितत्त्वानां केषु चतुर्विधपदार्थेषु अन्तर्भावो भवति ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

उत्तरम्—पञ्चविंशतितत्त्वानां व्यक्तं-अव्यक्तं-व्यक्ताव्यक्तमुभयं-पुरुषेषु च पदार्थेषु अन्तर्भावो भवति ।

प्रश्नः १४—प्रकृतेः किं लक्षणं वैशिष्ट्यञ्च किं ?

उत्तरं—अजन्यत्वे सति जनकत्वं प्रकृतिः । तस्याश्च—अव्यक्त-अहेतुकं-नित्यं-व्यापकं-निष्क्रियं-एकं-अनाश्रितं-अलिङ्गं-निरवयवं-स्वतन्त्रञ्चेति प्रकृति-वैशिष्ट्यम् ।

प्रश्नः १५—विकृतेः स्वरूपमुल्लिख्य तत्प्रकारान् च प्रदर्शयताम् ?

उत्तरम्—जन्यत्वे सति तत्त्वान्तरानारम्भकत्वम् विकृतिः पञ्चज्ञानेन्द्रियाणि+पञ्चकर्मेन्द्रियाणि+पञ्चमहाभूतान्ति+मनस्=एतेषोडशपदार्थाः सन्ति ।

प्रश्नः १६—के उभयात्मकाः पदार्थाः ? प्रकृतिविकृतिः वा ?

उत्तरम्—जन्यत्वे सति जनकत्वमुभयात्मकपदार्थाः ते च पञ्चतन्मात्राणि+महत्+अहङ्कारश्चेति-प्रकृतिविकृतिरूभयस्वभावाः सन्ति ।

प्रश्नः १७—पुरुषोस्ति कथं ज्ञायते ?

उत्तरम्—संघातपरार्थत्वात् त्रिगुणादिविपर्ययात्, अधिष्ठानात्, भोक्तृभावात्, कैवल्यार्थं प्रवृत्तेश्चेति पुरुषोऽस्ति ।

प्रश्नः १८—पुरुषस्य बहुत्वं कथं ज्ञायते ?

उत्तरम्—जनममरणकरणानां प्रतिनियमात्, अयुगपत्प्रवृत्तेः, त्रैगुण्यविपर्ययाच्च पुरुषस्य (आत्मनः) बहुत्वं ज्ञायते ।

प्रश्नः १९—सांख्यदर्शने केन विधिना प्रमेयसिद्धिः भवति ?

उत्तरम्—सांख्यदर्शने त्रिविधप्रमाणेन प्रमेयसिद्धिः भवति ।

प्रश्नः २०—प्रमाणं कतिविधं कानि च तानि ?

उत्तरं—प्रमाणं त्रिविधं—१. दृष्टं (प्रत्यक्षं), २. अनुमानं, आप्त-वाक्यं शब्दप्रमाणम् ।

प्रश्नः २१—दृष्टस्य किं लक्षणम् ?

उत्तरम्—प्रतिविषयाध्यवसायो दृष्टम् ।

प्रश्नः २२—सांख्यदर्शने अनुमानस्य किं लक्षणम् ?

उत्तरम्—लिङ्गलिङ्गिपूर्वकमनुमानम् ।

प्रश्नः २३—सांख्यसम्मते अनुमानं कतिविधं ? कानि च तानि ?

उत्तरम्—अनुमानम् त्रिविधं—१. पूर्ववत्, २. शेषवत्, ३. सामान्यतोदृष्टञ्चेति ।

प्रश्नः २४—शब्दप्रमाणस्य सांख्यमते किं स्वरूपम् ?

उत्तरम्—श्रुतिराप्तवचनम् शब्द प्रमाणम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रश्नः २५—केन प्रमाणेन प्रकृतिपुरुषादि-अतीन्द्रियतत्त्वानां ज्ञानं भवति ?

उत्तरम्—सामान्यतोदृष्टानुमानेन अतीन्द्रियपदार्थानां ज्ञानं भवति।

प्रश्नः २६—केन प्रमाणेन स्वर्गादि विषयाणां ज्ञानं भवति ?

उत्तरम्—शब्दप्रमाणेन स्वर्गादिविषयाणां ज्ञानं भवति।

प्रश्नः २७—प्रत्यक्षप्रमाणे कथं व्यवधानं आयाति ?

उत्तरम्—१. अतिदूरात्, २. अतिसामीप्यात्, ३. इन्द्रियघातात्, ४. मनोऽनवस्थानात्, ५. सौक्ष्म्यात्, ६. व्यवधानात्, ७. अभिभवात्, ८. समानाधिहाराच्च प्रत्यक्षं न भवति।

प्रश्नः २८—प्रकृतिपुरुषादितत्त्वानां कथं प्रत्यक्षं भवति ?

उत्तरम्—सौक्ष्म्यात् केवलं महदादिकार्येण प्रकृतिपुरुषादिनां ज्ञानं भवति।

प्रश्नः २९—सत्कार्यवादस्य कोऽर्थः ?

उत्तरम्—कार्यं स्वकारणे पूर्वमेव विद्यमानं भवति।

प्रश्नः ३०—सत्कार्यवादस्य कथं सिद्धिः भवति ?

उत्तरम्—सत्कार्यवादस्य पञ्चविधं सिद्धिः भवति। यथा—१. असदकरणात्, २. उपादानग्रहणात्, ३. सर्वसम्भवाभावात्, ४. शक्तस्य शक्यकरणात्, ५. कारणाभावाच्च।

प्रश्नः ३१—पुरुषस्य वैशिष्ट्यं किमस्ति ?

उत्तरम्—अगुणः विवेकी, अविषयः, असामान्यम् चेतनः, अप्रसवधर्मी च पुरुषः उदासीनो भवति।

प्रश्नः ३२—के च त्रयो गुणाः सन्ति ?

उत्तरम्—सत्त्व-रजस्-तमांसि—एते त्रयोगुणाः सन्ति।

प्रश्नः ३३—सत्त्वगुणस्य किं स्वरूपम् ?

उत्तरम्—सत्त्वं लघुः, प्रकाशकः, सुखात्मको च भवति।

प्रश्नः ३४—रजोगुणस्य किं लक्षणम् ?

उत्तरम्—उपष्टम्भकं, चलं अप्रीतिजंनकञ्च रजोगुणो भवति।

प्रश्नः ३५—तमोगुणस्य किं लक्षणम् ?

उत्तरम्—तमोगुणस्य लक्षणम्—गुरुः, वरणकं विषादात्मकं च स्वभावमस्ति।

प्रश्नः ३६—विरुद्धस्वभावाः त्रयोगुणाः कथं प्रयोजनं सम्पादयन्ति ?

उत्तरम्—वर्तितैलवह्निसंयोगयुक्त दीपक इव प्रयोजनं समादयन्ति।

प्रश्नः ३७—प्रकृतिपुरुषयोः कीदृशः सम्बन्धः भवति ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

उत्तरम्---प्रकृतिपुरुषयोः पङ्गु-अन्धवत् सम्बन्धो भवति ।

प्रश्नः ३८—सृष्टिक्रमः सांख्यदर्शने कथं भवति ?

उत्तरम्—प्रकृतिपुरुषयोः संयोगात्—प्रकृतेः+महत् (बुद्धिः)+अहङ्कारः+षोडशगणाः+पञ्चतन्मात्रेभ्यः—पञ्चमहाभूतानि ।

प्रश्नः ३९—महत्त्वस्य (बुद्धेः) किं लक्षणम् ?

उत्तरम्—प्रतिविषयादध्यसायो बुद्धिः ।

प्रश्नः ४०.—मनः कीदृशं भवति ?

उत्तरम्—संकल्पविषयात्मको मनः ज्ञानेन्द्रियं कर्मेन्द्रियं च उभयात्मकं भवति ।

प्रश्नः ४१—साख्यदर्शने प्रत्यक्षस्य किं अपरनाम ?

उत्तरम्—दृष्टमिति अपरनाम प्रत्यक्षप्रमाणस्येति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वेदान्तसारस्य

लघूत्तरीयाणि अतिलघुत्तरीयाणि च प्रश्नोत्तराणि

प्रश्नः १—वेदान्तदर्शनस्य प्रेरणाप्रदं वाक्यं कस्य कुत्र लभते ?

उत्तरम्—महर्षिः प्रजापतिः परमेष्ठी: ऋग्वेदे सर्वप्रथमं 'आनीदवातं स्वधया तदेकं' इत्युक्त्वा वेदान्तदर्शनस्य उद्गमं चकार।

प्रश्नः २—वेदान्त शब्दस्य कोऽर्थः ?

उत्तरम्—ऋग्वेदस्य अन्तः-उपनिषदानि शास्त्राणि वेदान्तोच्यते।

प्रश्नः ३—वेदान्त पदेन किं गृह्यते ?

उत्तरम्—'वेदान्तो नामोपनिषद्प्रमाणं तदुपकारीणि शारीरिकसूत्रादीनि च'।

प्रश्नः ४—वेदान्त दर्शनस्य अपरनाम किमस्ति ?

उत्तरम्—वादरायणव्यासप्रणीतशारीरकसूत्राधारं कृत्वा उत्तरमीमांसादर्शनं वेदान्तदर्शनं वा नाम्नाऽभिधीयते।

प्रश्नः ५—वेदान्तदर्शने (उत्तरमीमांसायां) कतिविधानि मतानि ?

उत्तरम्—अद्वैत-द्वैत-विशिष्टाद्वैत-द्वैताद्वैत-शुद्धाद्वैत-अचिन्त्यभेदाभेद विधिना वेदान्तदर्शनस्य दशाधिकानि मतानि सन्ति।

प्रश्नः ६—वेदान्तदर्शनस्य प्रमुखाचार्याः के सन्ति ?

उत्तरम्—वादरायणव्यासः, शङ्कराचार्यः, सुरेश्वराचार्यः, पद्मपादाचार्यः, वाचस्पतिमिश्रः, सर्वज्ञात्ममुनिः, श्रीहर्षः, विमुक्तात्मा, विद्यारण्यः, सदानन्दः, अप्पयदीक्षितः, मधुसूदनसरस्वतीर्त्यादयः।

प्रश्नः ७—वेदान्तसारस्य प्रणेता कोऽस्ति ?

उत्तरम्—वेदान्तसारस्य प्रणेता आचार्यः सदानन्दः अस्ति।

प्रश्नः ८—आचार्यसदानन्दः कदा अभवत् ?

उत्तरम्—आचार्य सदानन्दः षोडशशताब्द्याः पूर्वार्द्धे (१५१०तमे वर्षे) निर्णीतो जातः।

प्रश्नः ९—सम्प्रति वेदान्तसारस्य कतिविधाः लभ्यन्ते ?

उत्तरम्—सम्प्रति वेदान्तसारस्य त्रिंशत् टीकाः लभन्ते।

प्रश्नः १०—वेदान्तसारस्य सुबोधिनीटीका केन प्रणीता ?

उत्तरम्—वेदान्तसारस्य सुबोधिनीटीका आचार्यनृसिंहयोगिना १५८८ शततमे वर्षे लिखितास्ति।

प्रश्नः ११—स्वामिरामतीर्थकृता टीका का नामधेया ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

उत्तरम्—स्वामिरामतीर्थकृता टीका 'विद्वन्मनोरञ्जिनीति' नामधेया विद्वत्तापूर्णा लभ्यते।

प्रश्नः १२—'बालबोधिनी' टीका केन प्रणीता ?

उत्तरम्—बालबोधिनी टीका आचार्येण आपदेवेन प्रणीता।

प्रश्नः १३—वेदान्तसारस्योपजीव्यग्रन्थानां परिचयो देयः ?

उत्तरम्—वेदान्तसारस्योपजीव्यग्रन्थेषु—१. माण्डुक्योपनिषद्, २. स्वामिविद्यारण्यस्य च पञ्चदशी प्रमुखग्रन्थौ स्तः।

प्रश्नः १४—मङ्गलश्लोके आदौ कस्य वन्दनां कविः वेदान्तसारे करोति ?

उत्तरम्—आचार्यसदानन्दः वेदान्तसारे परमब्रह्मपरमात्मनः वन्दनां करोति।

प्रश्नः १५—अनुबन्धचतुष्टयं किमस्ति ?

उत्तरम्—तत्रानुबन्धो नामचतुर्विधो भवन्ति; यथा—१. अधिकारी, २. विषयः, ३. सम्बन्धः, ४. प्रयोजनश्चेति।

प्रश्नः १६—वेदान्तदर्शनस्य कोऽधिकारी ?

उत्तरम्—गुणगणविशिष्टः प्रमाता अधिकारी भवति।

प्रश्नः १७—कोनामवेदान्तस्य विषयो भवति ?

उत्तरम्—'जीवब्रह्मैक्यं शुद्धचैतन्यं विषयः प्रमेयं वा भवति'।

प्रश्नः १८—सम्बन्धस्य कोऽर्थः ?

उत्तरम्—वेदान्तसारे प्रमेयं यत् शुद्धचैतन्यं तस्य तत्प्रतिपादकोपनिषद् प्रमाणस्य च बोध्यबोधकभावः सम्बन्धः।

प्रश्नः १९—प्रयोजनस्य किं स्वरूपम् ?

उत्तरम्—शुद्धचैतन्यविषये अज्ञाननिवृत्तिपूर्वकस्वरूपानन्दावाप्तिः प्रयोजनम्।

प्रश्नः २०—वेदान्तदर्शनस्य अधिकारी को भवति ?

उत्तरम्—साधनचतुष्टयसम्पन्नः प्रमाता वेदान्तज्ञानस्य अधिकारी भवति।

प्रश्नः २१—साधनचतुष्टयं किमस्ति ?

उत्तरं—साधनचतुष्टयं—१. नित्यानित्यवस्तुविवेकः, २. ऐहिकपारलौकिकफलयोगविरागः, ३. शयादिषट्कसम्पत्तिः, ४. मुमुक्षत्वं चेति।

प्रश्नः २२—अध्यारोपस्य किं स्वरूपम् ?

उत्तरम्—वस्तुन्यवस्त्वारोपोऽध्यारोपः।

प्रश्नः २३—अज्ञानस्य किं स्वरूपम् ?

उत्तरम्—वेदान्तसारे अज्ञानं तु सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं, ज्ञानविरोधि, भावरूपं यत्किञ्चिदिति वदन्त्यहमज्ञ इत्याद्यनुभवात्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रश्नः २४—अज्ञानस्य प्रमुखं भेदद्वयं किमस्ति ?

उत्तरम्—अज्ञानस्य व्यष्टिः समष्टिः इति उपाधिद्वयोर्भेद दृश्यते।

प्रश्नः २५—ईश्वरस्य स्वरूपं किम् ?

उत्तरम्—सत्त्वप्रधानाज्ञानसमष्टि उपहितं चैतन्यं, सर्वचराचरस्यसाक्षिसर्वज्ञः कर्मफलप्रदाता, सर्वेश्वरः सर्वेषां सर्वनियन्ता, सर्वान्तर्यामीति ईश्वरः।

प्रश्नः २६—प्राज्ञचैतन्यं-किमस्ति ?

उत्तरं—व्यष्टिउपहितं चैतन्यं प्रतिजीवव्यष्टिरूपं अज्ञानं प्राज्ञचैतन्यं भवति।

प्रश्नः २७—अज्ञानस्य के द्वे शक्त्यौ ?

उत्तरम्—अज्ञानस्य शक्ति द्वयं वेदान्ते मन्यते—१. आवरणशक्तिः, २. विक्षेप-शक्तिश्चेति।

प्रश्नः २८—का नाम आवरणशक्तिः उच्यते ?

उत्तरम्—स्वशक्त्या प्रमातुदृष्टिमवष्टभ्यं सच्चिदानन्द स्वरूपपिधायिका आवरण-शक्तिः।

प्रश्नः २९—विक्षेपशक्तेः किं स्वरूपम् ?

उत्तरम्—विक्षेपशक्तिः भ्रमजनिका भवति। यथा—रज्जौ सर्पभ्रमः।

प्रश्नः ३०—आत्मतत्त्वं कथं बद्धं दृश्यते ?

उत्तरम्—घनच्छन्नदृष्टिः—इतिश्लोकः।

प्रश्नः ३१—यथोर्णनाभिः—इतिश्लोकेन किं वर्णनमस्ति ?

उत्तरम्—आत्मनो विश्वरचनायाः वर्णनमस्ति।

प्रश्नः ३२—कः पुत्रं आत्मा स्वीकरोति ?

उत्तरम्—आत्मा वै जायते पुत्रः इति एको चार्वाक्सिद्धान्तः।

प्रश्नः ३३—अन्ये चार्वाकाः कं आत्मानं स्वीकुर्वन्ति ?

उत्तरम्—अन्ये चार्वाकाः स्थूलशरीरमेव आत्मानं स्वीकुर्वन्ति।

प्रश्नः ३४—इन्द्रियात्मवादी कः सिद्धान्तः ?

उत्तरम्—अपरे चार्वाकाः इन्द्रियमेवात्मा स्वीकुर्वन्ति।

प्रश्नः ३५—इतरे चार्वाकाः कं आत्मानं स्वीकुर्वन्ति ?

उत्तरम्—प्राण एव आत्मा इति इतरे चार्वाकाः स्वीकुर्वन्ति।

प्रश्नः ३६—मनः आत्मास्ति कः स्वीकुर्वन्ति ?

उत्तरम्—अन्ये चार्वाकाः 'मन एव आत्मा' इति स्वीकुर्वन्ति।

प्रश्नः ३७—विज्ञान एव आत्मा कः स्वीकरोति ?

उत्तरम्—अन्योऽन्यतर आत्मा विज्ञानमय इति योगाचार विज्ञानवादिनो बौद्धाः स्वीकुर्वन्ति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रश्नः ३८—'अन्योऽन्यतर आत्माऽऽनन्दमयः' अहं अज्ञः इत्यनुभव अज्ञानमात्मा कः स्वीकरोति ?

उत्तरम्—मीमांसक प्रभाकरमतं स्वीकरोति ।

प्रश्नः ३९—भाट्टमतमीमांसकाः कं आत्मानं स्वीकुर्वन्ति ?

उत्तरम्—अज्ञानसंवलितं चैतन्यमेवात्मेति कुमारिलं भट्टमतम् ।

प्रश्नः ४०—'शून्य एवात्मा' असदेवेदमग्रमासीत् कस्यमतम् ?

उत्तरम्—माध्यमिकाः बौद्धाः 'शून्ये एव आत्मा' इति स्वीकुर्वन्ति ।

प्रश्नः ४१—आत्माविषये कः सिद्धान्तपक्ष ?

उत्तरम्—अहं ब्रह्मास्मि इत्यनुभवात् नित्य शुद्ध बुद्ध प्रकाशस्वरूप मुक्तस्व आत्मा वेदान्तदर्शने मन्यते ।

प्रश्नः ४२—महावाक्यं किमस्ति ?

उत्तरम्—'तत्त्वमसि' इति महावाक्यम् ।

प्रश्नः ४३—महावाक्यार्थ बोधे हेतुरूपेण सम्बन्धत्रयं किमस्ति ?

उत्तरम्—१. सामानाधिकरण्यं, २. विशेषविशेष्यभावसम्बन्धः, ३. लक्ष्यलक्षणभावसम्बन्धश्चेति ।

प्रश्नः ४४—जहल्लक्षणस्य उदाहरणं किमस्ति ?

उत्तरम्—'गङ्गायां घोषः' ।

प्रश्नः ४५—'शोणोधावति' इत्यत्र का लक्षणा ?

उत्तरम्—अत्र अजहल्लक्षणा भवति ।

प्रश्नः ४६—वेदान्ते श्रवणपदेन केषां ग्रहणं भवति ?

उत्तरम्—षड्विधलिङ्गानि गृह्यन्ते यथा—१. उपक्रमोपसंहारै, २. अभ्या ३. अपूर्वता, ४. फलम्, ५. अर्थवादः, ६. उपपत्तिश्चेति ।

प्रश्नः ४७—समाधि कतिविधः ?

उत्तरम्—१. सविकल्पः, २. निर्विकल्पश्चेति द्विविधः ।

प्रश्नः ४८—निर्विकल्पकसमाधेः कत्यङ्गानि ?

उत्तरम्—निर्विकल्पकसमाधेः अष्टाङ्गानि भवन्ति यथा—१. यमाः, २. निय ३. आसनानि, ४. प्राणायामाः, ५. प्रत्याहाराः, ६. धारणा, ७. ध्यानम्, ८. स धिश्चेति ।

प्रश्नः ४९—निर्विकल्पसमाधेः कतिविघ्नाः सन्ति ?

उत्तरम्—चतुर्विधाः विघ्नाः अत्र भवन्ति—१. लयः, २. विक्षेपः, ३. कष ४. रसास्वादश्चेति ।

* * *

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सांख्यकारिका प्रश्नाः

प्रश्न १. सांख्यशास्त्रस्य प्रयोजनं सम्यावधाय 'व्यक्ताव्यक्तज्ञ' शब्दानां सांख्यशास्त्रोक्तं तात्पर्यं प्रतिपाद्यताम् १

२. सांख्य शास्त्रस्य चतुर्विधानि प्रमेयाणि प्रतिपादयत [illegible]

३. सांख्यशास्त्रे कति प्रमाणानि कानि च तानीति स्फुटीकुरुत [illegible]

४. सांख्यकारिकानुसारं सत्कार्यवादं साधयत [illegible]

५. सतःपदार्थस्य अनुपलब्धेः कारणानि दृष्टान्त निर्देशपूर्वकं प्रदर्श्यताम् [illegible]

६. सांख्यकारिकानुसारं प्रकृतेः कथं सिद्धिरिति प्रदर्श्यताम् ९

७. सांख्यकारिकानुसारं प्रधानस्य तत्वं साधयत ११

८. सांख्यकारिकानुसारं पुरुषस्य सत्ता कथं सिद्ध्यति ? किं च पुरुषबहुत्वे प्रमाणमिति स्पष्टीकुरुत १३

९. सांख्यशास्त्रानुसारं सृष्टि प्रक्रिया वर्ण्यताम् १[illegible]

१०. मनसो लक्षणं दर्शयता तस्य ज्ञानेन्द्रियत्वं कर्मेन्द्रियत्व- मुभयात्मकत्वं वेति सांख्यसम्मतं सिद्धान्तं प्रतिपादयत १[illegible]

११. किमात्मकं भौतिक सर्गम ? कति विधश्च तत ? का च भौतिक सर्गकल्पनाया आवश्यकता ? इतिव्याख्यायताम् २०

१२. अचेतनायाः प्रकृतेः कथं पुरुषस्य भोगापवर्ग सिद्ध्यर्थं प्रवृत्तिः भवतीति सदृष्टान्तं स्पष्टीकुरुत २[illegible]

१३. सर्वथा निर्लिप्तस्य प्रवृत्तिरहितस्य पुरुषस्य कथं बन्धः प्रतीयते इति सविस्तरं निरूपयत २४

१४. प्रधानस्य प्रवृत्ति धर्मित्वे सति कथं पुरुषस्य मोक्षः सम्भवतीति स्पष्टीक्रियताम् २५

१५. सांख्यशास्त्रे अपवर्गस्य किं स्वरूपम् ? जीवन्मुक्तदशाया किमर्थः ? इति विवेच्यताम् २६

१६. पुरुषस्य बन्धमोक्षयोः कथमुपपत्तिः ? कथञ्चापवर्ग प्राप्तिः

शास्त्री द्वितीय वर्ष प्रथम प्रश्न-पत्र मूल्य : ०-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

किञ्च सांख्यशास्त्रे विवेकज्ञानामिति सविशदं व्याख्यायताम् २७

१७. सांख्यशास्त्र दृष्ट्यां बुद्धि तत्वं निरुप्यताम् ३०

१८. सूक्ष्म शरीरं सांख्यशास्त्रे कीदृग्विधं स्वीकृतम् इति व्याख्याय तस्य संसरण प्रक्रमाञ्च निर्दिश्यताम् ३१

श्लोक व्याख्या:

१.	दुःखत्रयभिघातात्	कान्तात्यन्ततत्वात्	३४
२.	मूलप्रकृतिरविकृति	विकृतिः पुरुषः	३६
३.	दृष्टमनुमानमाप्रवचनं	प्रमाणाद्धि	३७
४.	प्रतिविषयाध्यवसायो	श्रुतिराप्तवचनं तु	३८
५.	अतिदूरात्	समानाभिहाराच्च	४०
६.	सौक्ष्मात्तदुपलब्धी	विरुपञ्च	४१
७.	हेतुमदनित्यमव्यापि	विपरीतमव्यक्तम्	४२
८.	प्रीत्यप्रीतिविषादात्मकाः	मिथुनप्रवृत्तयश्च गुणाः	४३
९.	सत्वंलघुप्रकाशकम्	प्रदीपवच्चार्थतो वृत्तिः	४४
१०.	अविवेक्यादेः	ऽव्यक्तमपि सिद्धम्	४६
११.	कारणमस्त्यव्यक्तम्	गुणाश्रयविशेषात्	४७
१२.	पुरुषस्य दर्शनायम्	संयोगस्तत्कृतः सर्गः	४८
१३.	अध्यवसायो बुद्धि	तामसमस्माद्विपर्ययम्	४९
१४.	शब्दादिषु पञ्चानाम्	सर्गानन्दाश्च पञ्चानाम्	५०
१५.	स्वालक्षण्यं वृत्तिः	वायवः पञ्च	५०
१६.	नविन भावैः	द्विविध प्रवर्तते सर्गः	५१
१७.	इत्येषः प्रकृति कृति	पदार्थ आरम्भकः	५२
१८.	एव तत्वभासान्	उत्पद्यते ज्ञानम्	५४
१९.	समग्ज्ञानाधिगमात्	धृतशरीरः	५४
२०.	प्राप्ते शरीर भेदें	कैवल्यमाप्नोति	५५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri.

वेदान्तसारे प्रश्नाः

१. किं नामानुबन्धचतुष्टयम् ? कति विधश्चतत् ? वेदान्तसारस्य कानि अनुबन्धानीति समासेन निर्दिशत १
२. वेदान्दसारस्याधिकारिणो निरुपणं कुरु २
३. वेदान्तसारानुसारं साधन चतुष्टयं व्याख्येयम् ४
४. प्रशान्त चित्ताय.......सततं मुमुक्षवे ६
५. अयमाधिकारी जननमरणादि संसारानलतप्तो दीप्तशिरा जलराशीमिवोपहारपाणिः श्रोत्रियं ब्रह्मनिष्टं गुरुमुपश्रित्य तमनुसरति । वाक्यमरोत् व्याख्येयम् ७
६. 'वस्तुन्यवस्त्वारोपोऽध्यारोपेः' इति वाक्यांशो व्याख्येयः ८
८. अज्ञानस्य स्वरूपं तस्य व्यष्टि-समष्टि भेदौ च संक्षेपेण निरूप्यताम् १०
९. ईश्वर प्राज्ञयोः स्वरूपं निर्दिशतः ११
१०. व्यष्टि समष्टिरुपाज्ञानयोः ईश्वर–प्राज्ञयोश्च तत्विकमैक्यं कथमुत्पद्यते ? इतिपिविच्यताम् १३
११. ईश्वर प्राज्ञयोः स्वात्मानन्दानुभव प्रकारो निरूपणीयः १४
१२. ज्ञानस्य शक्तिद्वयं निरूप्यताम् १५
१३. तुरीय चैतन्यम् निरुपयतः १७
१४. आत्मनः संसारकारणत्वं कथमुत्पद्यते ? इतिं स्पष्टीक्रियताम् १७
१५. वेदान्तशास्त्रनुसारम् आकाशादि शृष्टि क्रमोविलिख्यताम् १९
१६. सूक्ष्म शरीरं तस्योत्पत्ति च निर्दिश्यताम् २०
१७. व्यष्टि-समष्टि भेदेन सूक्ष्मप्रपञ्चं निरूपयत २२
१८. पञ्चीकरण प्रकार निरूपणीयः
१९. स्थूल सृष्टिक्रम प्रदर्शनपूर्वकम् स्थ...
२०. स्थूल प्रपञ्चोत्पत्ति निर्दि... व्याख्यायताम्

...नमुपयोगि ।
...त । तत्र—अन्तरोपाय-
...भकर्म । तत् वातपित्तश्लेष्मवैषम्य-
...दिकृतं मानसं च । बाह्योपायसाध्यं-(२)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

२१. विश्ववैश्वानरयोः स्वरूपं प्रदर्श्य तयोर्विषयानुभव प्रकारं वर्णयतः २९
२२. महाप्रपञ्चनिरुपणं निरूपयत् ३०
२३. पुत्रादिनामात्मत्वं आशङ्क्य तन्निराक्रियताम् ३१
२४. अपवाद पदार्थं सम्याव्याख्यायताम् ३३
२५. अध्यारोपापवादाभ्यां 'तत्वमसि' इत्यत्र तत्वं पदार्थौ निर्दिश्यताम् ३५
२६. महावाक्यार्थबोध प्रकारं लक्षीकृत्य पूर्वपक्षं प्रकरणपूर्वकं हध्दजहल्लक्षणां स्थापयत् ३६
२७. तदा पटकारतन्तुदाहे.......भिन्नपरब्रह्म मात्रं भवति इति गद्यखण्डौ व्याख्येय ३९
२८ मनसैवानुद्रष्टव्यम्, 'यन्मनसा न मनुते इत्यमनोर्विरोधो निराक्रियताम् ४१
२९. बुद्धितत्स्थचिदाभासौ घटनः स्फुरेत ४२
३०. वेदान्तसारनुसारं श्रवणं व्याख्यायताम् ४३
३१. निर्विकल्पक समाधेरङ्गानि निर्दिश्यताम् ४५
३२. निर्विकल्पक समाधेः के विघ्नाः ? इति विनिच्यताम् ४६
३३. लये सम्बोधयेच्चित्ते सोऽनपास्मृतैः इतीमे कारिके व्याख्येया ४७
३४. अधोलिखित विषयेषु टिप्पणी ४८

(१) काम्यकर्माणि (२) नित्यकर्माणि (३) उपासना कर्माणि
(४) निषिद्धकर्माणि (५) नैमित्तिकर्माणि (६) प्रायश्चित कर्माणि
१६. नारोपः (८) अपवादः (९) परिणामः
१७. इत्येषः प्र... (११) तुरीयं चैतन्यच (१२) ईश्वर चैतन्यम्
१८. एव तत्वभासान् आवरण शक्तिः (१५) विक्षेप शक्तिः
१९. समग्ज्ञानाधिगमात् धृत चैतन्यम् (१८) विश्व चैतन्यम्
२०. प्राप्ते शरीर भेदें कैवल्यम।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ श्रीः ❀

कृष्णा दिग्दर्शिका

सांख्यकारिका

प्रश्नः (१)—सांख्यशास्त्रस्य प्रयोजनं सम्यग्व्याख्याय 'व्यक्ता-व्यक्तज्ञ' शब्दानां सांख्यशास्त्रोक्तं तात्पर्यं प्रतिपाद्यताम् ।

अथवा

'तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात्'

इति कारिकांशं व्याख्यायताम् ।

उत्तरम्—सांख्यकारिकाकारेण श्रीमता ईश्वरकृष्णेन 'दुःखत्रयाभिघाताज्जिज्ञासा', दृष्टवदानुश्रविकः' इति कारिकाभ्यां स्पष्टमुक्तं सांख्यशास्त्रस्य प्रयोजनम्—दुःखत्रयमुक्तिपूर्वकं कैवल्य-प्राप्तिः । तच्च कैवल्यं अपवर्गमोक्षादिभिः शब्दैरप्यभिधीयते । तदेव परमं प्रयोजनं परमं प्रयोजनं दर्शनानां, परमं पुरुषार्थं च मनुष्याणामिति निखिलशास्त्रप्रतिपादितम् ।

सांख्यशास्त्रे दुःखत्रयाभिघातपूर्वकमपवर्गसिद्धिः शास्त्रप्रयोजनत्वेनाभिहितम् । सत्यपि दुःखत्रयाभिघातसाधनत्वे दृष्टोपाये किमर्थं शास्त्रप्रतिपादनमिति जिज्ञासायां—'न, एकान्तात्यन्ततोऽभावात्' इति समाधितम् । तथैवानुश्रविकोपायमपि इति सांख्यशास्त्रज्ञानमुपयोगि । अयमत्राभिप्रायः—लोके त्रिविधं दुःखं व्याप्तं वर्तते । तत्र—अन्तरोपायसाध्यं शरीरं मानसं च (१) अध्यात्मिकम् । तत् वातपित्तश्लेष्मवैषम्यनिमित्तं शरीरं,कामक्रोधमोहादिकृतं मानसं च । बाह्योपायसाध्यं—(२)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

आधिभौतिकं—मानुषपशुपक्षिसरीसृपादिनिमित्तम्, (३) आधिदैविकञ्च–यक्षराक्षसग्रहादिकृतम् । सर्वमेतत् आत्मनो प्रतिकूलवेदनीयत्वात् दुःखम्, तत्यपि निवारणीये तत्साधनाभावात् न प्रत्याख्यायते । सत्सु अपि दृष्टानुश्रविकसाधनेषु न प्रत्याख्यायते असत्साधनत्वात् । एवं च दृष्टानुश्रविकसाधनैः न तन्मूलत उच्छेद्यते, न च निवृत्तस्य दुःखस्य पुनराक्रमणनिरोधः विश्वास्यम् । अत एवोक्तम्—'तद्विपरीतः श्रेयानिति' ।

स्यादेतत् । दृष्टानुश्रविकसाधनाभावे कथं दुःखत्रयनिवृत्तिः इति जिज्ञासायामाह—'व्यक्ताव्यक्तज्ञविज्ञानात्' इति । व्यक्तं च ज्ञश्च तेषां समाहारः 'व्यक्ताव्यक्तज्ञाः' तेषां विज्ञान—विवेकेन ज्ञानम्, इति व्यक्ताव्यक्तज्ञविज्ञानम्, तस्मात् । दुःखत्रयनिवृत्तिः इति शेषः ।

एतद् दुःखत्रयनिवृत्तिसाधनं सांख्यशास्त्रपथं प्रवर्तयन् भगवान् कपिलः सांख्यसूत्रं प्रणिनाय । तदेवोक्तं सांख्यकारिकाकारेणेश्वरकृष्णेन लोकोपकाराय । इति स्पष्टं सांख्यशास्त्रस्य प्रयोजनम् ।

तत्र व्यक्तं महदादिमहाभूतपर्यन्तप्रपञ्चम्, अव्यक्तं प्रकृतिः । तच्च प्रधानं मूलप्रकृतिर्वति वा कथ्यते, ज्ञश्च पुरुषः । तेषां विवेकेन (पृथक् पृथक्त्वेन) ज्ञानं, साधर्म्यं, वैधर्म्यञ्च सम्यग्विज्ञाय दुःखत्रयस्यैकान्तिकात्यन्तिकनिवृत्तिः तद्द्वारा मोक्षप्राप्तिश्च भवतीति उच्यते—

> एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम् ।
> अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम् ॥"
> "सम्यग्ज्ञानाधिगमात् धर्मादीनामकारणप्राप्तौ ।
> तिष्ठति संस्कारवशात् चक्रभ्रमिवद् धृतशरीरः ॥"

तथा च—"प्राप्ते शरीरभेदे चरितार्थत्वात् प्रधानविनिवृत्तौ ।
> ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति ॥" इति ।

प्रश्नः (२)—सांख्यशास्त्रस्य चतुर्विधानि प्रमेयाणि प्रतिपादयत ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अथवा

मूलप्रकृतिरविकृतिः महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥
इति कारिकाशयः गौडपाददिशा विवेचनीय ।

(सम्पू० सं० वि० १९८३)

उत्तरम्—प्रमायाः साध्यमिति प्रमेयम् । इति शास्त्रप्रतिपाद्यं लक्ष्यभूतिविषयं प्रमेयमित्युच्यते सांख्यशास्त्रे च तत् व्यक्ताव्यक्तज्ञ-विज्ञानरूपम् । तत्र संक्षेपेण व्यक्ताव्यक्तज्ञानि प्रमेयानि पञ्चविंशति-तत्त्वानि अधीयन्ते । इत्युक्तं सांख्यकारिकाकारेण—

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥

अयं अत्राभिप्रायः, चतुर्विधानि तत्त्वानि संक्षेपेण अभिधेयानि—कश्चित् केवल प्रकृतिः, केचित् प्रकृतिविकृतयः केचित्केवलं विकृतयः, कश्चित् च प्रकृतिविकृतिभ्यां भिन्नः अनुभयरूपः इति । तत्र मूल-प्रकृतिः—मूला चासौ प्रकृतिरिति मूलप्रकृतिः, प्रकर्षेण करोतीति प्रकृतिः महदादेः कार्यकलापस्यासौ मूलम्, न त्वस्य मूलान्तरमिति मूलप्रकृतिः । तदेवोक्तम्—अविकृतिरिति । ननु अस्या अविकृतित्वे दृढीयान् प्रमाणाभावः, इति कथविकृतिरिति चेत्, न । न चास्या कश्चित् प्रकृतिः सत्त्वरजस्तमसां साम्यावस्थारूपावं । तदेव प्रधानम् अव्यक्तं चेति कथ्यते ।

'महदाद्याः प्रकृतिविकृतयः सप्त' । इति व्याख्यायते । महान् आदौ येषां ते महदाद्याः । ते च महान्, अहङ्कारः, पञ्चतन्मात्राणीति सप्त प्रकृतिविकृतयः । प्रकृतयश्च विकृतयश्च इति प्रकृतिविकृतयः । स्वभिन्नतत्त्वं जनयति इति प्रकृतिः, यत्र—महत् अहङ्कारं, अहङ्कारश्च पञ्चतन्मात्राणि, एकादशइन्द्रियाणि च, पञ्चतन्मात्राणि च पञ्चमहा-भूतनि जनयन्ति प्रकुर्वन्तीति प्रकृतयः । तत्त्वान्तराणां विकाराणि इति विकृतयः । तत्र—महत् प्रकृतेः, अहङ्कारः महतः, तन्मात्राणि च अह-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ङ्कारस्य विकृतयः विकारभूता इत्यर्थः । तदुक्तम्—'एतस्मादन्यथा विकार इत्युदीरितः' । एवं महदाद्याः सप्त प्रकृतिविकृतयः ।

'षोडशकस्तु विकारः' । षोडशकः षोडशानां तत्त्वानां समूहः तत्र एकादशेन्द्रियाणि पञ्चमहाभूतानि च तेषां समूहः षोडशकः, तच्च केवलं विकृतिः । तत्र एकादशेन्द्रियाणि अहङ्कारस्य महाभूतानि च पञ्चतन्मात्राणां विकृतयः ।

कथं केवलं विकृतयः चराचरजगत्प्रपञ्चस्य कारणत्वात् प्रकृतिरपीति चेत् ? न अनवस्था-दोषात् । न च स्थूलभूतं चराचरजगत् तत्वान्तरं स्वरूपमात्रभिन्नत्वात् । तथापि कारणमिति चेत् न, बीजाङ्कुरवत् अनवस्थापातात् ।

प्रकृतिविकृतिभ्यां भिन्नः अनुभयरूपः पुरुषः पञ्चविंशतितमं तत्त्वम् । तदुक्तम् न प्रकृतिर्न विकृतिः पुरुषः । इति ।

प्रश्नः (३) सांख्यशास्त्रे कति प्रमाणानि कानि च तानीति स्फुटीकुरुत ।

अथवा

सांख्यशास्त्रानुसारं प्रमाणपदार्थं प्रतिपाद्य, कथं त्रिविधप्रमाणेषु प्रमाणान्तराणामन्तर्भाव इति प्रदर्शनीयम् ।

अथवा

दृष्टमनुमानमाप्तवचनं सर्वप्रमाणसिद्धत्वात् ।
त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि ॥

इति कारिका गौणपादविधया व्याख्यायताम् ।

(सम्पू० सं० वि० वि० १९७८, ७९)

उत्तरम्—"प्रमेयसिद्धिः प्रमाणाद्धि" इति शास्त्रविषयभूतप्रमेयप्रतिपादनात् पूर्वं प्रमाणपदार्थं प्रतिपादनीयम् । इति नियमात् सांख्यशास्त्रेऽपि संक्षिप्य प्रमाणानि उच्यन्ते—दृष्टमनुमानमाप्तवचनमित्यादिभिः ।

तत्र प्रमायाः करणमिति प्रमाणम्, यथार्थोऽनुभवः प्रमा, तस्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

श्रणमित्यर्थः, करणञ्च 'साधकतमं करणम्' (अ० १।४।४२) इति ष्टम् । तदुक्तम्—"प्रमीयतेऽनेनेति निर्वचनात् प्रमां प्रति करणत्वं यते । तच्च असन्दिग्धाविपरीतानधिगतविषया चित्तवृत्तिः । बोधश्च रुषेयः फलं प्रमा, तत्साधनं प्रमाणमिति ।" इति श्रीवाचस्पतिमिश्र-दाः । "पौरुषेयबोध इत्यनेन बोधस्य पुरुषनिष्ठत्वमाख्यायते येन ज्ञातृत्वादिधर्मेण पुरुषस्य परिणामित्वं स्यादपितु बुद्धौ प्रतिबिम्बि-तेन तत्तादात्म्यापत्त्या पुरुषस्य ज्ञानादिमत्त्वोपचारात् पौरुषेय इत्य-धीयते एवं च चितिचित्तयोरभेदग्रहणात् पुरुष उपचर्यमाणोऽपि तुतो बुद्धिवृत्त्यात्मक एव बोधो न पुरुषधर्म इति" विद्वत्तोषिणी-राः ।

तदेवं—'स्थाणुर्वा पुरुषो वेति' संशयः, 'रज्जौ अहेर्ज्ञानं' विप-यः, 'ज्ञातविषयकं ज्ञानं स्मृतिः' इति, संशयविपर्ययस्मृतिज्ञानाभ्यां न्नज्ञानकरणम् प्रमाणमिति सिद्धम् । येन ज्ञानेन व्यक्ताव्यक्तज्ञानां म्यग्बोधो भवति, येन च विवेकज्ञानेन अपवर्गसिद्धिश्च इति । प्रमाण-दार्थज्ञानप्रयोजनं व्याख्यातम् । तदेवोक्तं 'प्रमेयसिद्धिः प्रमाणाद्धि' ति ।

एवं प्रमाणपदार्थं निरूप्य सांख्यानुमतानि प्रमाणानि निर्दिशति टमिति । दृष्टप्रमाणम्; अनुमानप्रमाणम्; आप्तवचनप्रमाणमिति विधं प्रमाणमिष्टम् । इष्टम्—अभीष्टं सांख्यशास्त्राभिमतमित्यर्थः । न्यूनं नाप्यधिकमिति त्रिविधम् ।

तत्र श्रोत्रं, त्वक्, चक्षुर्जिह्वा, घ्राणमिति पञ्चज्ञानेन्द्रियाणि । शब्दस्पर्शरूपरसगन्धानि क्रमशो गृह्णाति । एवं ज्ञानेन्द्रियैः विषय-ग्रहणजनितं ज्ञानं, यद्वा विषयेन्द्रियसन्निकर्षजनितं ज्ञानं दृष्टमिति । देव प्रत्यक्षमिति प्रत्यक्षमिति चोच्यते । यत्तु …रूपेण लिङ्गेन हिरूपलिङ्गिग्रहणं तदनुमानम् । सच्छास्त्रवचनं आप्तजनोक्तवचनं वा माववचनमिति व्याख्यातं प्रमाणलक्षम् ।

एवं सति कथं त्रिविधमेवेति, यतः "उपमानार्थापत्तिसम्भवानु-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पलब्धि-प्रतिभाऐतिह्य-चेष्टादयोऽपि प्रमाणानीति श्रूयन्ते इति चे
न, सर्वप्रमाणसिद्धत्वादिति । तत्र, अनुमाने तावमर्थापत्तिरन्तर्भ
सम्भावप्रतिभैतिह्योपमाश्चाप्तवचने, (केषांचिन्मते चेष्टानुपलब्ध
दृष्टप्रमाणेऽन्तर्भूतौ) इति । तस्मात्त्रिष्वेव सर्वप्रमाणसिद्ध
'त्रिविधं प्रमाणमिष्टम्' इत्युक्तम् ।

प्रश्नः (४)—सांख्यकारिकानुसारं सत्कार्यवादं साधयत

अथवा

असत्कारणादुपादानग्रहणात् सर्वसम्भवाभावात्
शक्तस्य शक्यकारणात् कारणभावाच्च सत्कार्यम्

इति कारिका व्याख्येया ।

उत्तरम्—नासतः सदुत्पत्तिः न च सतोऽसज्जायते, न
असत्त्वं सतो विवर्त इति सौगत-नैयायिक-वेदान्तिनां मतानि सांख्
चार्या निराकुर्वन्ति । तत्र किं तथ्यमित्यपि वक्तव्यमिति संख्यका
कायां निरूपितम्—

असत्कारणादुपादानग्रहणात् सर्वसम्भवाभावात् ।
शक्तस्य शक्यकारणात् कारणभावाच्च सत्कार्यम् ॥

अत्र सत्कार्यमिति साध्यम् । सतो कारणदेव सत्कार्योत्प
जायते, किं वा कार्यं स्वोत्पत्तिपूर्वमेव कारणे वर्तते इति भावः ।
युक्तं क्रियाया नैरर्थक्यप्रसङ्गात् । न च उत्पत्तेः पूर्वं कार्यस्या
शङ्कनीयम् इत्युच्यते ।

असत्कारणादिति । असत्कारणात् सत्कार्योत्पत्तिरसम्भवमेव
च सिकताभ्यो तैलोत्पत्तिः सम्भवति तत्र तस्यासम्भवात् ।
शिल्पिसहस्रैरपि नीलं पीतं विधातुं शक्यते तत्र तस्यासम्भावा
अयमत्रार्थः—यदि असतः सदुत्पत्तिः कल्प्यते तर्हि मृदादिषु सर्वे
पदार्थेषु सर्वेषां कार्याणामुत्पत्तिः सम्भवेत्, न च तत् विचारसहम् ।

उपादानग्रहणात् । कार्याणां कारणेन सम्बन्धोऽनिवार्य ए
यस्य कार्यस्य यदुपादानकारणं तदेव तस्यार्थे गृह्यते ।
तस्य तत उपादानसम्बन्ध भवति । असति सम्बन्धे न कार्योत्प

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भवेत्, न च निमित्तादिभिः कारणैः कार्यस्योत्पत्तिर्लोके दृश्यते । दिषु कार्येषु सत्स्वपि दण्डचक्रादिवस्तुजातस्य कारणत्वं न तत्र त्पत्तिः । उपादानकारणे एव कार्यस्य सत्त्वात् । अपरं च कारणेन स्य सम्बन्धं स्वीकार्यमेव । न च सम्बन्धं असतो सम्भवति ।

स्यादेतत् असम्बद्धमेव कार्यं कस्मान्न जन्यते इति शङ्कायाम् धत्ते

सर्वसम्भवाभावात् । न हि सर्वेभ्यः कारणेभ्यः सर्वकार्यमुत्पद्यते विरोधात् । मृत्पिण्डं घटस्यैव कारणं न तु पटस्य । अतो कारणे स्य पूर्वमेव सम्बन्धः स्वीकार्यमित्यर्थः ।

शक्तस्य शक्यकारणात् । यत्कारणं यत्कार्यस्योत्पत्तौ समर्थं त्, तत्कारणं तस्यैव जनक इति च स्वीकार्यम् ! न च यत्र यस्या- कः, तत्र तस्य प्रवृत्तिरुपासिर्वा सम्भाव्यते । सा शक्तिः कारणाश्रया त्कार्यरूपैव । अतो स्वकार्यमेव जनयेदिति लभ्यते ।

अस्तु नाम सर्वं किं तावत् सम्बन्धं कारणकार्ययोः इति चेत् पते—कारणभावाच्च । तथाहि कारणं कार्यरूपमेव कार्यं वा कार- इति स्थिति । तत्र अभेदव्यवस्थामेवाह कारणभावात्—कार्यस्य रणात्मकत्वात् ।

इति युक्तिपञ्चकात् विप्रतिपत्तिं निराकृत्य स्वमतमुपस्थापयति कार्यम्' इति । कार्यं स्वकारणे सत्त्वेनैवावतिष्ठते । अतो कारण- पारात् पूर्वं कार्यस्य सत्त्वे एव तस्याभिव्यक्तिः सम्भवति । तदेव कार्यस्य व्यापारात्प्राक्सत्त्वात् ।

प्रश्नः—(५) सतः पदार्थस्य अनुपलब्धेः कारणानि दृष्टान्त- देशपूर्वकं प्रदर्श्यताम् ।

अथवा

अतिदूरात् सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात् ।
सौक्ष्म्यात् व्यवधानादभिभवात्समानाभिहाराच्च ॥

इति कारिका उदाहरणनिर्देशपूर्वकं व्याख्येया ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

उत्तरम्—वस्तुनः प्रत्यक्षाभावे कथं नासत्त्वं गृहीतव्यम् ?
पूर्वपक्षम् । तदुक्तं लोकायतिकैः यस्य यत्राप्रत्यक्षत्वं तस्य तत्रा
यथा अत्र भूतले घटस्याप्रत्यक्षत्वम् अतोऽत्र घटाभावः इत्यमेव
मार्थिकं सत्यम् इति ।

तन्न, अनुभवविरुद्धत्वात् । तथाहि गृहेऽसत्त्वस्य देवदत्तस्य
त्वम् स्थानान्तरसत्त्वात् । तर्हि सति चेत् कथमनुपलब्धिः इति
उच्यते । अतिदूरादिति—

'अतिदूरात् सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात् ।
सौक्ष्म्याद् व्यवधानाद् अभिभवाद् समानाभिहाराच्च ॥'

७ सतोऽपि वस्तुनोऽनुपलब्धिः सम्भवतीति शेषः ।

(१) अतिदूरात्—यथा ग्रहोपग्रहाणाम् अप्रत्यक्षत्वम्, वि
उत्पतन्तः पक्षिणः इन्द्रियागोचरं सन्तोऽपि न तेषामसत्त्वं गृह्यते
उक्तं 'अतिदूरादिति' ।

(२) अतिसामीप्यात्—अतिसामीप्यादपि इन्द्रियाणाम् अग्रा
भवति । यथा लोचनस्थमञ्जनम् अतिसामीप्यान्न लक्ष्यते । यथ
पर्वतस्याधोभागे वर्तमानो जनः तस्योन्नतत्वं न पश्यति । इति ।

(३) इन्द्रियघातात्—इन्द्रियाणां वैकल्यादपि सतो व
गृहणं न सम्भवति । यथा अन्धत्वात् कक्षस्थस्य घटस्याभावः,
रत्वाच्च निकटोच्चार्यमाणस्य शब्दस्य अप्रत्यक्षं भवति ।

(४) मनोऽनवस्थानात्—मनसः अन्यत्र व्यापृतत्वात् इत्य
तदुक्तं—कामाद्युपहतमनः अतिव्यग्रतया स्वाभीष्टविषये व्यग्रचित्त
समीपस्थमपि जनं न जानाति इति प्रत्यक्षसिद्धमेव सर्वम् ।

(५) सौक्ष्म्यात्—यथेन्द्रियसन्निकृष्टमपि परमाण्वादयः
लक्ष्यीक्रियन्ते । वायुमण्डलस्थजीवाणुविषये तदेव न्यायं गृह्यते ।
च प्रकृतिमहदहङ्कारमनसां सौक्ष्म्यादनुपलब्धिः ।

(६) व्यवधानात्—इन्द्रियार्थयोर्मध्ये भित्त्यादीनां व्यव
जाते सतोऽपि वस्तुनोऽलक्ष्यत्वं गम्यते । तद्यथा भित्तिव्यवधानात्
स्थितो जनः न प्रत्यक्षविषयो भवेत् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(७) अभिभवात्—तिरस्कृतत्वादित्यर्थः। यथा दिवसे सूर्याभिभूतं नक्षत्रमण्डलम् न लक्ष्यते न तु अभावात्।

(८) समानाभिहारात्—समानाकारे वस्तुनि मीलितत्वादित्यर्थः। तद्यथा जलाशये मेघमुक्तजलबिन्दवः न लक्ष्यते। इति स्पष्टम्।

च इति अनुक्तसमुच्चयार्थम्। अनभिव्यक्तानि च वस्तूनि न लक्ष्यन्ते यथा तन्तुषु पटस्य पयसि दध्नः अप्रत्यक्षम् न तु अभावः तत्रास्तीत्यर्थः।

अत एव इन्द्रियाविषयस्यापि वस्तुनोऽपि सत्त्वं सम्भवति। न प्रत्यक्षलक्ष्यविषयेष्वेव सत्त्वमित्यर्थः। अत एव गृहान्निर्गतस्य देवदत्तस्य गृहेऽसत्त्वेऽपि न तस्य अभावो गृह्यते। प्रत्यक्षायोत्वमात्रमेव तत्र गृह्यते। इति स्पष्टमेव सर्वम्।

(९)—सांख्यकारिकानुसारं प्रकृतेः कथं सिद्धिरिति प्रदर्श्यताम्। (सं० स० वि० १९७८,७९)

उत्तरम्—ननु महदादिस्थूलभूतपर्यन्तानां तु प्रत्यक्षत्वात् सिद्धिः स्पष्टमेव। परं न तथा प्रकृतेः प्रत्यक्षग्रहणम्। अतः कस्मान्नास्याभावः स्वीकार्यं इति शङ्कायां सञ्जातायां तन्निराक्रियते।

सौक्ष्म्यात्तदनुपलब्धिर्नाभावात्कार्यतस्तदुपलब्धेः।
महदादि तच्च कार्यं प्रकृतिसरूपं विरूपं च इति॥

तस्य प्रकृतेः अनुलब्धिः सौक्ष्म्यात् भवति न तु अभावादित्यर्थः। यदुक्तम् 'अतिदूरादि' त्यादिभिः। अतिसौक्ष्म्याद् अपि सतो वस्तुनः अप्रत्यक्षत्वम्, यथा परमाण्वादीनाम्। एवमेव प्रकृतेः सौक्ष्म्यादनुपलब्धिः भवति नाभावात्।

सति च अप्रत्यक्षे कथं तस्य सत्त्वम्, अभावमेव गृह्यतामिति चेत् न। यस्मान्नैक प्रत्यक्षम् एव प्रमाणं सत्त्वज्ञानाय। अतो अनुमानेन प्रकृतेः सत्त्वं ध्रियते इति सूचयते। तदनुमानमेव दर्शयति-कार्यतस्तदुपलब्धेः इति 'यद् यत्कार्यं तत्तत् सकारणम्, यथा घटः' इति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

व्याप्तिः । तत्र पृथिव्यादीनां तत्त्वानां कारणमन्वेषयन्नेव सिद्धिः । तदुक्तं "महदादि तच्च कार्यम्" इति । तदयमया स्वरूपम्—

'यद्यत् कार्यं तत्तत् सकारणम्, यथा घटः', महदादिः च क अतोऽस्य सकारणत्वम्, तदेव प्रकृतिः । इति सिद्धम् । इत्यनु सिद्धत्वान्न प्रकृतेरभावं शङ्कनीयम् ।

यत्तु इन्द्रियागोचरं सत् अनुमानागमाभ्यामसिद्धत्वे सति अथो मेनं गृह्यते यथा शशशृङ्गम् व्योमकुसुमम्, भोजने सप्तमं रसं व ह्यत्र तथा अनुमानागमाभ्यामसिद्धत्वम् तस्मान्न तथेति; ना मित्यर्थः ।

तथा सति महदादिषु कार्येषु सत्स्वपि कथं कारणसिद्धिः, तादिभिः असतो सदुत्पत्तिः इति गृहीते सतीति न शङ्कनीयम् । स चार्यैः पूर्वमेव तत्खण्डितम् । सतो एव सदुत्पत्तिरिति स्वीकृत निर्मूलैव शङ्का ।

एवं च महदादिस्थूलभूतपर्यन्ततत्त्वानां सुखदुःखमोहकरत्नि तेषां सत्त्वरजस्तमोमयत्वं सिद्धमेव अतो तेषां कारणस्य सत्त्वर मोमयत्वं तथा च गुणानां साम्यावस्था च स्वीकर्तव्या । नह प्रकृत्या अपि करणमन्यं कल्पनीयम् । कल्प्यतामान्यं को दोष इत्य वाच्यम् अनवस्थाप्रसङ्गात् । ननु बीजाङ्कुरवदत्राऽपि प्रवाहमेवमा कार्यमित्यपि न वक्तव्यम्, प्रमाणाभावात् । इति स्पष्टमन्यत् । ि

एवं प्रकृतेः सिद्धे सति महदादिकार्याणां विषये प्रस्तौति प्रा सरूपं विरूपं च इति महदादयः महदहङ्कारपञ्चतन्मात्र-पञ्चमह एकादशेन्द्रियवर्गाणां प्रकृतेः सादृश्यं असादृश्यं च । केषाञ्चनगुणवि भयनिष्ठत्वं केषाञ्चन्न च एकाश्रयत्वम् । तदेव प्रपञ्चयति का ध्यास—

"हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम् । सा
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम् ॥"

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इति प्रकृतितत्कार्ययोः वैसादृश्यम्,
"त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि ।
व्यक्तं तथा प्रधानम् ....॥"
इति च सादृश्यम् ॥

प्रश्नः (७)—सांख्यकारिकानुसारं प्रधानस्य सत्वं साधयत ।

उत्तरम्—सांख्यकारिकायां श्रीमता ईश्वरकृष्णेन प्रकृत्तेः सत्ता अधोलिखिताभिः पंक्तिभिः साधिता—

'कारणगुणात्मकत्वात् कार्यस्याव्यक्तमपि सिद्धम् ॥
भेदानां परिमाणात् समन्वयात् शक्तितः प्रवृत्तेश्च ।
कारणकार्यविभागादविभागाद्' वैश्वरूपस्य ॥
कारणमस्ति अव्यक्तम् ....॥ इति ।

तथा हि सिद्धे जाते सति सत्कार्यवादे कार्यभूतस्यास्य चराचरप्रपञ्चस्य "त्रिगुणमविवेकिविषयः सामान्यमचेतनं प्रसवधर्मि" इत्यादिभिः ये गुणा उक्ताः ते कारणस्य गुणाः सन्त एव कार्यं व्याप्तुं शक्नुवन्ति । तदुक्तम्—कारणगुणात्मकत्वात्कार्यस्य अव्यक्तमपि सिद्धमिति ।

यथा हि तन्त्वादिगुणात्मकं पटादिः । तथैव कारणगुणात्मकं महदादिकार्यजातम् । अथवा महदादिकार्यं स्वोपहितत्रिगुणात्मकवस्तूपादानोपादेयं त्रिगुणात्मकत्वात् । यथा वा—महदादिगुणानां कारणव्याप्यत्वं कार्यगुणत्वात् पटरूपवत् । यस्य यस्य कार्यगुणत्वं तस्य तस्य कारणव्याप्यत्वम्, यथा पटरूपं तन्तून् । इत्यन्वयव्याप्तिः । यद्यत् गुणं कारणव्याप्यं तत्तत् कार्यस्याप्यव्याप्यम्, यथा घटे स्नेहाभावः ।

इति अन्वयव्यतिरेकेण सिद्धे सति महदादिव्यगुणानां त्रिगुणाविवेक्यादीनां व्यापकं केनचित् कारणेन भवितव्यम् । तदेव अव्यक्तं प्रधानमिति वोच्यते ।

तदेव पुनः विवृणोति—भेदानां परिमाणादित्यादिभिः । तद्यथा कारणम् अस्ति अव्यक्तम्, कस्मात् ? अत उच्यते ।

१. भेदानां परिमाणात्—महदादिकार्यभूतप्रपञ्चस्य परिमित

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्वात्, परतन्त्रत्वात्, सापेक्षत्वात्, सान्तत्वाच्च मूलकारणस्य कस् अपरिमितं स्वतन्त्रं निरपेक्षं अनन्तं च भाव्यम्, अन्यथा कारणप्र कल्पनायाम् अनवस्था जायते।

२. भेदानां समन्वयात्—कार्यभूतस्यास्य जगत्प्रपञ्चस्य व मध्ये केषाञ्चिद्गुणानां सामान्यत्वमपि, केषाञ्चिच्च कुत्रचिदन्यत्र कुत्रचिच्च वैषम्यमिति। ये केचित् सामान्यधर्माः त्रैगुण्यादयः त कस्मिंश्चित् मूलकारणे भाव्याः। यदुक्तम्—

"अविवेक्यादेः सिद्धिः त्रैगुण्यात्तद्विपर्ययाभावात्।
कारणगुणात्मकत्वात् कार्यस्याव्यक्तमपि सिद्धम्॥" इति

अतो प्रधानस्य सत्त्वं सिद्धम्।

३. शक्तितः प्रवृत्तेश्च—कारणं शक्तितः कार्यमपि अभि प्नोति। तान्येव कार्याणि स प्रवर्तयति यस्मिन् तस्य शक्तिमत्त यथा मुकुटादीन् सुवर्ण एव पटादीन् तन्तव एव। अत एव महद चराचरप्रपञ्चस्य त्रिगुणादिधर्मवता केनचित् कारणेन भाव्यम्, त प्रधानम्।

४. कारणकार्यविभागात्—कारणकार्ये परस्परं भिद्येते अ तत्त्वानि कारणकार्यभेदेन पृथक्-पृथक् अधीयन्ते। कानिचित् तत्त्व कारणानि कानिचित् कार्याणीति विभागः। तत्र कार्यं व्यक्तम् कारणम् अव्यक्तकार्यम् इति विवेकः। अतो महदादीनां किञ्चित्कारणं भाव्यं यस्तत्राव्यक्तरूपेणावस्थितः स्यात्। त प्रधानम्।

५. आविभागाद् वैश्वरूपम्—महदादिचराचरप्रपञ्चप कार्यभूतानि स्वस्वकार्येभ्यो जायन्ते, तत्रैव लीयन्ति च। यथा कू ङ्गानि कूर्मशरीरे विशन्तिप्रादुर्भवन्ति च। तथैव जगदेतत् स्वक लीयते तस्मादेव प्रादुर्भवति च अतोऽस्यैकं एव करणं भाव्यम्। त प्रधानमिति सिद्धम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain: Digitization by eGangotri

प्रश्नः (८) सांख्यकारिकानुसारं पुरुषस्य सत्ता कथं सिद्धयति ? किं च पुरुषबहुत्वे प्रमाणमिति स्पष्टीकुरुत ।

उत्तरम्—सांख्यशास्त्रे चतुर्विंशतिप्रकृतिविकृत्यात्मकतत्त्वभिन्नं किञ्चित् निष्क्रियं, व्यापि, नित्यम्, अत्रिगुणं, विवेकि, अविषयः चेतनं तत्त्वं स्वीक्रियते । तदेव तत्त्वं 'पुरुषं' इति संज्ञयाऽभिधीयते । यथाह भगवती श्रुतिः—'अनशनन्नन्योऽभिचाकशीति' 'अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः' 'असङ्गो ह्ययं पुरुषः' इत्यादिभिः ।

तदेव तत्त्वं साधयते साख्यशास्त्रे, यथा—

संघातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात् ।
पुरुषोऽस्ति भोक्तृभावात्कैवल्यार्थं प्रवृत्तेश्च ।। इति ।

तत्र पुरुषोऽस्तीति साध्य, संघातपरार्थत्वात् इत्यादयः हेतवः । अस्यार्थः—संघातः परार्थत्वात्, त्रिगुणादिविपर्ययात्, अधिष्ठानात्, भोक्तृभावात्, कैवल्यार्थं प्रवृत्तेः, च पुरुषोऽस्ति । तत्र—

१. संघातपरार्थत्वात्—चतुर्विंशतितत्त्वात्मकं जगदेतत् संघातः त्रिगुणात्मकत्वात् । तत्तु संघातः परार्थं एव भवतीति नियमः । तदेवानुमानद्वारा प्रमाणीक्रियते—'संघातः परार्थः' संघातत्वात्, शयनासनादिवत् ।' इति अत्र 'यत् यत् संघातः तत्तत् परार्थः' इति व्याप्तिः, शयनासनादिवदिति दृष्टान्तः । अतश्चतुर्विंशति तत्त्वात्कमम् एतच्चराचरं जगत् परार्थं एव भवेत् संघातत्वात् । स पर एव असंघातरूपः पुरुषः । इति । यथा शयनासनादयो संघाताः शरीरार्थाः भवन्ति तथैव जगदप्येतदिति स्पष्टम् ।

, ननु शयनासनादयो संघाता अन्यसंघातार्था एव भवन्ति, न संघातभिन्नार्थाः इति, लोकेऽपि प्रतिसंघाता अन्तसंघातायैव दृश्यन्ते इति च प्रमाणवलात्, न पुरुषसिद्धयर्थं संघातपरार्थत्वं स्वीकरणीयम् इति चेत्, न ।

एकः संघातोऽपरसंघाताय, अपरोऽन्याय, तदपीतरायेति मूल-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्षयकारिणी अनवस्था स्यात्; न हि व्यवस्थायां सत्यामपि अनवस्था स्वीकरणीया, कल्पनागौरवदोषात्। व्यवस्था तु प्रागेवोक्ता। ननु सति प्रमाणबले बीजाङ्कुरादिवदनवस्थाजन्यं कल्पनागौरवमपि क्षन्तव्यमि चेत्; तदप्ययुक्तम्, प्रमाणाभावात्। प्रमाणं हि परार्थत्वमेव साधय न तु संघातार्थमिति। यथा हि "संघातः परार्थः संघातत्वा शयनासनादिवत्" इत्यत्र परार्थत्वं साध्यम्। स पर एव असंघातरू पुरुषः।

२. त्रिगुणादिविपर्ययात्—अत्र त्रिगुणादिशब्देन—"त्रिगुणमविवे विषयः सामान्यमचेतनं प्रसवधर्मि।" इति कारिकायामुक्तानि धर्मा ज्ञेयानि। तथा हि पुरुषः अस्ति त्रैगुण्यादिधर्माणां त्रैगुण्यधर्मरहि तत्त्वार्थत्वात् अतस्त्रैगुण्यादिधर्मैरहितस्य पुरुषस्यास्तित्वं सिद्धम्। अ नैव पुरुषस्य अविवेकित्वम् असामान्यत्वं चेतनत्वं अप्रसवधर्मित्वमा सिद्धम्।

३. अधिष्ठानात्—त्रिगुणात्मकत्वात् जगदेतत् सुखदुःखमोहा त्मकम् इति तु प्रत्यक्षसिद्धमेव। यथा हि तत्त्वकौमुदीकारेण कामिन्य सुखदुःखमोहात्मकत्वम् उदाहृतम्। अत्र हि चराचरभूतं जगदेत अधिष्ठातृसहितं सुखदुःखमोहात्मकत्वात्, रथादिवत् यद्यत् सुखदुःख मोहात्मकं तत्तदधिष्ठानाधिष्ठितं यथा रथादीनि सूताद्यधिष्ठितानि यन्नाधिष्ठानादिवत् तन्न सुखदुःखादिवत्। इत्यन्वयव्यतिरेकेण सि सुखदुःखमोहात्मकं जगदेतत् अधिष्ठातृसहितम्। स एव अधिष्ठाता त्रिगुणादिरहितं स्वीकर्तव्यम्, अन्यथा तस्याप्यधिष्ठातृसम्भवः इत्यन वस्थापातः स्यात्। अत एव पुरुषः स्वीकर्तव्यम्।

४. भोक्तृभावात्—पुरुषोऽस्ति भोक्ता चतुर्विंशतितत्त्वान भोग्यत्वात्। सुखदुःखमोहात्मकत्वात् प्रकृत्यादिमहाभूतपर्यन्तं प्रपञ्च मेतत् भोग्यमेव सुखदुःखादीनां भोग्यत्वात्। यद्यत् वस्तुजातं भो तत्तत् भोक्तृमत्, ओदनादिवत्। अनेनानुमानप्रमाणेन सुखदुःखादि रहितस्य त्रिगुणादिरहितस्य वा पुरुषस्यास्तित्वं प्रमाणीक्रियते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यत्तु 'असङ्गो ह्ययं पुरुषः' 'अनश्नन्नन्योऽभिचाकशीति' इत्यादिश्रुतिप्रमाणबलात् पुरुषस्याभोक्तृत्वं सिद्धम्, इति अप्रमाणमेतद्वाक्यामिति चेत्, न । भोक्ता इत्यस्य द्रष्टा इत्यर्थ ग्रहीतव्यम् । तत्र हि चराचरं जगदेतत् दृश्यं पुरुषोऽस्ति द्रष्टा इत्यर्थं ग्राह्यम् । शेषं पूर्ववत् ।

५. कैवल्यार्थंप्रवृत्तेः—लोकेऽस्मिन्व्याप्तस्य दुःखत्रयस्य एकान्तिकात्यन्तिकनिवृत्यर्थ दिव्यदृष्टयः ज्ञानिनः क्रान्तिदर्शिनो वा मुनयः प्रयतमाना दृश्यन्ते । तत्र हि प्रवृत्तिः नित्यचेतनस्यास्य पुरुषस्य सत्वादेव जायते । इति वृद्धजनप्रमाणाच्च पुरुषस्य सत्ता स्वीकरणीया ।

इति प्रमाणपञ्चकबलेन पुरुषस्य, तत्र अत्रिगुणविवेक्यसामान्यचेतनत्वादिधर्माणां च सिद्धिः निर्विवादमेव स्वीकरणीया ।

पुरुषबहुत्वम्—

सम्प्रति पुरुषबहुत्वं दर्श्यते जननेति—

'जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च ।
पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव ॥'

अस्यार्थः—पुरुषबहुत्वं सिद्धम् इति साध्यम् । कस्मादिति साधनभूतानि उच्यन्ते—जननमरणकरणानां प्रतिनियमाद्, अयुगपत्प्रवृत्तेः, त्रैगुण्यविपर्ययात् च एव । एवकारोऽत्र साध्यस्य निश्चितत्वद्योतनाय ।

जननं जन्म, मरणं देहपातः, करणानि त्रयोदशविधानि बुद्ध्यहङ्कारैकादशेन्द्रियाणि । तेषां प्रतिनियमं प्रतिपुरुषपृथक्व्यवहारः । तत्र शरीरेण पुरुषस्य सम्बन्धग्रहणं जन्म । तत्तु प्रतिव्यक्तिभिन्नमेव एकस्य जाते सति न हि सर्वे जायन्ति, न वा एकस्य मृते सति म्रियन्ते । इति प्रत्यक्षप्रमाणबलात् प्रतिशरीरभिन्नपुरुषत्वं सिद्धम् । तथा च एकस्य अन्धत्वबधिरत्वादिदोषत्वे सति न हि सर्वे तद्दोषदूषिता भवन्ति । इति च पुरुषबहुत्वं सिद्धम् ।

अयुगपत्प्रवृत्तेः प्रतिशरीराणामसदृशक्रियया वा प्रतिशरीरभिन्नपुरुषत्वं सिद्ध्यति । तथा हि एकस्य प्रयतमाने सति अपर स्वपिति,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain: Digitization by eGangotri

एकस्याध्ययने प्रवृत्ते सति अन्यः भुनक्ति इति प्रतिशरीरभिन्नक्रियत्व पुरुषबहुत्वं सिद्धम् । न एकपुरुष सति पृथक् पृथक् शरीरवृत्तिः सम्‍द्यते शरीरस्याचेतनत्वात् ।

त्रयाणां गुणानां समाहारः त्रिगुणं तस्य भावः त्रैगुण्यस्य वि यंयः त्रैगुण्यविपर्ययः, तस्मात्त्रैगुण्यविपर्ययात् । अत्र हि त्रिगुणरहि इत्यर्थं न ग्राह्यम् । कस्मिंश्चित् व्यक्तौ सत्त्वप्राधान्यं अन्ये रजःप्राधा अपरे वा तमःप्राधान्यमिति न्यायात् त्रैगुण्यविपर्यये सति प्रतिशरी भिन्नपुरुषत्वं ग्राह्यम् इत्यर्थः ।

अनेन प्रकारेण पुरुषस्यास्तित्वं प्रतिशरीरभिन्नत्वं च ग्राह्यम्

प्रश्नः—(६)—सांख्यशास्त्रानुसारं सृष्टिप्रक्रियां वर्णयत ।

उत्तरम्—अत्र वर्णनीये सांख्यशास्त्रे प्रकृति-पुरुषाभिधेये नित्‍ तत्त्वे स्वीक्रियन्ते । ताभ्यामेव द्वाभ्यां तत्त्वाभ्यां सम्पूर्णमेतज्जगत्प्रपञ्च माविर्भवति । तत्राऽपि प्रकृतिरेव प्रसवधर्मिणीति मन्यते । पुरुषस् असङ्गः साक्षी एव । तथापि—

वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य ।
पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिरज्ञस्य ॥

इति न्यायात् स्वभाववशादेव प्रकृतिः आत्मानं पुरुषाय दर्श यति । तत्क्षणमेव सत्त्वरजस्तमोगुणानां वैषम्यं जायते । प्रकृत्यात्मस्व रूपाणां गुणानां तद्वैषम्यमेव सृष्टिकार्यं प्रारम्भयति । तदा एव—

प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद्गणश्च षोडशकः ।
तस्मादपि षोडशकात्पञ्चभ्यः पञ्चभूतानि ॥

प्रकृतेर्गुणवैषम्यात् प्रथमं महत्तत्त्वं जायते, तस्माद्महत्तत्त्वा दहङ्कारः, अहङ्कारात् पञ्चतन्मात्राण्येकादशेन्द्रियाणि च, तेभ्योऽ पञ्चतन्मात्रेभ्य पञ्चमहाभूतानि जायन्ते इति कारिकार्थः ।

अत्र गुणवैषम्यादिति वचने सत्त्वरजस्तमोगुणानां गौणप्रधान भावं न्यूनाधिकभावं वा बोध्यते । तदनुसारमेव महान् कुत्रचित् सत्त्व प्रधानं कुत्रचित्तमः प्रधानं कुत्रचिच्च रजःप्रधानं जायते । तत्राऽ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

रजस उपष्टम्भकमात्रत्वात् महान् मुख्यतः सात्त्विकं तामसञ्चेति द्विविधमेवोच्यते । यदुक्तम्—

अध्यवसायो बुद्धिर्धर्मो ज्ञानं वैराग ऐश्वर्यंश्च ।
सात्विकमेतद्रूपं तामसस्तस्माद्विपर्यस्तम् ॥

एतया कारिकया महतः (बुद्धेः) धर्माणि स्पष्टमेवोक्तानि न किञ्चिदत्र व्याख्येयम् । तस्मान्महत्तत्त्वाज्जातोऽहङ्कारोऽपि सत्त्वरजस्तमोगुणानां न्यूनाधिक्यात्त्रिविधः सन्नपि प्रधानतया पूर्ववद्द्विविधमेवोच्यते । तत्र रजोगुणसाहाय्यात् सात्त्विकाहङ्कारात् एकादशेन्द्रियम्, तत्रैव रजःसाहाय्यात्तामसादहङ्कारात् पञ्चतन्मात्राणि उत्पद्यन्ते । अत एव इन्द्रियाणां सत्त्वप्राधान्यं तन्मात्राणाञ्च तमः प्राधान्यं दृश्यते ।

तन्मात्राणि शब्द-स्पर्श-रूप-रस-गन्धानि क्रमशः पञ्चमहाभूतानि आकाश-वायु-तेज-जल-पृथिव्यानि उत्पादयन्ति । तमःप्रधाना एव ते सर्वे कारणगुणात्मकत्वात् । त एव प्रधानतो विषया अस्मिन् प्रपञ्चे । अनेन क्रमेणैव ते आकाशादयः शब्दादिद्वारा प्रत्यक्षतामायान्ति ।

एकादशेष्विन्द्रियेषु चक्षु-श्रोत्र-घ्राण-रसन-त्वगित्यभिधेयानि पञ्च ज्ञानेन्द्रियाणि इति कथ्यन्ते ज्ञानकरणत्वात् । ते क्रमशः रूपशब्दगन्धरसस्पर्शान् गृह्णन्तः तेजः-ख-पृथ्वी-जल-वायून् विषयीकुर्वन्ति । इतराणि पञ्चकर्मेन्द्रिणि-वाक्-पाणिपाद-पायूपस्थानि वचनादानविहरणोत्सर्गानन्दांश्च कुर्वन्ति । ज्ञान-कर्मेन्द्रियात्मकम् एकादशममिन्द्रियं मनः सङ्कल्पविकल्पं कृत्वा विषयान् अहङ्कारायप्रयच्छति ।

तत्सर्वमुक्तं सांख्यकारिकायाम्—

अभिमानोऽहङ्कारस्तस्माद्द्विविधः प्रवर्तते सर्गः ।
एकादशकश्च गणस्तन्मात्रपञ्चकञ्चैव ॥
सात्त्विक एकादशकः प्रवर्तते वैकृतादहङ्कारात् ।
भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम् ॥
बुद्धीन्द्रियाणि चक्षुःश्रोत्र-घ्राण-रसन-त्वगाख्यानि ।
वाक्-पाणि-पाद-पायूपस्थानि कर्मेन्द्रियाण्याहुः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

उभयात्मकमत्र मनः सङ्कल्पकमिन्द्रियञ्च साधर्म्यात् ।
गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च ॥
शब्दादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः ।
वचनादानविहरणोत्सर्गाश्च पञ्चानाम् ॥ इति ।



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रश्नः (१०)—मनसो लक्षणं दर्शयता तस्य ज्ञानेन्द्रियत्वं कर्मेन्द्रियत्वमुभयात्मकत्वं वेति सांख्यसम्मतं सिद्धान्तं प्रतिपादयत। (सम्पू० सं० वि० वि० १९७९)

उत्तरम्—सांख्यशास्त्रे त्रयोदशविधानि करणानि तत्र बुद्ध्यहङ्कारमनांसि इति त्रिविधानि अन्तःकरणानि, पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणीति दशविधानि बाह्यकरणानि। तत्र दशविधानां बाह्यकरणानाम् इन्द्रियत्वन्तु सर्वैरेव स्वीकृतम्। परन्तु अन्तःकरणानां मध्ये मनसः इन्द्रियत्वं कुत्रचित् स्वीकृतं कुत्रचिच्च न। अत एवात्र सांख्यमतं स्पष्टतः दर्शितं सांख्यकारिकायाम्। तद्यथा—

उभयात्मकमत्र मनः सङ्कल्पकमिन्द्रियं च साधर्म्यात्।

अस्यार्थः—अत्र=एकादशेन्द्रियाणां मध्ये, मनः=तदभिधेयं, सङ्कल्पकम्=इदमेवं, इदंनैवमित्येवंविधान् करोतीति सङ्कल्पकम्, उभयात्मकम् इन्द्रियम्=ज्ञानकर्मोभयात्मकम् इन्द्रियम्। तथा च, इन्द्रियम् कस्मात्? साधर्म्यात्=सात्त्विकाहङ्कारोत्पन्नत्वं साधारणधर्मत्वं तस्मात्।

तत्र प्रथमं मनसो लक्षणमेवोच्यते—'सङ्कल्पकं मनः' इति। अर्थात् "सङ्कल्पमात्रवृत्तित्वं मनस्त्वम्"। 'लक्ष्यमात्रवृत्तित्वे सति तदितरावृत्तित्वं लक्षणत्वम्' इति नियमात्। सङ्कल्पकत्वं मनोमात्रवृत्तित्वम्।

तथाहि 'इदमेवम्' 'इदं नैवम्' इत्यादिप्रकारेण सम्यक् कल्पयति विशेषणविशेष्यभावेन विचारयतीति लक्षणार्थः। इन्द्रियाणि विषयाणामाकारं गृहीत्वा मनसे प्रयच्छन्ति। मनस्तत्र सङ्कल्पयति। यथा हि—कञ्चिन्मृदात्मकं मध्येशून्यं वस्तुरूपं दृष्ट्वा चक्षुरिन्द्रियं निर्विकल्पकम् (नामजात्यादियोजनारहितं) आकारं मनसे प्रयच्छन्ति मनस्तत्र "अयं घटः घटत्ववत्त्वात्" इति सङ्कल्पयति। एतदेव सङ्कल्पनं मनसो लक्षणत्वं याति।

इति मनसो लक्षणमुक्त्वा तस्येन्द्रियत्वं दर्शयति— इन्द्रियं साध-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

र्म्यादिति। तथा हि सात्त्विकाहङ्कारोत्पन्नमिन्द्रियम्। इति इन्द्रियं त सामान्यलक्षणम्। तथा च मन अपि सात्त्विकाहङ्कारोत्पन्नः अत एव म तस्येन्द्रियत्वं सिद्धम्। अत्रानुमाप्रक्रिया कथ्यते—मन इन्द्रियं सात्त्विकाश हङ्कारोत्पन्नत्वात्। यद्यत् सात्त्विकाहङ्कारोत्पन्नं तत्तदिन्द्रियम्—यथा चक्षुः। यन्नेन्द्रियम् तन्न सात्त्विकाहङ्कारोत्पन्नं यथा पृथ्वी। मनः सात्त्विकाहङ्कारोत्पन्नः, अतः मनः इन्द्रियम्।

ननु, मनसः नेन्द्रित्वं, विषयैः साक्षात्सम्बन्धाभावात्। इति चे न। सुखाद्युपलब्धिसाधनत्वात्। नहि विषयैः साक्षात्सम्बन्धमेवेन्द्रि यलक्षणम्, इति च। न च सुखादीनामुपलब्धिः अनुमानादिभिः, कल्पन नीया प्रत्यक्षसिद्धत्वात्, प्रसिद्धप्रस्थानव्यतिरेकात्, कल्पनागौरवाच्च। अतो मनस इन्द्रियत्वं निर्विरोधसिद्धमेव।

तत्र च इन्द्रियाणि द्विविधानि—ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च। तथा च वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाणि। चक्षुःश्रोत्ररसन घ्राणत्वगाख्यानि ज्ञानेन्द्रियाणि। नात्र मनः गण्यते, अत एभिर्भिन्नं किमात्मकं (कथम्भूतं वा) मनस इन्द्रियत्वं इति चेत्, उच्यते। हि इन्द्रियाणि द्विविधान्येव, तृतीयप्रकारकतत्त्वस्य सत्त्वात्' तन्न मनः तृतीयप्रकारकं ज्ञानकर्मोभयात्मकम् इन्द्रियम्। उभयविधानां ज्ञान कर्मेन्द्रियाणां समानरूपेण कार्यसाधने सहायकत्वात्। यथोक्तम्—

उभयात्मकमत्र मनः। इति।

प्रश्नः (११)—किमात्मकं भौतिकसर्गम्? कतिविधश्च तत् का च भौतिकसर्गकल्पनाया आवश्यकता? इति व्याख्यायताम्।

उत्तरम्—तामसादहङ्कारात् तन्मात्रसर्गस्यारम्भः कल्प्यते तन्म शब्द-स्पर्शरूप-रस-गन्धात्मकः सन् पञ्चमहाभूतानां कारणत्वं गच्छति ततो क्रमशः—आकाश-वायु-तेज-जल-पृथ्व्यः जायन्ते। तेभ्यः सम्मि लितेभ्यः चराचरशरीराणि जायन्ते। तदेव भौतिकं सर्गमिति कथ्यते तच्च विस्तरेण वक्ष्यते।

भौतिकसर्गकल्पनाया हेतुरपि पुरुषार्थ एव। पुरुषस्य भोगसिद्ध

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

र्थं तस्यावश्यकत्वात् । भोगस्तु विषयायतनादिसापेक्षः, तद्विनानुपभमानधर्मत्वात् । यत्र यत्र भोगः तत्र तत्र भोक्ता-भोग्ययोः सत्त्वम् वश्यम्भवितव्यम् । अत एव पुरुषस्य भोगसिद्ध्यर्थं भोक्तुः (पुरुषस्य गसाधनभूतस्य वा) बुद्धितत्त्वस्य भोग्यभूततत्त्वस्य पञ्चमात्रादिततस्य चावश्यकता भवति । अत एवोक्तम्—

> न विना भावैर्लिङ्गं, न विना लिङ्गं र्भावनिर्वृत्तिः ।
> लिङ्गाख्यो भावाख्यस्तस्माद्द्विविधः प्रवर्तते सर्गः ॥

अत्र लिङ्गमित्यनेन तन्मात्रसर्गं भावैः इत्यनेन प्रत्ययसर्गमुक्तम् । लन्तु स्पष्टमेव । तथा चोक्तम् ;

> चित्रं यथाश्रयमृते स्थाण्वादिभ्यो विना यथा छाया ।
> तद्वद्विनाविशेषैर्न तिष्ठति निराश्रयं लिङ्गम् ॥

इत्यनेन च लिङ्गशरीरस्य स्थित्यै अपि भूतसर्गस्यावश्यकता । ति ज्ञातव्यम् । अत्र अन्योऽन्याश्रयं न दोषावहं सर्गकार्यसाधकत्वात् जाङ्कुरवत् ।

तदेतत् भौतिकसर्गं दैव-तिर्यङ्-मानुषभेदेन त्रिविधं भवति । न्ये तु चराचरभेदेन द्विविधं, तत्रापि चरतत्त्वं जरायुजाण्डजस्वेदद्भिज्जभेदेन चतुर्विधमिति कथयन्ति । तत्र अचरं स्थावरं— क्ष्यादिः मृत्पाषाणादिश्च; चरं जङ्गमं-मनुष्यपश्वादिरूपम्, अण्डजं— क्षादिकं स्वेदजानि यूकालाक्षादीनि उद्भिज्जानि कृमिवृक्षादीनि ति भेदः ।

दैव-मानुषतैर्यग्भेदेषु दैवसृष्टिरष्टविधा-ब्राह्म-प्राजापत्य-ऐन्द्र-त्र-गन्धर्व-याक्ष-राक्षस-पैशाच-भेदेन, मानुषसृष्टिः एकविधैव, तिर्यक्-र्गश्च पञ्चविधः—पशु-मृग-पक्षी-सरीसृप-स्थावर-भेदेन । तत्र पशुमृगोर्भेदम् उच्यते—पशवः सखुरचतुष्पदाः, ग्राम्याः पेशवो वा, मृगानि— खुरानि विविधपदानि, आरण्यकानि वेति भेदः । एतदेवोक्तं सांख्य-कारिकायाम्—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अष्टविकल्पो दैवस्तैर्यग्योनश्च पञ्चधा भवति ।
मानुषश्चैकविधः समासतो भौतिकः सर्गः ॥

इति सर्वं स्पष्टमेव । अन्यदप्युक्तं तत्रैव—

ऊर्ध्वं सत्त्वविशालस्तमोविशालश्च मूलतः सर्गः ।
मध्ये रजोविशालो ब्रह्मादिस्तम्बपर्यन्तः ॥

सत्त्वगुणप्राधान्यत्वात् दैवसृष्ट्यन्तर्भूता ब्राह्मप्राजाप भूलोकादुपर्युपरि सन्तिष्ठन्ते, सत्त्वप्राधान्यादेव ते लघवः प्रका श्च भवन्ति, अत एव सर्वत्रगतिवन्तश्च । तैर्यङ्सृष्ट्यन्तर्भूता प स्थावरादयः सरीसृपादयो वा भूलोकादधोगमनप्रवृत्तिशालिनः अ निवासिनो वा, गुरवः तमोमयाश्च भवन्ति । भूलोकवासिनः र रजोबाहुल्यात् तिर्यग्गमनप्रवृत्तिशालिनः गतिमन्तः प्रेरकाश्च भ सर्वमुपपन्नम् ॥

प्रश्नः (१२)—अचेतनायाः प्रकृतेः कथं पुरुषस्य भोग सिद्ध्यर्थं प्रवृत्तिः भवतीति सदृष्टान्तं स्पष्टीकुरुत ।

उत्तरम्—प्रकृतिकृतः एतत् स्थूलसूक्ष्मात्मकं महदादिम पर्यन्तम् प्रपञ्चजातं पुरुषस्य भोगापवर्गायैव सम्भवति इति सम्मतं सिद्धान्तम् । यतो हि महदादिमहाभूतपर्यन्तस्य भोग्यत्वा भोक्तुरपेक्षा जायते, तथा च पुरुषस्य चेतनत्वात् तस्यै भोग्या एवं सति प्रकृते कर्तृत्वं पुरुषायैव सम्भवति ।

ननु अचेतनाया प्रवृत्तिः कथं परार्थं सम्भवति इति चेत् न्तेन उच्यते—

वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य ।
पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य ॥

अचेतनमपि परार्थं प्रवर्तते । यथा हि वत्सस्य स्वरूपम कता वाऽज्ञानन् क्षीरम् (अचेतनमपि) वत्सविवृद्ध्यर्थं क्षरण तेते । तथैव पुरुषार्थं सम्पादयितुं प्रकृतिः प्रवर्तते ।

नैतत्तथा इति पूर्वपक्षः । स्तन्यक्षरणे ईश्वरः प्रवर्तकः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वृत्तिः तत्र चेतनकर्तृत्वम्, देवदत्तप्रवृत्तिवत् । न हि देवदत्तं बुभुक्षितं प्रति वह्निः स्वयं तण्डूलान् पचति । एवं प्रकृतिः यदि पुरुषस्य भोगापवर्गान् सम्पादयितुं प्रवर्तते तर्हि तत्र चेतनेनेश्वरेण कारणं भवितव्यम् ।

न इति वृद्धाः । अनपेक्षितत्वात् । प्रकृतेस्त्वेतत् स्वभाव एव यत् पुरुषाय प्रवर्तते । न हीश्वरस्यात्र कारणत्वमुपपद्यते । यत्र यत्र चेतनप्रवृत्तिः तत्र तत्र स्वार्थं करुणा वा प्रेरकत्वेन तिष्ठति । देवदत्तप्रवृत्तिरपि स्वार्थाय करुणया वा । न ह्यत्र ईश्वरस्य किञ्चित् स्वार्थं कल्प्यते आप्तकामत्वात् । न च करुणात्र प्रयोजिका । सृष्टेः पूर्वं दुःखाभावात् लब्धजन्मनां दुःखनिवारणायेति चेत्, तदपि न युज्यते । कारुण्येन सृष्टिः सृष्ट्या कारुण्यं वेति चक्रकं दोषः । न कारुण्येन सृष्टिः, सृष्टेः पूर्वं करुणाया कारणाभावात् । न च सृष्ट्या कारुण्यं तथा सति, न हि कुत्रचित् कश्चित् दुःखी स्यात् । कर्मफलमिति चेत् तथापि अनपेक्षितमीश्वरस्य सत्त्वम् । तथा च यदीश्वरः करुणया सृष्टिकार्ये प्रवर्तते तर्हि सर्वान् एव सुखिनः सृजेत् न तु सुखदुःखमोहात्मकान् इति ईश्वरस्य प्रवृत्तिः नोपद्यते ।

एवं प्रकृतेः स्वयं प्रवृत्तिः पुरुषस्य भोगापवर्गार्थं सम्पद्यते । यदुक्तं "वत्सविवृद्धिनिमित्तम्" इति ।

तत्र प्रकृतेः नास्ति किञ्चित्स्वार्थं तथापि यथा लोकः स्वार्थसम्पादनाय तथा प्रकृतिः परार्थं सृष्टिकार्ये प्रवर्तते । चेतनानां प्रवृत्तिस्तु स्वार्थं करुणया वा भवति न तथा अचेतनानाम् इति लोकमुदाहर्तुं प्रोक्तं "स्वार्थ इव परार्थ आरम्भः ।" इति । स्वार्थमुदाहरति—

औत्सुक्यनिवृत्त्यर्थं यथा क्रियासु प्रवर्तते लोकः ।
पुरुषस्य विमोक्षार्थं प्रवर्तते तद्वदव्यक्तम् ॥ इति ।

स्पष्टमेवार्थः । अव्यक्तं प्रकृतिरित्यर्थः ।

ननु प्रकृतेः अचेतनत्वात् प्रवृत्तिधर्मित्वाच्च न कदाचिदपवर्गः सम्भवेत् इति चेत् तदपि न युक्तम्—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात् ।
पुरुषस्य तथाऽऽत्मानं प्रकाश्य विनिवर्तते प्रकृतिः ।।

विवेकज्ञानात् प्रकृतिपुरुषयोः पृथक्-पृथक् ज्ञानात् प्रकृतिदर्श मिति सांख्यसम्मतम् ।

प्रश्नः (१३)—सर्वथा निर्लिप्तस्य प्रवृत्तिरहितस्य पुरुषस्य क बन्धः प्रतीयते इति सविस्तरं निरूपयत ।

उत्तरम्—बाह्यकरणैः प्रागभिहितान् विषयान् क्रमशो बुद्धि गृह्णाति । तदेव त्रिगुणात्मकत्वात् सुखदुःखाननुभवति सति तथा पुरु "अहं सुखी" "अहं दुःखी" "प्रवृत्तिवानहम्" इत्यादिकान् सुखदुःखा निरूपयन् आत्मानं सुखदुःखादिमन्तम् अवधारयति । तथापि न त यथार्थम् यथा हि रङ्गस्थाः सामाजिका तटस्था अपि सन्तः नाटकीय भावानां साधारणीकरणद्वारा तान् भावान् स्वकीयानिति अवधार यन्ति तथाऽत्रायं पुरुषोऽपि बुद्धिगतान् सुखदुःखादीन् धर्मान् स्वकीया निति गृह्णाति । यथा हि निर्मलमपि जलम् ह्रदे स्थितः सन् तद्गत काशप्रतिबिम्बेन आकाशवद् प्रतिभासते । तेन नीलं जलमिति व्यवहा भवति तथाऽत्रापि पुरुषो ज्ञानसुखादिमानिव प्रतिभाति ।

अस्यार्थः यद्यपि ज्ञानसुखादयो धर्मा बुद्धितत्त्ववर्तिन बुद्धयै भोग्या च भवन्ति तथापि बुद्धौ प्रतिबिम्बितः सन् पुरुषः बुद्धिधर्मा ज्ञानसुखादीन् स्वकीयानिव धारयति । यथोक्तं—"सोऽयं बुद्धितत्त्व वर्तिना ज्ञानसुखादिना तत्प्रतिबिम्बिततच्छायापत्त्या ज्ञानसुखादिमानि भवतीति चेतनोऽनुगृह्यते । चितिच्छायापत्त्याऽचेतनोऽपि बुद्धिश्चेतन वद्भवतीति ।" एवं बुद्धौ पुरुषस्य प्रतिबिम्बितत्वात् तत्प्रतिबिम्बमेनि स्वं स्वरूपमिति मन्यमानः पुरुषः बुद्धिगुणान् गृह्णाति अथवा बिम्ब तद्ग्राहकभावेन द्वयोरेव गुणाः परस्परं संसरन्ते । येन बुद्धिः आत्मान्त चेतनवद् अनुभवति पुरुषश्चात्मानं त्रिगुणात्मकमिवेति सारः । तेन बुद्धेः सुखदुःखादयः पुरुषस्यैव प्रतिभासन्ते । पुरुषश्च 'अहं सुखी', अ दुःखी' त्यादिकम् अनुभवति । तथा चाहं भोक्ता इत्यादिकं धारय

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एतन्ममभोग्यमिति तान् प्रति स्वमाकृष्टं मन्यते। एवमेव पुरुषस्य बन्धापवर्गौ अपि मन्तव्यौ।

बुद्धौ प्रतिबिम्बितत्वात् पुरुषः विषयान् स्वकीयानिव मन्यमानः आत्मानं विषयैः सम्बद्धयति अतोऽस्य बन्धो युज्यते। अतात्त्विकमपि तद्बन्धं तत्त्विकमिवाधिगच्छन् पुरुषः बद्धमिव मुक्तमिव वा प्रतिभासते इति।

प्रश्नः (१४)—प्रधानस्य प्रवृत्तिर्धर्मत्वे सति कथं पुरुषस्य मोक्षः सम्भवतीति स्पष्टीक्रियताम्।

उत्तरम्—प्रकृतिः प्रसवधर्मा, सत्त्वरजस्तमोगुणानां साम्यावस्थारूपा सती गुणक्षोभेन महदादीन् परिणमति। महदादयश्च प्रकृतिपरिणामाः प्रतिक्षणं परिणामिनः सन्तः तत्त्वान्तरं जनयन्ति। एवं स्थूलसूक्ष्मतत्त्वानां जननधर्मित्वात् पुरुषाय भोगान् सम्पादयन्तश्च कथं पुरुषस्य मोक्षः सम्भवतीति शङ्कयते।

तथाहि प्रकृतिः स्वभावादेव पुरुषार्थं भोगान् सम्पादयति, पुरुषश्च तान् भोगान् स्वकीयात् इति गृह्णाति। नात्र ईश्वरस्य कारणत्वं प्रेरकत्वं वोपपद्यते। एवं प्रकृतेर्नित्यपरिणामित्वात् न कदाचित् कदाचित् मोक्षस्य सम्भव इति विप्रतिपत्तिर्जायते। तस्य निराकरणायोक्तं सांख्यकारिकायाम्—

रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात्।
पुरुषस्य तथात्मानं प्रकाश्य विनिवर्तते प्रकृतिः॥ इति॥

अत्र नर्तकी दृष्टान्तरूपेण प्रस्तुता। यथा सा आत्मानं प्रकाश्य निवर्तते, एवमेव प्रकृतिं इति स्पष्टम्।

तथापि सूक्ष्मायाः प्रकृतेः प्रकाशनधर्मं न युज्यते। अतोऽत्र अर्थान्तरं ग्राह्यम्। न ह्यत्र स्वपरिणामानां प्रकाशनं ग्रहीतुं शक्यते। परिणामा अपि परिणामान्तरान् जनयन्ति इति प्रत्यक्षप्रमाणात् निवृत्तिस्तु असम्भव एव स्यात्। अत्र पुरुषात् स्वकीयं दर्शयित्वा ज्ञान द्वारा इति शेषः। एवम् अयमर्थो निष्पद्यते यदा मुमुक्षुः व्यक्ताव्यक्तज्ञानां पृथक्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानं गृह्णाति तदा सः इमे सुखदुःखादयो नास्माकम् अहं नित्यः चेत् इत्यादिकं च मत्वा तेभ्यो निरपेक्षो जायते । तदा प्रकृतिः तं प्र स्वयमेव निवृत्ता भवतीति भावः।

तथा सति निवृत्ता प्रकृतिः नर्तकीवद् पुनः औत्सुक्याद् प्र त्स्यति इति चेत्, न--

प्रकृतेः सुकुमारतरं न किञ्चिदस्तीति मे मतिर्भवति ।
या दृष्टास्मीति पुनर्न दर्शनमुपैति पुरुषस्य ॥ इ

अत्र च कामिन्या एव दृष्टान्तेन उदाहृतम् । दृष्टा--आ ज्ञानेन स्वरूपतो लब्धा, प्रकृतिः । तथा च विवेकेन, तस्या स्व ज्ञानेन सा पुनः न तस्ये भोगान् सम्पादयति न वा सुखदुःखादि पुनः आबध्नाति इति भावः । एवं विवेकज्ञानेन पुरुषस्य मुक्तिः प्र नस्य च तं प्रति निवृत्तिः उपपद्यते ।

प्रश्न (१५)—सांख्यशास्त्रे अपवर्गस्य किं स्वरूपम् ? जी न्मुक्तदशायां किमर्थः ? इति विवेच्यताम् ।

उत्तरम्—सुखदुःखमोहात्मकमेतज्जागतिकं भोगमात्रम् सत्व जस्तमोगुणात्मकत्वात् संसारस्य । तत्राऽपि दुःखानामेवाधिक्य केचित् । सुखदुःखमोहानां स्थानभेदान्न्यूनाधिकत्वमिति वृद्धाः । दुः मत्वमिति बौद्धाः ।

तत्र त्रिविधं दुःखम् आध्यात्मिकाधिभौतिकभेदात् । तेभ्य स्त्रिविधदुःखभ्यः पीडितो मानवः तन्निराशाय प्रवर्तते तस्माद् मुमुक्षत्वम् ।

सांख्यशास्त्रानुसारं दुःखत्रयनिराशाय या जिज्ञासा भवति च गुरुकृपया वेदशास्त्राद्यभ्यासेन प्रकृतिपुरुषयोः विवेकज्ञाना सम्यग्ज्ञानं भवति । तज्ज्ञानादेवापवर्गो लभ्यते ।

प्रकृतिपुरुषयोः विवेकज्ञानादेव सुखदुःखमोहान् प्रकृतिप्रद भोगान् वा अननुभवन् जीवः बन्धनाद् मुच्यते । सुखदुःखमोहाद सत्त्वादिगुणानां परिणामभूता प्रधानस्य धर्माः न तु पुरुषस्य इति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानादेव ज्ञायते । एवम्प्रकारकं विवेकज्ञानमेवापवर्गः । पुरुषस्तु नित्यः शुद्धो बुद्धश्चेतनः इति विवेकः ।

तत्रापवर्गश्च जीवन्मुक्तिविदेहमुक्तिभेदाद् द्विविधः । तत्र सम्यग्ज्ञानाधिगमादेव मुक्तत्वे सति यद् अवशिष्ट-आयुवशात् शरीरधारणं तत् सुखादीनामननुभवरूपत्वात् अनाशक्तिरूपत्वाच्च जीवन्मुक्त्वम् । यथा कुम्भकारचक्रस्य बाह्यशक्तिरूपयष्ट्यपसारणानन्तरमपि संस्कारवशात् भ्रमणम् अवलोक्यते तथैव अवशिष्टायुवशात् विवेकज्ञानानन्तरमपि शरीरधारणं तदेव जीवन्मुक्तिः । यदुक्तम्—

सम्यग्ज्ञानाधिगमाद् धर्मादीनामकारणप्राप्तौ ।
तिष्ठति संस्कारवशाच्चक्रभ्रमिवद्धृतशरीरः ॥

देहत्यागानन्तरं तदेव विवेकज्ञानिनः विदेहमुक्तिः ।

यद्यपि पुरुषो स्वभावादेव निर्लिप्तः तथापि बुद्धिप्रतिबिम्बितत्वात् बुद्धेः सुखादिधर्मान् स्वकीयानिव भ्रान्त्या सः बन्धनमनुभवति । विवेकज्ञानात् तस्यैव यथार्थबोधः अतो मोक्षोपलब्धिरिति सांख्या ।

प्रश्नः (१६)—पुरुषस्य बन्धमोक्षयोः कथमुपपत्तिः ? कथञ्चापवर्गप्राप्तिः ? किञ्च सांख्यशास्त्रे विवेकज्ञानमिति सविशदं व्याख्यायताम् ।

उत्तरम्—सत्त्वरजस्तमसां धर्मा इति सुखदुःखमोहाः चराचरस्यास्य व्यापिनो भवन्ति । ते च विषयैः सह गृहीत्वा बाह्यकरणैर्बुद्धयं उपायनीक्रियन्ते । बुद्धिरेव तत्र विमृश्य सुखदुःखमोहान् अनुभवति । तथापि बुद्धौ प्रतिबिम्बितः पुरुषस्तान् सुखदुःखमोहान् स्वकीयानिव अनुभूय 'अहं सुखी' 'अहं दुःखी' इत्याद्यात्मकां भ्रान्तिमूलकां धारणां कृत्वा आत्मानं बद्धमिव मन्यते । यथा निःश्वासवाष्पकलुषिते दर्पणे प्रतिबिम्बितं मुखमपि मलिनमिव प्रतीयते तथैव सुखदुःखाद्यनुभवेन सवासनात्मके बुद्धौ प्रतिबिम्बितः पुरुषः आत्मानं सुखादिमानिव मन्यते ।

संक्षेपतः बुद्धौ प्रतिबिम्बितः पुरुषः बुद्धिधर्मान् स्वकीयानिव,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तथा बुद्धिश्च पुरुषधर्मान् स्वकीयानिव मत्त्वा परस्परं धर्मसंस भ्रान्ति जनयन्ति । परन्तु न हि तद् यथार्थज्ञानम् । यथार्थतस्तु पु निर्लिप्त एव । तथापि अयथार्थज्ञानजन्या सा भ्रान्तिः यथा भासते । यथा हि दशधोच्चार्यमाणमसत्यमविवेकिनो बुद्धि भ्रम तथाप्यत्रापि बोद्धव्यम् ।

एवम् अत्र बुद्धिरेव बन्धमोक्षयोः कारणम् । यथा हि बुद्धि विवेकाविवेकयोरधिष्ठात्री । तत्र च बुद्धेः धर्मादयोऽष्टरूपाणि भव यथा—धर्माधर्मज्ञानवैराग्यैश्चर्यानैश्वर्यञ्च । तत्र ज्ञानवर्जसप्तभावै पुरुषाय भोगान् कल्पयति ज्ञानेन चापवर्गम् । तदुक्तम्—

रूपैः सप्तभिरेव तु बध्नात्यात्मानमात्मना प्रकृतिः ।
सैव च पुरुषार्थम्प्रति विमोचयत्येकरूपेण ॥

एवं ज्ञानेनापवर्गः, धर्माधर्माज्ञानवैराग्यावैराग्यैश्वर्यानैश्वर्य बन्धः इति सांख्यसम्मतम् ।

न हि ज्ञानस्यात्र कर्तृत्वं मोक्षस्य न तत्त्वान्तररूपत्वात् चापवर्गः कार्यम्, अनुभाव्यमेव तत्, ज्ञानेन तस्यानुभव एव भव यतो हि पुरुषः सुखदुःखमोहेभ्यः, जन्मादिभ्यश्च निर्लिप्त एव नि शुद्धः, बुद्धश्चेतनः, गुणत्रयविवर्जितश्च । तथापि बुद्धौ प्रतिबिम्बि त्वात् स बुद्धेः धर्माणि आत्मनि आरोपयति । ततश्च सुखदुःखादी भवति इति प्रागेवोक्तम् ।

तत्र च पुरुषस्य निर्लिप्तत्वात् सुखदुःखादिभ्योऽसङ्गत्व बन्धस्यातात्त्विकत्वमुपपन्नम् । यदुक्तम्—

तस्मान्न बध्यतेऽद्धा न मुच्यते नापि संसरति कश्चित् ।
संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः ॥

एवं सति पुरुषस्य बन्धमोक्षौ तु उपचारेणैवोपपद्यन्ते यथार्थः । एतत्तु विपर्ययज्ञानजं बुद्धौ सुखदुःखादिनो बोधात् पुरुषः मनुभवति न च स यथार्थतः बध्यते । सति एव 'पुरुषविमोक्ष इति कारिकाकारोक्तं नोपपद्यते इत्यपि न समीचीनम् । ज्ञा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रकृतिपुरुषयोः पृथक्-पृथक् बोध एव पुरुषस्य मोक्षः । एवं सति प्रकृतेर्धर्माः प्रकृतिं, पुरुषस्य च पुरुषमाश्रिता सन्तः यदा परस्परं न संसरन्ति । तदैव मोक्षमधिगच्छति पुरुषः इति ।

अर्थात् सम्यग्ज्ञानाधिगमात् प्रकृतिपुरुषयोः पृथक्-पृथक् प्रकाशनानन्तरं सुखादिभ्यः कामादिभ्यश्च निर्लिप्तः सन् मुमुक्षुः स्वात्मानं नित्यशुद्धबुद्धत्वेनावधारति । तच्च सम्यग् बोधः गुरुकृपया वेदशास्त्रादीनां सततमभ्यासवशाच्च भवति । सांख्यास्त्वत्र ईश्वरस्य तदनुकम्पायाश्च कारणाकारणत्वे मौनमेवावलम्बन्ते । अतो, मोक्षो जिज्ञासा, गुरुकृपा, वेदादीनामध्ययनं (सच्छास्त्राभ्यासोवा), च मिलित्वा कारणतां यान्ति । एवं भूतैः कारणैः अधिगतः अधिगतः अपवर्गः अहं-ममादिवासनाविरहितः भवति —

एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम् ।
अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम् ॥ इति ।

अविपर्ययात्=प्रकृतिपुरुषयोर्धर्माणां पृथक्पृथगभासात् यतो हि, विपर्ययज्ञानादेव संसारः, तस्यैव निराशात् सम्यग् ज्ञानाधिगमः । केवलम्=संशयविपर्ययभ्रान्तिभ्यामसम्मिलितम् । तथा च नास्मि (क्रियावान्, कामादिमानितिवा), न मे=सत्सम्बन्धिनः एते विषयाः भोगा वा, नाहम् (कर्ता भोक्ता वा) इत्याकारकः सम्यग्बोधः, एवं भूतस्य बोधस्य धारणा च मोक्षमधिगमयति पुरुषम् ।

एवं ज्ञाने प्राप्ते सति पुरुषः प्रकृतिं तस्य धर्मान् च तटस्थत्वेन पश्यति ।

तेन निवृत्तप्रसवामर्थवशात् सप्तरूपविनिवृत्ताम् ।
प्रकृतिं पश्यति पुरुषः प्रेक्षकवदवस्थितः स्वच्छः ॥

सप्तरूपविनिवृत्ताम्=केवलज्ञानात्मिकाम्, धर्माधर्माज्ञानवैराग्यावैराग्यैश्वर्यानैश्वर्यरूपविरहिताम् । प्रेक्षकवत्=नाहं कर्ता नाहञ्च भोक्ता इत्याद्यात्मकम् इत्यर्थः ।

तथापि 'तत्संयोगकृतः सर्गः' इति वचनेन सर्गस्तु भवत्येव ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यतो हि पुरुषस्य भोक्तृत्वयोग्यता प्रकृतेश्च भोग्यात्वयोग्यता तु न नश्येत् तत्कारणाभावात् इति संयोगस्त्र नित्यत्वं तेन च सर्गस्य नित्यत्वम्, अतो मोक्षस्य असम्भाविता उपपद्यते इति शङ्क्यते । तन्निवारणायैयोक्तम्—

दृष्टा मयेत्युपेक्षक एको दृष्टाहमित्युपरमत्यन्या ।
सति संयोगेऽपि तयोः प्रयोजनन्नास्ति सर्गस्य ।। इति ।

सर्वं स्पष्टमेव । यथा तु प्रथममेवोक्तं कारिकारेण 'प्रकृते सुकुमारतरं न किञ्चिदस्ति' इत्यादिः । एवं सति संयोगेऽपि परस्पर निरपेक्षत्वात् न पुनः सर्वारम्भः । एवंच जीवन्मुक्तत्वेऽपि आयुषोव शिष्टत्वात् यज्जीवति तत्त जीवन्मुक्तिरेव । देहत्यागान्तरं तु विदेह मुक्तिः । एवं च दुःखत्रयनिराशः ऐकान्तिकमात्यन्तिकञ्च भवति ।।

प्रश्नः (१७) सांख्यशास्त्र दृष्ट्या बुद्धि तत्वं निरूप्यताम् ?

उत्तरम्—सर्वं प्रत्युपभोगं यस्मात् साधयति बुद्धिः ।
सैव च विशिनष्टि पुनः प्रधानपुरुषान्तरं सूक्ष्मम् ।।

यस्मात्—यस्माद्धेतोः बुद्धिः बुद्धितत्त्वमेव पुरुषस्य चेतनस्य सर्व प्रति यावच्छब्दादीन विषयान् प्रति उपभोगं सुख-दुःख-शब्द-स्पर्श-रूप रस-गन्धाद्यात्मकं उपभोगं साधयति, सम्पादयति, न तु मनोऽहंकार पुरुषस्य भोगं साधयतः । तस्मात् करणानि बुद्धावेव प्रयच्छन्ति । सैव बुद्धिरेव च । पुनः पश्चात् उपभोगप्रापणोत्तरं सूक्ष्मं दुरधिगमं प्रधान पुरुषान्तरं प्रधानपुरुषयोर्भेदं विशिनष्टि सत्त्वरजस्तमसां साम्यावस्था त्मकं प्रधानमन्यत्, बुद्धिरन्या, पञ्चतन्मात्राणि एकादशेन्द्रियाणि पञ्च महाभूतानि च भिन्नानि, एभ्यो व्यतिरिक्तः पुरुषोऽन्यं इत्याकार सत्त्वपुरुषान्यतासाक्षात्कारं बोधयति । यथा लोके साक्षाद् राजका सम्पादकत्वेन कर्मचारिषु मन्त्री प्रधानो भवति । अन्ये राजकर्मचारि तं प्रति तदुपकारकत्वेन अप्रधाना भवन्ति, तद्वत् पुरुषस्य सर्वविषयो भोगसम्पादकत्वेन विवेकज्ञानोद्बोधकत्वेन च मनोऽहङ्कारापेक्षया बु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रधाना। मनोहङ्कारादयोऽप्रधाना इति न काप्यनुपपत्तिः।

यथा सर्वेषां भृत्यानामुपलब्धिं विधाय मन्त्री राजनि निवेदयति एवं कर्मेन्द्रियाणि विषयान् प्रकाश्य बुद्धौ प्रयच्छन्ति, बुद्धिरपि पुरुषाय समर्पयति। यावद् ज्ञानं नोत्पद्यते तावद्बुद्धिरभ्युदयफलेन पुरुषं योजयति। बुद्धिप्रेरिता एव मनोहङ्कारज्ञानेन्द्रियकर्मेन्द्रियादयः विषयान् न च बुद्धयर्थं, किन्तु पुरुषार्थमेव साधयन्ति।

प्रश्नः (१८)—सूक्ष्म शरीरं सांख्यशास्त्रे कीदृग्विधं स्वीकृतम् इति व्याख्याय, तस्य संसरण प्रक्रियाञ्च निर्दिश्यताम्—

उत्तरम्—पूर्वोत्पन्नमसक्तं नियतं महदादिसूक्ष्मपर्यन्तम्।
संसरति निरुपभोगं भावैरधिवासितं लिङ्गम्॥

पूर्वोत्पन्नम् आदिसर्गे प्रधानादाविर्भूतम्। असक्तं न ... क्तमसक्तं ... देवमानुष-तिर्यक्षु सूक्ष्मत्वादव्याहतम्। नियतं ... पद्यते ... तावत्संसरणशीलम्। महदादिसूक्ष्मपर्यन्... न्मात्रपर्यन्तम्। भावैः भवन्ति ... न्तीति भावाः तैः भावैः ... अधिवासितम् ... सितं ...

... धावन्न ... महदहङ्कारैक ... संसार एभ्य इति भावाः ... धर्माधर्मज्ञानाज्ञानवैराग्यावैराग्यैश्व ... उपरञ्जितम् यथा सुरभिचम्पकसुमनसम्पर्क ... वासितं तथा बुद्धिधर्मैः भावैः सूक्ष्मशरीरमपि समन्वि... निरुपभोगं सुखदुःखादिभोगरहितम्। लिङ्गम् लयं गच्छतीति ... मोक्षावधिकं लिङ्गशरीरं संसरति पशुपक्षिमनुष्यादिषु नव ... कौशिकं स्थूलं शरीरं भोगार्थमुपादत्ते पूर्वं पूर्वं च जहाति।

ननु सूक्ष्मशरीरेणैव पुरुषस्य भोगासद्भावे षाट्कौ ... शरीरस्वीकारो ...

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ननु एकादशेन्द्रियाहङ्कारसहिता बुद्धिरेव स्थूलशरीरसंयोग-वियोगौ करोतीत्यभ्युपगम्यताम् अलमप्रामाणिकसूक्ष्मशरीरकल्पनयेत्याह—

चित्रं यथाऽऽश्रयमृते स्थाण्वादिभ्यो विना यथाच्छाया ।
तद्वद्विनाऽविशेषैर्न तिष्ठति निराश्रयं लिङ्गम् ॥

यथा येन प्रकारेण चित्रं मूर्त्यादिलेखनम् । आश्रयं कुड्यपटाद्याश्रयम् ऋते विना न तिष्ठति । छाया यथा वा प्रतिबिम्बं स्थाण्वादिभ्यः वृक्षकीलकादिभ्यो विना न स्थितिपदं लभते । तद्वत् तथा लिङ्गम् लिङ्गयति प्रधानं ज्ञापयतीति लिङ्गम् बुद्ध्यादि त्रयोदशविधम् करणम् विशेषैः सूक्ष्मशरीरं विना निराश्रय आश्रयरहितं न तिष्ठति न स्थातुमर्हति । आश्रयं विनाऽऽश्रयिणा स्थितेरसंभवात् सूक्ष्मशरीरसत्यावश्यकंक कल्प्यते । अत एव महाभारते वनपर्वणि सावित्र्युपाख्याते भगवतो व्यासदेवस्य—

ततः सत्यवतः कायात् पाशबद्धं वशं गतम् ।
अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष बलाद् यमः ॥

इति वचनं संगच्छते । तथा चानेकेषु योनिषु भुज्यमानस्य भोगादेः स्थूलशरीरेण संबन्धाभावात् साङ्ख्यैरिन्द्रियनिराश्रयाया बुद्धेः संसरणासम्भवेन सूक्ष्मशरीरं कल्पनीयमेव । यथा शैत्यं विना आपो न भवन्ति, उष्णं विना वह्निः, स्पर्शः विना वायुः, गन्धं बिना पृथिवी न तिष्ठति, तथा सूक्ष्मशरीरं बिना बुद्ध्यादिकं न स्थातुमर्हतीति भावः ।

एवं सूक्ष्मशरीरस्यास्तित्वमुपलभ्य यथा संसरति येन हेतुना नानायोनिषु संसरति, तदुभयमाह—

पुरुषार्थहेतुकमिदं निमित्तनैमित्तिकप्रसङ्गेन ।
प्रकृतेर्विभुत्वयोगान्नटवद् व्यवतिष्ठते लिङ्गम् ॥

पुरुषार्थहेतुकं पुरुषार्थः भोगापवर्गात्मको हेतुः निमित्तं यस्य तत् पुरुषार्थहेतुकं पुरुषार्थफलकम् इदं लिङ्गं बुद्ध्यादितन्मात्रैः कल्पितं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सूक्ष्मं शरीरं निमित्तनैमित्तिकप्रङ्गेन निमित्ता नानाशरीरहेतुभूता धर्माधर्माद्यष्टभावाः नैमित्तिकाः धर्मादिकरणका षाट्कौशिकनानाविध-स्थूलदेहादयः तेषां प्रङ्गेन धर्माधर्मादिनिमित्तकनानाशरीरधारणव्यापारेण । प्रकृतेः प्रधानस्य विभुत्वयोगाद् व्यापकत्वाद् जगत्कर्तृत्व-सम्बन्धाद्वा । तटवत् नट इव व्यवतिष्ठते । यथैक एव नटः समयानुकूलां वेशरचनां विधाय विविधानि रूपाणि गृहीत्वा यवनिकातो निर्गत्य क्वचिद्रामः, क्वचन युधिष्ठरः, कुत्रचिच्च हरिश्चन्द्रो भूत्वा तेषां कर्म करोति, तथैव सूक्ष्मं शरीरं मातुरुदरं प्रविश्य धर्मादिहेतुकनानास्थूलशरीरपरिग्रहपूर्वकं कदाचित् मनुष्यः, कदाचित्-पशुः, वनस्पतिर्वा भवन् मोक्षपर्यन्तं संसरति । यावन्नाधिकारसमाप्तिः तावत्तु स्वकारणस्य मूलप्रकृतेः सर्वत्र सत्त्वस्वीकारात् विभुत्वकरणतादात्म्यमुपपद्यते । तथा चोक्तं 'देवी भागवते—वैश्वरूप्यात्प्रधानस्य परिणामोऽयमद्भुतः ।'

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीः ॥

व्याख्यात्मकोभाग

श्लोक-व्याख्या

★

दुःखत्रयाभिघातात् जिज्ञासा तदपघातके हेतौ ।
दृष्टे साऽपार्था चेन्नैकान्तात्यन्ततोऽभावात् ॥ १ ॥

अन्वयः—दुःखत्रयाभिघातात्, तदपघातके, हेतौ, जिज्ञासा, (भवति) दृष्टे, सा, अपार्था, चेत् ? न, एकान्तात्यन्ततोऽभावात् ॥

दुःखत्रयाभिघातात् दुखं तावत् त्रिविधम्—आध्यात्मिकम् आधिभौतिकम् आधिदैविकञ्च । तत्रात्मानमधिकृत्य जायमानं दुःखमाध्यात्मिकम्, तद् द्विविधम्—शारीरं मानसं च । शारीरं च । शारीरं दुःखं वातपित्तकफादीनां वैषम्यादुत्पन्नं ज्वरातिसारादिकम्, प्रियवियोगाप्रियजनसंयोगजन्यं च मानसम् । भूतानि प्राणिनोऽधिकृत्य जायमानं मनुष्यपशुपक्षिदंशमशकमत्कुणमकरसर्पादिसमुद्भवमाधिभौतिकम् देवनधिकृत्य जायमानमाधिदैविकं देवदानवयक्षराक्षसभूतप्रेतपिशाचग्रहाद्यावेशनिबन्धनम् । दुःखानां त्रयं दुःखत्रयं तेन अभिघातो दुःखत्रयाभिघातः, तस्माद् दुःखत्रयाभिघातात् त्रिविधिदुखस्यासह्यसम्बन्धात् । तदपघातके तस्य अपघातः तदपघातः, स एव तदपघातकस्तस्मिन् तदपघातके, प्रकृति पुरुषविवेकद्वारा दुःखत्रयोच्छेदके हेतौ कारणे जिज्ञासा ज्ञातुमिच्छा, मुमुक्षुजनस्य भवतीति शेषः ।

KirtiKant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अस्तु तावद् दुःखम्, स्याच्च तज्जिहासितम्, भवतु च तदुन्मूलयितु सांख्यशास्त्रीयतत्त्वज्ञानात्मकोपायः समर्थः, तथापि अनेकजन्माभ्याससाध्यमतिदुष्करं तत्त्वज्ञानं भवतीति अतिकठिने शास्त्रविषये बुद्धिमतां जिज्ञासा न युक्ता। तथा चास्ति जन श्रुतिः—

अक्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्।
इष्टस्यार्थस्य संसिद्धौ को विद्वान् यत्नमाचरेत्॥

किं च शारीरस्य दुःखस्य रसायनादिसेवनात्, मानसस्य सन्तापस्य मनोज्ञस्त्रीसम्पर्कपानभोजनविलेपनवस्त्रालङ्काराद्युपचारात्, आधिभौतिकस्य "दंष्ट्रिणः शृङ्गिणश्च दूरतः परिवर्ज्याः" 'नादण्डो बहिर्गच्छेत्' इत्यादि वार्हस्पत्यकामन्दकीयचाणक्यादिनीतिशास्त्राद्यभ्यासात्।

दोषोपसर्गप्रभवाश्च ये ते नोपद्रवास्तं समभिद्रवन्ति।
गुणैः समुख्यैः सकलैरुपेतं यः पद्मरागं प्रयतो बिभर्ति॥
कृष्णामरीचिसिन्. त्थमधुगारोचनाकृतम्।
अञ्जनं सर्वदेवादिकृतोन्मादहरं परम्॥

इत्यादिना आधिदैविकोपद्रवविद्रावकत्वसम्भवाच्च शास्त्रविषयिणी जिज्ञासा न युक्तेत्याशयेनाह—दृष्टे सापार्था चेत्, दृष्टे प्रत्यक्षतयोपलभ्यमाने दुःखनाशके लौकिके प्रसिद्धौषधिसेवनकामिनीसमुपभोगनीतिशास्त्राभ्यास मणिमन्त्राद्युपयोगसाधने शान्ता सा जिज्ञासा अतिकठिने तत्त्वज्ञाने निरर्थिका सती न पुनर्जायतेति चेन्न, एकान्तात्यन्ततोऽभावात् एकान्तं दुःखनिवृत्तेरवश्यं भावः, अत्यन्तं निवृत्तस्य पुनरनुत्पादः, तयोरभावः एकान्तात्यन्ततोऽभावस्तस्मात् एकान्तात्यन्ततोऽभावात्-ऐकान्तिकात्यन्तिकदुःखनिवर्तकत्वासंभवात्। बहुवारं कामिनीसमुपभोगयथाविधिरसायनसेवन नीतिशास्त्राभ्यासमणिमन्त्रानुष्ठान भोजनपानविलेपनवस्त्रालङ्कारादीनां समुपभोगेऽपि शारीरस्य मानसस्य च दुःखस्य प्रशमनादर्शनाद् आत्यन्तिकत्वन्नास्ति। महतापि प्रयत्नेन निर्वर्तिता व्याधयः पुनरुत्पद्यन्ते तथा चोक्तम्:—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पुनर्दाहः समुत्पन्नः पुनर्जातश्च वेपथुः ।
बाधते च पुनर्हिक्का ज्वरश्च पुनरागतः ॥
पुनर्ज्वरे समुत्पन्ने क्रिया पूर्वज्वरानुगा ॥

किञ्च, रोगिभ्योद्रव्यग्रहणाय स्वशक्तिख्यापनाय च स्वल्पमपि रोगं पूर्वं वर्धयन्ति तावत्केचिद्भिषजः । ततश्च सौ कदाचित्तेषामेव असाध्यतामायाति, अत एवोच्यते :—

वैद्य ! वैद्य ! नमस्तुभ्यं क्षपिताशेषमानव ।
त्वयि विन्यस्तभारोऽयं कृतान्तः सुखमेधते ॥
सोपद्रवः सर्वरूपो बलमांसेन्द्रियापहः ।
सारिष्टैश्चैव यो व्याधिस्तं भिषक् परिवर्जयेत् ॥

एवञ्चाधिभौतिकमाधिदैविकं च दुःखं लौकिकोपायैः कदाचित् व्यपैति कदाचिच्च न । तथा च लौकिकोपायो नैकान्तात्यन्तिकदुःखनिवृत्तेर्हेतुरिति लौकिकोपायेषु मुमुक्षूणां जिज्ञासा न भवितुमर्हति किन्तु सांख्यशास्त्रीयतत्त्वज्ञानेनैकान्तात्यन्तिकदुःखनिवृत्तेः संभवात् तत्र मुमुक्षूणां जिज्ञासा युक्तैव ।

ननु ग्रन्थादौ विघ्नविनाशाय मंगलाचरणस्यावश्यकत्वादत्र मंगलभूतस्य दुःखशब्दस्योल्लेखोऽसंगत इति, चेन्न; दुःखत्रयाभिघातपदस्य दुःखप्रहाणार्थमुपादानाद् मंगलार्थत्वेन तदुल्लेखे बाधकाभावात् ॥१॥

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥ २ ॥

अन्वयः—मूलप्रकृतिः, अविकृतिः, (अस्ति) महदाद्याः सप्त प्रकृतिविकृतयः (सन्ति) । षोडशकः, विकारस्तु, पुरुषः, न प्रकृतिः न विकृतिः (अस्ति) ।

मूलप्रकृतिः प्रकरोतीति प्रकृतिः मूलं चासौ प्रकृतिः मूलप्रकृतिः प्रधानम् । अविकृतिः न विकृतिरिति अविकृतिः प्रकृतिः एव सा, नास्यापि विकारोऽस्ति । सकलस्य कार्यस्य सा एव मूल नह्यस्याः किमपि मूलान्तरं विद्यते । तथा चोक्तम् गीतायाम्—'प्रकृतिं पुरुषं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विद्ध्यन्तीति उभावपि । महदाद्याः 'महद् आद्यं यासां ताः महदाद्याः, महदहंकारशब्दस्पर्शरूपरसगन्धतन्मात्राणि, सप्त सप्तसंख्याकाः प्रकृति-विकृतयः प्रकृतयश्च विकृतयश्च प्रकृतिविकृतयः, कस्यचित् कारणानि कस्यचिच्च कार्याणि भवन्ति । तद्यथा प्रधानाद् महदुत्पद्यते, तत्प्रधानस्य विकृतिः, तदेवाहंकारमुत्पादयतीति अहंकारस्य प्रकृतिः । एवमहंकारः पञ्चतन्मात्राणि एकादशेन्द्रियाणि चोत्पादयतीति तेषां प्रकृतिः, महत उत्पद्यते इति तस्य विकृतिः । एवं शब्दस्पर्शरूपरसगन्धतन्मात्राणि आकाशवायुतेजोजलपृथिव्यात्मकानि पञ्चमहाभूतानि उत्पादयन्तीति तेषां प्रकृतयः सन्ति, अहंकारादुत्पद्यन्ते इति विकृतयश्च भवन्ति । षोडशकः षोडश परिमाणमस्येति षोडशकः पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणि, पञ्चतन्मात्राणि मनश्चेति षोडशको गणस्तु विकारः विकृतिरेव, नास्माद् किञ्चिदुत्पद्यते कार्यत्वात् । पुरुषस्तु न कस्यापि प्रकृतिः नापि विकृतिः, उदासीनत्वात् । पुरुषान्न किञ्चिदुत्पद्यते इति न स कस्यापि प्रकृतिः, नित्यत्वान्न कुतश्चिदुत्पद्यते न कस्यापि विकृतिरस्ति । न कस्यचिज्जनको नापि जन्य इत्यर्थः ।

अयं भावः—अस्मिन् सांख्यशास्त्रे प्रकृतिः, महत्, अहंकारः, मनः पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि पञ्च महाभूतानि पुरुषश्चेति पञ्चविंशति तत्त्वानि स्वीकृतानि सन्ति । तेषु १. किञ्चित्तत्त्वं प्रकृतिरेव, न कस्यापि विकृतिः, यथा प्रकृतिः २. किञ्चित्तत्त्वं विकृतिरेव न कस्यापि प्रकृतिः, यथैकादशेन्द्रियाणि पञ्चमहाभूतानि च । ३. किञ्चित्तत्त्वं प्रकृतिविकृत्युभयमस्ति यथा महदहंकारतन्मात्राणि । ४. किञ्चिच्च न कस्यापि प्रकृतिः, नापि विकृतिः, यथा पुरुषः ॥ २ ॥

दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात् ।
त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि ॥ ३ ॥

अन्वयः—दृष्टम्, अनुमानम्, आप्तवचनं च, त्रिविधं प्रमाणम्, इष्टम्, (अत्रैव) सर्वप्रमाणसिद्धत्वात्, हि, प्रमाणात् प्रमेयसिद्धिः (भवति) ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दृष्टं प्रत्यक्षमनुमानम् अनुमितिकरणम्, आप्तवचनं शब्दः त्रिविधं त्रिसंख्याकं प्रमाणं प्रमीयतेऽनेनेति प्रमाणं प्रमाकरणम्, सांख्याचार्याणामभिमतम् । ननु कथं त्रिविधमेव प्रमाणं न्यूनम् वा कुतो न ? तथाहि—प्रत्यक्षमेवैकं प्रमाणमिति चार्वाकाः, प्रत्यक्ष मानञ्चेति द्वे प्रमाणे इति वैशेषिका बौद्धाश्च, प्रत्यक्षानुमाना इति त्रीणि प्रमाणानीति सांख्या योगाश्च । उपमानेन सह चत्वा नैयायिकाः । अर्थापत्त्यनुपलब्धिभ्यां सह षट् प्रमाणानीति भाट्ट न्तिनो । संभवैतिह्याभ्यां सहाष्टौ इति पौराणिकाः । चेष्टया सह त्यालंकारिका मन्यन्ते । अत आह सर्वप्रमाण सिद्धत्वात् । दर्शनान्तरीयाणां प्रमाणानां त्रिषु प्रत्यक्षानुमानशब्दाख्येषु अ न्तर्भावात् । तत्रोपमानार्थापत्त्यनुपलब्धिसंभवचेष्टानामनुमाने ह्यस्य च शब्दप्रमाणेऽन्तर्भावो भवतीति न कापि विप्रतिपत्तिः प्रमेये निरूपणीये कथं प्रमाणं निरूप्यते इति शंकायामाह—प्रमेय प्रमाणाद्धि । हि यतः । प्रमेयसिद्धिः प्रमेयस्य पञ्चविंशतिपदार्थस्य यस्य सिद्धिः निष्पत्तिः निश्चयः प्रमाणाद् भवति । एवं च प्रमा पदार्थानां प्रतीतिः कर्तुं शक्येति प्रमेयप्रतिपादनाय प्रवृत्तमपीदं प्रमाणसामान्यं विशेषं च लक्षयतीति न काप्यनुपपत्तिः । तस्मात् क्षानुमानशब्दभेदात् त्रिविधमेव प्रमाणं सांख्यसंमतं विज्ञेयम् ॥

प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातम् ।
तल्लिङ्ग - लिङ्गि - पूर्वकमाप्त - श्रुतिराप्तवचनं तु ॥

अन्वय—प्रतिविषयाध्यवसायः, दृष्टं, (यत्) लिङ्गलि कम्, अनुमानं, तत्, त्रिविधम्, आख्यातम्, आप्तश्रुतिः, आ तु ॥ ४ ॥

प्रतिविषयाध्यवसायः , विषिण्वन्ति विषयिणमनुब विषयाः, विषयान् प्रतिवर्तते इति प्रतिविषयं तस्मिन्नध्यवसाय विषयाध्यवसायः इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं दृष्टम् प्रत्यक्षम् प्रमाणस्य लक्षणमित्यर्थः । यत् लिङ्गलिङ्गिपूर्वकं लिङ्ग्यति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गमयतीति लिङ्गं व्याप्यं हेतुरितियावत्, लिङ्गमस्यास्तीति लिङ्गि व्यापकं साध्यमिति यावत्, लिङ्गञ्च लिङ्गि च लिङ्गलिङ्गी धूमादिव्याप्यो वह्न्यादिर्व्यापक इति यः प्रत्ययः तत्पूर्वकं लिङ्गलिङ्गपूर्वकं व्याप्यव्यापकभावावगाहि पक्षधर्मताज्ञानपूर्वकम्, अनुमानम् अनुपूर्वहेतु दृष्ट्वा पश्चान्मीयते इत्यनुमानम् अनुमानाख्यप्रमाणमित्यर्थः। तदनुमानं त्रिविधम्, त्रिप्रकारकम् पूर्ववत्, शेषवत्, सामान्यतो दृष्टञ्च, तत्र पूर्ववत् केवलान्वयि, शेषवत् केवलव्यतिरेकि, सामान्यतो दृष्ट चान्वयव्यतिरेकि। पूर्ववत् पूर्वं कारणमस्ति अस्येति पूर्ववत्, कारणलिङ्गकम्। यत्र कारणेन कार्यमनुमीयते तत्पूर्ववत्, यथा— उन्नत जलधरं दृष्ट्वा भविष्यद्वृष्टेरनुमानं गगनं भविष्यद्वृष्टिमत्, गम्भीरध्वानबलाकादिमत्त्वात्। अत्र कारणेन तादृशेन मेघेन कार्यस्य वृष्टेरनुमानं भवति। शेषवत् शेषः कार्यमस्ति अस्येति शेषवत् कार्यलिङ्गकम् यत्र कार्येण कारणमनुमीयते तत् शेषवत् यथा—सरित्स्रोतसो मालिन्यं पूर्णत्वं शीघ्रत्वं चावलोक्य उपरिदेशे "नदीवृष्टिमती फेनतृणकाष्ठकच्चरादिवहनशीलप्रवाहवत्वात्।" अत्र कार्येण प्रवाहेण कारणस्य वृष्टेरनुमानं भवति। यथा वा—समुद्रोदकविन्दु प्राश्य शेषस्य लवणभावोऽनुमीयते"। सामान्यतो दृष्टं च कार्यकारणभिन्नलिंगकम्, यथा वा-एकत्र पुष्पिताम्रदर्शनादर्शनादन्यत्रपुष्पिता आम्रा इति सामान्यतो दृष्टादनुमानात् साध्यते। यथा वा देशान्तराद् देशान्तरं प्राप्त चैत्रं दृष्ट्वा गतिमानयमिति विज्ञाय गतिमच्चन्द्रतारकं देशान्तरप्राप्तत्वात् चैत्रवत्, इत्यः अप्रत्यक्षापि चन्द्रतारकादिगतिः कार्यकारणभिन्नेन दर्शनेनानुमीयते। आप्तश्रुतिः आप्तवचनं च आप्ता चासौ श्रुतिः आप्तश्रुतिः, वेदांतमूलकस्मृतीतिहासपुराणादिज्ञानम्। श्रद्धा श्रूयते या सा श्रुतिः, श्रवणविषयीभूत: आप्ता यथार्था श्रुतिः आप्तश्रुतिः, आप्तवचनं आप्तपुरुषवाक्यजन्यं ज्ञानं शब्दप्रमाणमित्यर्थः। आप्तलक्षणञ्च—

स्वकर्मण्यभियुक्तो यः रागद्वेषविवर्जितः।
निर्वैरः पूजितः सद्भिराप्तो ज्ञेयः स तादृशः॥

Kirtikar Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अतिदूरात् सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात् ।
सौक्ष्म्याद् व्यवधानादभिभवात् समानाभिहाराच्च ॥

अन्वयः—अतिदूरात्, सामीप्यात्, इन्द्रियघातात्, मनोऽनवस्थानात्, सौक्ष्म्यात्, व्यवधानात् अभिभवात्, समानाभिहारात् चा[नु]पलब्धिर्भवती (इति शेषः) ।

अतिदूरात् सतामपि पदार्थानामतिदूरस्थदोषात् प्रत्य[क्षं न] भवति, यथाऽऽकाशे ऊर्ध्वं नुत्पतन् पक्षी अतिदूरतया चक्षुषा न ग्[ृह्यते] तथा चैत्रमैत्रादयो वा देशान्तरं गता गृहे नोपलभ्यन्ते, तत् कि[ं न] सन्ति ? नैतावता तेषामभावः केनचित् कल्प्यते । सामीप्यात् य[था] सामीप्यात् चक्षुर्गोलकगतमज्जनं नोपलक्ष्यते । इन्द्रियघातात् इ[न्द्रिय]विनाशाद् यथा अन्धत्वाद्रूपं न दृश्यते, वधिरत्वात् शब्दो न [श्रूयते] नैतावता रूपादीनामभावः कल्प्यते । मनोऽनवस्थात् मनसो विष[यान्तर]व्याप्तत्वात्, यथा व्यग्रचित्तः सम्यक् कथितमपि नावधारयति [...] सन्निकृष्टमपि घटादिकं न पश्यति, नैतावता तदभावः कल्प्य[ते] सौक्ष्म्यात् अतिसूक्ष्मत्वात् धूमोष्णनीहारपरमाणवो नोपलभ्यन्ते, [नैता]वता तेषामभावो भवति । व्यवधानाद् व्यवहितत्वाद् यथा कुड्य[...]निकादिभिर्व्यवहितं वस्तु राजदारादिकं वा जनैः नोपलभ्यते, नैत[ावता] तदभावः कल्प्यते । अभिभवाद् अभिभूतत्वाद् यथा गगने वि[...] अपि सूर्यतेजसाभिभूताः ग्रहनक्षत्रतारकादयो दिवा न दृश्यन्ते, [नैता]वता गगने तेषामभावः कल्प्यते । समानाभिहारात् समानजा[तीय]पदार्थैः सम्मिश्रणात् यथा मुद्गराशौ क्षिप्तः मुद्गः, कुवलया[...] मध्ये क्षिप्तं कुवलयामलके, मेघमुक्ता जलबिन्दवः नद्यादौ च पा[तिता] नोपलभ्यन्ते, समानद्रव्यमभ्याहृतत्वात्, तत्किं ते न सन्ति [...] माहिषे दुग्धे पतितं गोदुग्धं न पृथगनुभूयते, समानगुणमिश्रणात् सतामपि पदार्थानामष्टधा भवति अनुपलब्धिः ।

तथा च केवलं प्रत्यक्षाभावादेव क्वाचित्कवस्तूनामभावो [...] नार्हति । अदृष्टानामपि बहूनां वस्तूनां विद्यमानत्वात् । अन्यथा[...]

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

रगतं जनमपश्यन् जनः तदभावं निश्चिनुयात् नचैवं संसारे कश्चित् चेता अभावस्य निश्चयं कुरुते, किन्तु योग्यप्रत्यक्षाभावादेव लोको-भावं कल्पयति । अतः प्रधानपुरुषयोरतिसूक्ष्मत्वात् परमाणुवत्तयोः प्रत्यक्षयोग्यत्वेन नास्तीति न काप्यस्ति विप्रतिपत्तिः ॥५॥

सौक्ष्म्यात्तदनुपलब्धिर्नाऽभावात् कार्यतस्तदुपलब्धेः ।
महदादि तच्च कार्यं प्रकृतिस्वरूपं, विरूपञ्च ॥६॥

अन्वयः—तदनुपलब्धि, सौक्ष्म्यात् न अभावात्, कार्यतः, तदु-पलब्धेः, तच्च कार्यम्, महदादि, प्रकृतिस्वरूपं, विरूपं च ॥६॥

तदनुपलब्धिः तस्य अनुपलब्धिः तदनुपलब्धिः, प्रधानस्य अप्र-त्यक्षं सौक्ष्म्यात् निरवयवत्वेनातिसूक्ष्मत्वाद् भवति । यथा—आकाशे स्तोऽपि परमाणव सूक्ष्मत्वान्नोपलभ्यन्ते, तथा सदपि प्रधानं सूक्ष्मा-दोषान्नोपलभ्यते । न तु अभावाद् असत्वादेव शशशृङ्गादिवत् प्रधानस्यानुपलब्धिर्न भवतीति नास्ति, किन्तु अयोग्यत्वात्तत्प्रत्यक्षं न भवति । तर्हि कथं तदुपलब्धि ? कार्यतः तदुपलब्धिः, प्रधानस्योप-लब्धिः । यथा—कार्यं वटवृक्षं दृष्ट्वा वटबीजमनुमीयते, तथा कार्यं महदादि दृष्ट्वा कारण प्रधानमनुमीयते । यदस्ति कारणं प्रधानं तस्येदं कार्यं महदहंकारः, पञ्चतन्मात्राणि, एकादशेन्द्रियाणि, पञ्चमहा-भूतानि च, अकारणस्य कार्यस्योत्पादासम्भवात् । तथा चानुमान प्रयोगः—महत्तत्त्वं सुखदुःखमोहात्मककार्यत्वात् । किञ्च तत्कार्यं येन प्रधानस्यानुमानेन प्रतीतिर्भवतीत्याह—महदादि तच्च कार्यम् । तच्च महदादि महत्तत्त्वमारभ्य पृथिवीपर्यन्तं कार्यम्, प्रधानस्य कार्यजातम् । प्रकृतिस्वरूपं प्रकृतेः सदृशम्, विरूपम् असदृशञ्च । यथा लोके पुत्रः पित्रा सदृशो भवति विसदृशश्च ।

अस्य तत्कार्यैः सह परस्परं साजात्यं वैजात्यञ्च १०, ११ कारिकयोः स्पष्टं करिष्यते । तस्माद् दृढतरप्रमाणाभावात् प्रधानस्य शशशृङ्गादिवदभावं कल्पयितुं न शक्यते ॥६॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम् ;
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम् ॥७॥

अन्वयः—व्यक्तम्, हेतुमत्, अनित्यम्, अव्यापि, सक्रियम्, कम्, आश्रितम्, लिङ्गम् सावयम्, परतन्त्रम्, अव्यक्तम् विप (भवतीति शेषः) ॥७॥

व्यक्तम्, महदादिभूतपर्यन्तं हेतुमत् यस्याविर्भावे हेतुः मस्ति तद्धेतुमत् सकारणं । तत्र प्रधानादुत्पद्यमानो महान्, है महतोऽहंकारो हेतुमान्, अहंकारादेकादशेन्द्रियाणि तन्मात्राणि च मानानि हेतुमन्ति, तन्मात्रेभ्यश्च महाभूतानि हेतुमन्ति। अ विनाशि कारणेभ्य उत्पद्यमानत्वात् घटादिवत् । अव्यापि अव्याप सक्रियं संसरणशीलम्। महदादि कार्यसूक्ष्मशरीरमाश्रित्य संस अनेकं बहुविधम् । आश्रितं स्वकारणाश्रितम् । यद् यस्मादुत्पद्यते त श्रितं भवति यथा महत्तत्व स्वकारणं प्रधानमाश्रितं, तच्चाहंकार अ तस्मिन् इन्द्रियाणि तन्मात्राणि चाश्रितानि, च तेषु पञ्चमहाभू लिङ्ग लयं गच्छतीति लिङ्गं लययुक्तम् । यथा प्रलयकाले पञ्च तानि यथाक्रमं पञ्च तन्मात्रेषु लीयन्ते, तन्मात्राणि एकादशेन्द्रियाणि कारे अहंकारो महति, महांश्च प्रधाने लीयते । सावयवम् अवयवं वयवाः यथा शरीरस्य हस्तपादादयः अवयवेन सह वर्तन्ते इति वम् यथा पृथिव्यादयः परस्परं संयुज्यन्ते, तथा महदादयोऽपि संयुज्यन्ते । परतन्त्रं पराधीनं स्वकार्योत्पादने स्व रण महत्तत्वं स्वकार्येऽहंकारे जनयितव्ये प्रधान सत्तत् नाहंकारमुत्पादयितुं समर्थं स्यात्, ए स्वकारणमपेक्षते । यथा पितरि जीवति पुत्रो महदादि प्रधानाधीनम् ।

अव्यक्तस्य स्वरूपमाह—विपरीतमव्यक्तम् । विपरीतं व्यक्ताद् वैधर्म्यम् । तदेवं व्यक्ताव्यक्तयोः परस्परं वैधर्म्यं प्रदर्शितं भवति । व्यक्तं हेतुमत् अव्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नुत्पन्नत्वात् नहि प्रधानतोऽन्यदस्ति यतस्तदुत्पद्यते। व्यक्तमनित्यम् अव्यक्तं नित्यम् अकारणत्वात् । व्यक्तमव्यापि अव्यक्तं व्यापकम् सर्वगतत्वात् । व्यक्तं सक्रियम्, अव्यक्तम् अक्रियम् सर्वव्यापकत्वात् । व्यक्तमनेकम् अव्यक्तमेकं सर्वकारणत्वात् ॥ व्यक्तमाश्रितमव्यक्तमनाश्रितं प्रभविष्णुत्वात् । व्यक्तं लिङ्गमव्यक्तमलिङ्गमनुत्पत्तिकत्वात् । व्यक्तं सावयवमव्यक्तं निरवयवममूर्तत्वात् । व्यक्तं परतन्त्रमव्यक्तं स्वतन्त्रम् सर्वोत्पत्तिकारणत्वात् ॥७॥

प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः ।
अन्योऽन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः ॥८॥

अन्वयः—गुणाः प्रीत्यप्रीतिविषादात्मकाः, प्रकाशप्रवृत्तिनियमार्थाः अन्योऽन्याभिभवाश्रयजननमिथुनवृत्तयश्च (भवन्ति) ॥८॥

गुणाः सत्त्वरजस्तमांसि त्रयो गुणाः । प्रीत्यप्रीतिविषादात्मकाः प्रीतिश्चाप्रीतिश्च विषादश्चेति प्रीत्यप्रीतिविषादाः, ते आत्मानः स्वरूपाणि येषां ते प्रीत्यप्रीतिविषादात्मकाः सुखदुःखमोहजनकाः । तत्र सत्त्वगुणः प्रीयात्मकः, रजोगुणो दुःखात्मकः, तमोगुणश्च मोहात्मकः । एवं गुणानां लक्षणमुक्त्वा प्रयोजनमाह—प्रकाशप्रवृत्तिनियमार्थाः प्रकाशोऽवभासः, प्रवृत्तिश्चालनम्, नियमः प्रतिबन्धः, अर्थः प्रयोजनं येषां ते प्रकाशप्रवृत्तिनियमार्थाः प्रकाशक्रियास्थितिशीलाः । तत्र सत्त्वं प्रकाशप्रयोजनं, रजः प्रवृत्तिप्रयोजनम्, तमो नियमनप्रयोजनम् । अर्थात् सत्त्वेन पदार्थानां प्रकाशः क्रियते, रजसा चालनम्, तमसा च प्रतिबन्धो विधीयते ।

एवं गुणानां प्रयोजनमुक्त्वा क्रियामाह—अन्योऽन्याभिभवाश्रयजननमिथुनवृत्तयः । द्वन्द्वादौ द्वन्द्वान्ते च श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते इति नियमादन्योऽन्यशब्दः वृत्तिशब्दश्च प्रत्येकमभिसम्बध्यते । तथाच—

अन्योन्याभिभववृत्तयः, अन्योन्याश्रयवृत्तयः, अन्योन्यजननवृत्तयः, अन्योन्यमिथुनवृत्तयश्च गुणा भवन्ति । तत्र त्रयाणां प्रयोजन-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वशादुद्भूतेनान्यतमेन गुणेनापरो गुणावभिभूयेते । तथाहि—अन्याभिभववृत्तयो यथा - यदा सत्त्वमुत्कटं भवति तदा रजस्तमसी अभिभूय आत्मीयां शान्तां वृत्तिं जनयति, एवं रजः सत्त्वतमसी अभिभूय घोरां वृत्तिं जनयति, तमश्च सत्त्वरजसी अभिभूय मूढां वृत्तिं जनयति। अन्योन्याश्रयवृत्तयः द्व्यणुकवत् परस्परापेक्षवृत्तयो गुणाः यमपेक्ष्य क्रिया भवति स तदाश्रयः, यथा सत्त्वं प्रवृत्तिनियमावाश्रित्य रजस्तमसोः प्रकाशेनोपकरोति । रजः प्रकाशनियमौ आश्रित्य सत्त्वतमसी प्रवृत्त्या उपकरोति । एवं तमः प्रकाशप्रवृत्ती आश्रित्य सत्त्वरजसी नियमेनोपकरोति । अन्योन्यजननवृत्तयः, जननं चात्र परिणामः । यथा च सत्त्वगुणः रजःतमसी स्वानुकूलतया परिणमयति । रजोगुणः सत्त्वतमसी तथैव परिणमयति । तमोगुणश्चतमसोऽनुकूलतया परिणमयति। अन्योन्यमिथुनवृत्तयः परस्परसहचराः त्रयो गुणाः सहैव तिष्ठन्ति न चान्योन्यविरहेण क्वचित् प्रवर्तन्ते । यद्वा स्त्रीपुरुषौ इव मिथुनाः सृष्टिजनकाः । यथा लोके स्त्रीपुमांसौ मिथुनेन परस्परं मिलित्वा पुत्रादिकं जनयतः तथैवेमे गुणाः अपि मिथुनीभूय परस्परं मिलित्वा विश्वसर्गमुत्पादयन्ति । चकारोऽत्र समुच्चये वर्तते तथा चोक्तं देवीभागवते—अन्योऽन्यमिथुनाः सर्वे सर्वत्र गामिनः ॥८॥

सत्त्वं लघुप्रकाशकमिष्टमुपष्टम्भकं चलं च रजः ।
गुरुवरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः ॥३॥

अन्वयः—सत्त्वम्, लघु प्रकाशकम्, (सांख्याचार्यैः) इष्टम् रजः उपष्टम्भकं, चलं च (इष्टम्) तमः, गुरुवरणकमेव (इष्टम्) अर्थतो प्रदीपवत् वृत्तिः (भवति)।

सत्त्वम् सत्त्वगुणः, लघुस्वभावम्, प्रकाशकम् अर्थविभासकम् इष्टं सांख्याचार्याणामभिमतम् । यदा शरीरे सत्वमुत्कटं भवति, तदा अङ्गानि लघूनि विशुद्धानीन्द्रियाणि स्वविषयप्रकाशनसमर्थानि भवन्ति । लघुत्वं प्रकाशकत्वञ्च सत्त्वस्य लक्षणम् । उपष्टम्भकं च रजः, उपष्टम्भकम् स्वस्वकार्ये प्रवृत्तिप्रयोजकं चलम् चञ्चलं सर्वदा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

रजः रजोगुणो भवति । यथा मत्तवृषभो वृषभान्तरं दृष्ट्वा उद्धतो भवति, एवं यस्मिन् रज उत्कटं भवति स कलहं मृगयते, चलचित्तश्च भवति, ग्रामं गच्छति, स्त्रियं कामयते, युद्धं च करोति । प्रेरकत्वं सक्रियत्वं च रजसो लक्षणम् । गुरुवरणकमेव तमः । गुरु गुरुत्ववत् वरणकम् आवरणशीलं प्रवृत्तिप्रतिबन्धकमेव तमः तमोगुणो भवति । यस्योद्रेकात् गुरूणि अङ्गानि, भवन्ति, इन्द्रियाणि अलसानि स्वविषय-ग्रहणासमर्थानि च जायन्ते । तथाहि—

लघु प्रकाशकं सत्त्वं निर्मलं विशदं तथा ।
यदाङ्गानि लघून्येव नेत्रादीनीन्द्रियाणि ॥
निर्मलं च तथा चेतो गृह्णाति विषयान् स्वकान् ।

ननु परस्परं विरुद्धानां गुणानां कथमेका वृत्तिर्भवति ? नहि परस्परं विरुद्धाः शत्रवो मिलित्वा एकं कार्यं कुर्वन्ति । इमे च गुणा परस्परं विरुद्धाः अपि संभूय पुरुषार्थं सम्पादयन्तीत्याह—प्रदीपवच्चार्थतो वृत्तिः अर्थतः पुरुषार्थसम्पादनवशात् प्रदीपवत् प्रदीप इव वृत्तिः एककार्यकारित्वं भवति । यथा परस्परं विरोधिनोऽपि वर्तितैलानलाः मिलिताः सन्तः एकं प्रकाशरूपमर्थं निष्पादयन्ति । यथा वा वातपित्तश्लेष्माणः परस्परं विरोधिनोऽपि संहत्य शरीरधारणलक्षणकार्यकारिणो भवन्ति, तद्वत् परस्परं विरुद्धान्यपि सत्त्वरजस्तमांसि त्रयो गुणाः परस्पर मिलित्वा पुरुषार्थं कुर्वन्तीति नास्ति संहत्य तेषां कार्यकारित्वे काचिद् विप्रतिपत्तिः । तथाहि—

प्रदीपश्च यथाकार्यं प्रकरोत्यर्थदर्शनम् ।
वर्तिस्तैलं तथार्चिश्च विरुद्धाश्च परस्परम् ॥
एवं प्रकृतिजा प्रोक्ता गुणा सत्यवतीसुतः ॥

ननु परस्परं विरुद्धानां सुखदुःखमोहानामिव सुखप्रकाशलाघवानामपि परस्परं विरुद्धत्वात् नवगुणाः कल्पनीया इति चेन्न, तेषामेकस्मिन्नेव सत्वे समुद्भवदर्शनाद् एकस्मिन् कार्ये युगपत्प्रवृत्तौ विरोधाभावात् ॥१३॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अविवेक्यादेः सिद्धिस्त्रैगुण्यात् तद्विपर्ययाभावात् ।
कारणगुणात्मकत्वात् कार्यस्याऽव्यक्तमपि सिद्धम् ॥१०॥

अन्वयः—अविवेक्यादेः सिद्धिः (अव्यक्तादौ) त्रैगुण्यात्, तद्विपर्ययाभावात् कार्यस्य, कारणगुणात्मकत्वात् अव्यक्तमपि सिद्धः (भवति)।

त्रैगुण्यात् प्रकृतिवत् त्रिगुणत्वात् अविवेक्यादेः अविवेकित्वादे सिद्धिः। अनुमानमपि भवति तथाहि—"अव्यक्तम् अविवेकित्वादियोगि, सुखदुःखमोहात्मकत्वात्, यद् यत् सुखदुःखमोहात्मकं तत्तदविवेकित्वादि यथेदमनुभूयमानं पृथिव्यादि व्यक्तम् ।"

व्यतिरेकव्याप्तिमाह—तद्विपर्ययाभावात् । तस्य विपर्ययः तद्विपर्ययः तस्य अभावः तद्विपर्ययाभावः तस्मात् तद्विपर्ययाभावात् अविवेकित्वादिविपर्यये पुरुषे त्रिगुणत्वाभावात् । यत्र यत्र विवेकित्वाद्यभाव तत्र तत्र सुखदुःखमोहात्मकत्वाभावे यथा पुरुषे । तथा चानुमानप्रयोग- व्यक्ताव्यक्ते अविवेकित्वादियोगिनी, त्रिगुणात्मकत्वात् यन्नैवं तन्नैव यथा पुरुषः ।

ननु पक्षीभूतमव्यक्तमेवासिद्धं तस्याभावे कुत्राविवेकित्वादि इत्याह—कारणगुणात्मकत्वात् कार्यस्य पृथिव्यादिमहत्तत्वान्तस्य कारणगुणात्मकत्वात् कारणगुणस्वभावत्वात् । इह लोके यदात्मकं कारण तदात्मकं कार्यमपि भवति, यथा कृष्णेभ्यः तन्तुभ्यः कृष्णः एव पटः भवति कटुनिम्बवृक्षात् कटुरेव रसो भवति, मधुराच्च द्राक्षातः मधुरो द्राक्षारसो जायते । एवं महदादि लिङ्गम् अविवेकि, त्रिगुणम्, सामान्यमचेतनं प्रसवधर्मि च यदात्मकमस्ति, तदात्मकमेव अव्यक्तं प्रधानमपि सिद्धमनुमितं भवति । यद्यव्यक्तं तथाविधं न भवेत्तर्हि व्यक्तं कथं तथाविधं स्यात् ? तथाचानुमानम्—घटादयः स्वसमानगुणकारणजन्याः जन्यत्वात् पटवत् । एवं महदादयोऽपि स्वसमानगुणकारणजन्याः कार्यत्वात् घटवत् । अत्र यत्स्वसमानं कारणं तदेव 'प्रधान'मिति प्रधानस्य सिद्धिर्भवति ॥१०॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कारणमस्त्यव्यक्तम्, प्रवर्तते त्रिगुणतः समुदयाच्च ।
परिणामतः सलिलवत् प्रतिप्रतिगुणाश्रयविशेषात् ॥११॥

अन्वयः—त्रिगुणतः, समुदयात्, च भेदानाम् अव्यक्तकारणमस्ति । प्रतिप्रतिगुणाश्रयविशेषात् परिणामतः सलिलवत्, प्रवर्तते ।

प्रलयकाले हि प्रधानं त्रिगुणतः, सत्त्वरजस्तमांसि त्रयो गुणा विद्यन्ते यस्मिन् तत् त्रिगुणं, साम्यावस्थात्मकं प्रधानं. तस्मात् त्रिगुणतः प्रवर्तते । सर्वदा परिणामस्वभावा हि गुणाः, परिणामं विना क्षणमपि न तिष्ठन्ति । नहि स्वभावो फलमपेक्षते, तस्मात् सत्त्वं सतोरूपतया, रजो रजोरूपतया तमस्तमोरूपतया प्रवर्तते एव । एवञ्च प्रधाने सत्त्वरजस्तमसामवस्थानाद् बहुत्वसम्भवे त्रिगुणतः प्रवर्तते त्रिधा व्यवहारः ।

समुदयात् सृष्ट्यर्थं समेत्य (मिलित्वा) आभिर्भावात् । यथा गङ्गायां स्रोतांसि समुदितानि गङ्गामारभन्ते, यथा वा तन्तवः समुदिताः पटं कुर्वन्ति, तथा सत्त्वरजस्तमांसि त्रयो गुणाः परस्परं गुणप्रधानभावेनसमुदिताः सन्तः व्यक्तं कुर्वन्ति । तस्मादुपमर्द्योपमर्दकभावेन परस्परं मिलित्वा गुणा महदादिरूपेण प्रवर्तन्ते ।

ननु कथमेकरूपाणां गुणानामनेकरूपा प्रवृत्तिरित्याह—परिणामतः । सलिलवत् जलवत् । आश्रयभेदेन गुणानां परिणामभेदा भवन्ति । यथा आकाशात् पतितमेकरसमपि सलिलं वीजभूम्याद्याश्रयभेदेन नारिकेलद्राक्षामलकजम्वीरमरीचादिनानाफलरसतया परिणत् मधुराम्लकटुकषायतिक्तादिरूपेण परिणमते, एवमिमे त्रयो लोका एकस्मात् प्रधानादुत्पन्नगुणवैषम्यादनेकस्वभावा भवन्ति । यथा देवेषु सत्त्वमुत्कटं भवति, मनुष्येषु रजः, तिर्यक्षु तमश्च । यथा वा एकस्मात् पितुरेकस्या एव मातुः उत्पन्नाः तनयाः भिन्नगुणस्वभावा भवन्ति तथैव त्रयाणामपि गुणानां क्रमशो विशेषात् प्रवृत्तिभेदो भवति । कः पुनः परिणामो नामः, इति चेदुच्यते :—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

जहद्धर्मान्तरं पूर्वमुपादत्ते यदा परम् ।
तत्त्वादप्रच्युतो धर्मो परिणामः स उच्यते ॥

पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य ।
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ॥१२॥

अन्वयः—पुरुषस्य कैवल्यार्थम्, तथा, प्रधानस्य, दर्शनार्थम् उभयोरपि, संयोगः भवति, पङ्ग्वन्धवत् तत्कृतः सर्गः, जायते ॥१२॥

पुरुषस्य प्रधानस्येत्युभयत्र कर्मणि षष्ठिः कर्तृ पदे चाध्याहार्ये तथा च प्रधानेन दर्शनार्थं स्वस्य भोगार्थी पुरुषः अपेक्ष्यते । तथा पुरुषेण कैवल्यार्थं स्वस्य मोक्षार्थी प्रधानमपेक्ष्यते इत्येवमपेक्षयोभयोरपि प्रधान-पुरुषयो संयोगो भवति तथा च सगुणां प्रकृतिं द्रक्ष्यामीत्यर्थी पुरुषः प्रधा-नेन सहसंयुज्यते ज्ञाने प्रवर्तमानस्य पुंसः कैवल्यं करिष्याम्येतदर्थं प्रधा-नमपिपुरुषेण सहसंयुज्यते । यथा स्वभागार्थी प्रधानं पुरुषमपेक्षते तथैव पुरुषोऽपि कैवल्यार्थं प्रधानमपेक्षतेः भोग्यं प्रधानं भोक्तारं पुरुषं विना न सम्भवतीत्युभयोः परस्परमपेक्षा समुचितैव । को दृष्टान्तः ? पङ्ग्व-न्धवत् पङ्गुश्च अन्धश्च पङ्ग्वन्धौ ताभ्यां तुल्यं पङ्ग्वन्धवत्, यथैकः पङ्गु परश्चान्धः, तत्र गमनाशक्तेन पङ्गुना स्वाभीष्टदेशप्राप्तये गति-मानन्धोऽपेक्ष्यते दर्शनाशक्तेनान्धेन मार्गदर्शनार्थी दर्शनशक्तिमान् पङ्-गुरपेक्ष्यते । तयोः परस्परं संयोगे पङ्गुरन्धस्कन्धमारुह्य गतिमान् भवति, अन्धश्च स्वस्कन्धारूढ़ पङ्गुना दर्शनशक्तिमान् भवति । यथैवं तयो स्वार्थहेतुकः संयोगः तद्वत् प्रधानपुरुषयोः संयोगो द्रष्टव्यः । पङ्-गुवत् पुरुषः अन्धवत् प्रधानं पुरुषे दृक् शक्तिरस्ति न पङ्गुवत् क्रिया-शक्तिः, प्रधाने च क्रियासामार्थ्यमस्ति न दर्शनशक्ति । तदेवं प्रधान-पुरुषयोः पङ्ग्वन्धयोर्विभागो भवति तथा प्रधानमपि पुरुषस्य मोक्षं कृत्वा निर्वतते, पुरुषोऽपि प्रधानं दृष्ट्वा कैवल्यं गच्छति । भोगापवर्ग-योर्द्वारभूतः सर्गोऽपि तयोः संयोगादेव भवतीत्याह— तत्कृतः सर्गः । ताभ्यां प्रधानपुरुषाभ्यां कृतः तत्कृतः प्रधानपुरुषसंयोगकृतः सर्गः सृष्टिः । तद्यथा स्त्रीपुरुषयोः संयोगादपत्यं जायते, तद्वत्प्रधानपुरुषयोः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

संयोगात् सर्गोत्पत्तिर्भवति। एवञ्च स्थूलशरीरं विना भोगः अपवर्गो वा न संभवतीति प्रधानपुरुषयोः संयोग एव भोगापवर्गार्थं महदादिस्थूलशरीरपर्यन्तं सर्गं करोतीति निर्विवादम् अयं भावः—यथा काचित् कामिनी स्वोपभोगाय स्वभिन्नं भोक्तारं पुरुषं कामयते, तद्वद् भोग्या प्रकृतिरपि स्वभिन्नं भोक्तारं पुरुषं कामयते, पुरुषोऽपि स्वापवर्गार्थं प्रकृतिं प्रार्थयते इति पङ्ग्वन्धयोरिव स्वस्वभोगापवर्गार्थं तयोः संयोगो भवति, तस्मात् महत्तत्वादीनां सृष्टिर्भवति ॥१२॥

अध्यवसायो बुद्धिधर्मो ज्ञानं विराग ऐश्वर्यम् ।
सात्त्विकमेतद्रूपं तामसमस्माद्विपर्यस्तम् ॥१३॥

अन्वयः—अध्यवसायो बुद्धिः, धर्मो ज्ञानम्, विरागः, ऐश्वर्यम्, एतत् (अस्याः) सात्त्विकम्, रूपम् (अस्ति तथा) अस्माद्विपर्यस्तम्, तामसम् (रूपम्) अस्ति ॥१३॥

अध्यवसायः, अयं स्थाणुः, अयं पुरुषः, इति निश्चयः, बुद्धिः महान्। अध्यवसायत्वं बुद्धेर्लक्षणमित्यर्थः। सा च अष्टाङ्गा सात्त्विकतामसभेदात्। तत्र बुद्धेः सात्त्विकं रूपं चतुर्विधं भवति—धर्मः, ज्ञानं विरागः, ऐश्वर्यं च। तत्र धर्मो द्विविधः-अभ्युदयहेतुकः, निश्श्रेयस साधकश्च। दयादानतीर्थव्रततपोयज्ञाद्यनुष्ठानजनितो धर्मोऽभ्युदयहेतुकः। अष्टाङ्गयोगानुष्ठानेश्वरोपासनादिजन्यो निःश्रेयससाधकः। ज्ञानम् प्रकाशः। तदपि द्विविधम्—अभ्यन्तरं बाह्यम्—शिक्षाकल्पव्याकरणनिरुक्तछन्दोज्योतिषेतिषडङ्गसहितवेदपुराणस्मृतिवीणापणवगन्धर्वचित्र कथादि। आभ्यन्तरं प्रकृतिपुरुषविवेकज्ञानम्। तत्र बाह्येन लोकरञ्जनं भवति, आभ्यन्तरेण च मोक्षो जायते। विरागः पुत्रकलत्रधनादिषु रागाभावः। सोऽपि चतुर्विधः यतमान—व्यतिरेक—एकेन्द्रिय—वशीकारसंज्ञभेदात्। तथाचोक्तं योगसूत्रे-'दृष्टानुश्रविकविषयवितृष्णस्य वशीकारो वैराग्यम्'। ऐश्वर्यमीश्वरभावः प्रभुत्वं वा तच्चाष्टविधम्-अणिमा-महिमा-लघिमाप्राप्तिः प्राकाम्य-ईशित्व-वशित्वभेदात्। एतानि धर्मादीनि चत्वारि बुद्धेः सात्त्विकरूपाणि सन्ति। यदा सत्त्वगुणेन रजोगुण-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तमोगुणौ अभिभूतौ भवतः, तदा सत्त्वोद्रिक्तः पुमानेतान् गुणानाप्नोति। किञ्च अस्मात् सात्त्विकाद्धर्मादेः विपर्यस्तं विपरीतम्, अधर्मः, अज्ञानम् अविरागः, अनैश्वर्यञ्च तामसं तमः प्रधानं तमोऽङ्गमात्रजन्यं बुद्धिरूपम्। एवं सात्त्विकतामसभेदादष्टविधायाः बुद्धेः अहङ्कारो जायते।

शब्दादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः।
वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानाम् ॥१४॥

अन्वयः—पञ्चानाम् (ज्ञानेन्द्रियाणाम्,) शब्दादिषु आलोचनमात्रं वृत्तिः, इष्यते, पञ्चानाम् (कर्मेन्द्रियाणाम्) वचनादानविहरणोत्सर्गानन्दाश्च (वृत्तयः) इष्यन्ते ॥१४॥

पञ्चानां पञ्चसंख्याकानां श्रोत्रादीनां ज्ञानेन्द्रियाणां शब्दादिषु शब्दस्पर्शरूपरसगन्धेषु आलोचनमात्रम् आलोचनमेव वस्तुदर्शनमात्र वृत्तिः आसाधारणव्यापारः इष्यते स्वीक्रियते सांख्याचार्यैः। एवं पञ्चानां कर्मेन्द्रियाणां क्रमशः वचनादानविहरणोत्सर्गानन्दाश्च वृत्तयः इष्यन्ते। वचनं भाषणम्, आदानं ग्रहणम् उत्सर्गः मलादित्यागः आनन्दो रतिः। एकैकस्य प्रतीन्द्रियं स्वस्वविषयग्रहणसामर्थ्यम्, तत्र श्रोत्रस्य शब्दे त्वचः स्पर्शे, चक्षुषो रूपे, रसनाया रसे घ्राणस्य गन्धे च सामर्थ्यमस्ति। एवं वागिन्द्रियस्य कर्म वचनं, हस्तस्यादान, पादयोः विहरणम्, पायोरुत्सर्गं (भुक्ताहारपरिणतमलत्यागानुकूलकर्म) उपस्थस्यानन्दः रतिकर्मेति विवेकः ॥१४॥

स्वालक्षण्यं वृत्तिस्त्रयस्य सैषा भवत्यसामान्या।
सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च ॥१५॥

अन्वयः—त्रयस्य स्वालक्षण्यं वृत्तिः, सा, एषा असामान्या (भवति) सामान्यकरणवृत्तिः (तु) प्राणाद्याः पञ्च वायवः (सन्ति) ॥१५॥

त्रयस्य त्रिविधस्यान्तःकरणस्य बुद्ध्यहंकारमनसां स्वालक्षण्यं स्वमसाधारणं लक्षणं धर्मो येषां तानि स्वलक्षणानि (असाधारणलक्षणवन्ति महदहंकारमनांसि) तेषां भावः स्वालक्षण्यम्, यद्वा स्वस्य लक्षणं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्वलक्षणं स्वलक्षणमेव स्वालक्षण्यं स्वस्यासाधारणलक्षणमेव वृत्तिः व्यापारः। तत्र बुद्धेः अध्यवसायो लक्षणमुक्तं स एव बुद्धिवृत्तिः, अभिमानोऽहंकारस्य लक्षणमुक्तं स एवाहंकारवृत्तिः, सङ्कल्पः मनसो लक्षणमुक्तं स एव मनसो वृत्तिः। सैषा सेयं अनामाल्या वृत्तिः कुलस्त्रीवत् असाधारणो व्यापारः। अत्र च सामान्यकरणवृत्तिः करणानां वृत्तिः करणवृत्तिः सामान्या चासौ करणवृत्तिः सामान्यकरणवृत्तिः सर्वेषामिन्द्रियाणां साधारणी वृत्तिः। प्राणद्या प्राणा आद्या येषां ते प्राणाद्याः प्राणापानसमानोदानव्यानाख्याः पञ्च वायवः पञ्च प्राणा इत्युच्यन्ते। प्राणो नाम मुखनासिकान्तरगोचरो वायुः, तस्य यत् स्पन्दनं कर्म तत् त्रयोदशविधस्य साधारणी वृत्तिः। यथा कस्मिंश्चिद्राजगृहे पञ्जरे शुकाः प्रतिवसन्ति, तेभ्यो देवदत्तेनोदनः प्रदर्शितः तं दृष्ट्वा सर्वे प्रचलिताः तदा पञ्जरकमपि प्रचलितम्। यत् पञ्जरस्य प्रचलनं कर्म तत् सर्वेषां शुकानां सामान्यं कर्म। तथा प्राणे यत् स्पन्दनं कर्म तत् सर्वेषामिन्द्रियाणां सामान्यं कर्म। एक एव प्राणवायुः क्रियाभेदाद् विभिन्नस्थानभेदाच्च पञ्चधा भिद्यते। तथा हि—हृदि प्राणो गुदेऽपानः समानो नाभिमण्डले। उदानः कण्ठवृत्तिः स्याद् व्यानः सर्वशरीरगः।' प्राणनात् प्राणः, मलमूत्रादेरपनयनात् अपानः, आहारादीनां रसानां नाडीषु समं नयनाद् समानः, उन्नयनादादुदानः, आकेशान्तं समस्तं शरीरं व्याप्य अनति चलतीति व्यानः॥१५॥

न विना भावैर्लिङ्गं न विना लिङ्गेन भावनिर्वृत्तिः।
लिङ्गाख्यो भावाख्यस्तस्माद् द्विविधः प्रवर्तते सर्गः॥१६॥

अन्वयः—भावैः, विना लिङ्गं न (भवति) लिङ्गेन विना भावनिर्वृत्तिः न (भवति) तस्मात्, (कारणात्) भावाख्यः (तथा) लिङ्गाख्यः द्विविधः सर्गः प्रवर्तते।

भोगापवर्गात्मकः पुरुषार्थः त्रयमपेक्षते भोग्यम्, आयतनं साधनं च। तत्र भोग्याः स्थूलाः शब्दादयो विषया भूतानि च, आयतनम् अधिकरणं स्थूलं सूक्ष्मं चेत्युभयं शरीरम्, साधनं—बुद्ध्यादित्रयोदशविधं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

करणं च । तेषु भोग्यायतनरूपेण ख्यातः तन्मात्रसर्गः लिङ्गमित्युच्यते भावाः बुद्धिसर्गं निगद्यते । तथा च भावः धर्माधर्मज्ञानाज्ञानवैराग्याऽवैराग्यैश्वर्यानैश्वर्यैरुपलक्षितं बुद्धिसर्गं विना लिङ्गं लिङ्गसर्गः सम्भवति । एवं लिङ्गेन तन्मात्रासर्गेण सूक्ष्मशरीरेण विना भावाः वृत्तिः भवानां धर्मादीनां निवृत्तिः उत्पत्तिरिति भावनिवृत्तिः धर्मोत्पत्तिः न सम्भवति । यथाग्निना विना नोष्णत्वं, उष्णत्वं विना नाग्निः, एवमेतयो लिङ्गभावयोः गोविषाणवत्, कुमारीस्तनयुग्मवा युगपदुत्पत्तिः । यत्रलिङ्गं तत्र भावाः, तत्र च लिङ्गम् । तस्मात् परस्पराश्रयं विना द्वयोः स्वरूपादेरसंभवात् भावाख्यः भावैः धर्मादिभिराख्यायते इति भावाख्यः बुद्धिसर्गः लिङ्गाख्यः लिङ्गेन आख्यायते इति लिङ्गाख्यः शब्दादितन्मात्रसर्गश्च, द्विविधः=द्विप्रकारकः सर्गः=सृष्टिः, प्रवर्तते=प्रसरति । अन्योऽन्याश्रयमाश्रित्य निर्वहति । न चान्योन्याश्रयो दोष इति वाच्यम्, सर्गप्रवाहस्यानादित्वेन बीजाङ्कुरवदन्योऽन्याश्रयस्य दोषानाधायकत्वात् । यथा प्रथमं बीजमङ्कुरो वेतिनिर्णये नान्योन्याश्रयदोषोऽभ्युपगम्यते, तथैव सर्गप्रवाहस्यानादित्वाच्चान्योऽन्याश्रयदोषः । न च सृष्टिप्रारम्भे भावशरीराणामभावात् कथं तयोः परस्परापेक्षत्वमिति वाच्यम्, तत्र पूर्वकल्पोत्पन्नभावलिङ्गसंस्कारवशाद्भावलिङ्गयोरुत्पत्तिस्वीकारेणादोषात् । प्राचीनकल्पे एवं प्राचीनतरकल्पोत्पन्नभावलिङ्गवासनावशात् सर्गः । तथा च सर्गप्रवाहस्यानादित्वात् परस्परापेक्षसर्गद्वयोत्पत्तिरव्याहतेति सर्वमवदातम् ।

एवञ्च भोगः पुरुषार्थः भोग्यान् शब्दादीन् भोगायतनं शरीरद्वयं च विना न सम्भवतीति तन्मात्रसर्गः । एवं पुरुषार्थो भोगो भोगसाधनेन्द्रियाणि बुद्ध्यादीन्यन्तःकरणानि विना च न सम्भवतीति बुद्धिसर्गः । तथा चापवर्गोऽपि पुरुषार्थः उभयविधसर्गं विना न सम्भवतीत्युभयविधसर्गस्वीकार अत्यावश्यकः ॥१६॥

इत्येषः प्रकृतिकृतो महदादिविशेषभूतपर्यन्तः ।
प्रतिपुरुषविमोक्षार्थं स्वार्थ इव परार्थ आरम्भः ॥१७॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अन्वयः—इति एषः प्रकृतिकृतः महादादिविशेषभूतपर्यन्तः, स्वार्थ इव प्रतिपुरुषविमोक्षार्थं परार्थः आरम्भः (भवति।) ॥१७॥

इत्येषः = पूर्वं प्रदर्शितः महदादिविशेषभूतपर्यन्तः = महत्तत्त्वमारभ्य स्थूलभूत पर्यन्तः त्रयोविंशतितत्त्वात्मकः लिङ्गसर्गः प्रकृतिकृतः प्रकृत्या कृतः प्रकृतिकृतः प्रधानोपादानकः।

ननु किमर्थमयमारम्भः प्रधानस्य ? इत्याह प्रतिपुरुषविमोक्षार्थम् पुरुषं पुरुषं प्रति इति प्रतिपुरुषं तस्य यो विमोक्षः प्रतिपुरुषविमोक्षः तदर्थं प्रतिपुरुषविमोक्षार्थं पुरुषस्य मोक्षदानाय परार्थं परस्य पुरुषस्यार्थे प्रयोजने स्वार्थं इव आरम्भः आरभ्यते इत्यारम्भः सर्गः। यथा कश्चित्स्वार्थमिव मित्रार्थं करोति तथैव स्वार्थमिव प्रधानं पुरुषार्थं करोति। यथा वा भार्या अहं पुरुषेण भोग्या भवामीति स्वकर्मभोगरूपे स्वार्थे प्रवर्तते तथैव प्रकृतिरपि पुरुषायापवर्गो मया दातव्य इति बुद्ध्या पुरुषविमोक्षार्थे प्रवर्तते तथा च प्रथमं प्रकृतिः भोगं प्रदाय पश्चान्मोक्षं ददातीति परोपकारबुद्ध्या पुरुषस्य भोगापवर्गार्थे प्रकृत्या एव क्रियते सर्गः, नान्येन वा केनचित्।

तथा च प्रकृतिरेवास्य सर्गस्योपादानं कारणमतः सैव कर्त्री, न तु चेतनः पुरुषोऽस्य सर्गस्य अधिष्ठातृत्वेन कर्ता संभवति, निर्व्यापारस्यास्याधिष्टातृत्वासंभवात्। नापि ब्रह्मोपादनकः सर्गः, तस्यापरिणामित्वेनोपादानकारणत्वासम्भवात्. नापि स्वाभाविकः सर्गः सम्भवति, विपरीतगुणदोषप्रसंगात्। नवाऽसत्कारणं सर्गस्य भवितुमर्हति तस्याकस्मिकत्वापत्तेः। तस्मात्त्रिगुणात्मिका प्रकृतिरेव त्रिगुणात्मकमिदं जगज्जनयतीति सिद्ध्यति।

यथा लोके ओदनकामतया ओदनपाके प्रवृत्तः पाचक ओदनसिद्धौ तद्व्यापाराद् विरमते तथैव प्रत्येकं पुरुषम् मोचयितुं प्रवृत्तये प्रकृतिः यं पुरुषं मोचयति, न सा तं प्रति प्रवर्तते तदर्थं तस्याः कर्तव्यस्य शेषत्वात्।

एतेन प्रकृतिकृतश्चेदयं सर्गस्तर्हि नित्यायाः प्रवृत्तिशीलायाः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रकृते, कदाचिदपि स्वव्यापारादुपरमाभावात् सर्वदैव सर्गः स्यादिति कस्यापि पुरुषस्य मुक्तिर्न सम्भवतीत्यपास्तम् । तस्मात्प्रकृतिरेवास्य सर्गस्य कर्त्री, नेश्वरो, नापि ब्रह्म, न वा स्वभावः, न चासत्त्वमिति सिद्धान्तः सम्पन्नः ॥१७॥

एवं तत्त्वाभ्यासान्नाऽस्मि न मे नाहमित्यपरिशेषम् ।
अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम् ॥१८॥

अन्वयः—एवम् तत्त्वाभ्यासात्, 'न अस्ति' 'न मे' 'न अहम्' इति अपरिशेषम्, अविपर्ययात् विशुद्धम्, केवलं ज्ञानम् उत्पद्यते ॥१८॥

एवम्=इत्थं पूर्वदर्शितसमस्तव्यस्ताभयरीत्या तत्त्वाभ्यासात् तत्त्वानां पञ्चविंशतिपदार्थानाम् अभ्यासः पुनः पुनः पुनरनुसन्धानम् इति तत्त्वाभ्यासः तस्मात् तत्त्वाभ्यासात् तत्त्वाज्ञानाभ्यासात् नास्मि नाहं व्यापारवान्, किन्तु इन्द्रियादेरन्तःकरणानां चेमे व्यापाराः । अत एव नाहं=अहं न कर्ता, न चास्ति भोक्ता, अथवा न अहं पुरुषोऽस्मि अप्रसवधर्मी । अतो न मे मन बुद्ध्यादिभिः सह सम्बन्धोऽनास्ति, प्रसवधर्मित्वेन तेषां परिणामित्वात् । इति इत्येवम् ईदृशम् अपरिशेषं समस्तपदार्थविषयकम् अविपर्ययाद् विशुद्धं मिथ्याज्ञानवासनोन्मूलनक्षमं यथार्थं केवलं=कैवल्यप्रयोजकं ज्ञानं तत्त्वज्ञानसाक्षात्कारः उत्पद्यते जायते । तथा चोक्तप्रकारेण पञ्चविंशतितत्त्वविषयज्ञानाभ्यासात् सत्त्वपुरुषान्यतासाक्षात्कारि भ्रमसंशयविकल्परहितं प्रमात्मकं पुरुषार्थप्रयोजकं ज्ञानमाविर्भवति ॥१८॥

सम्यग्ज्ञानाधिगमाद् धर्मादीनामकारणप्राप्तौ ।
तिष्ठति संस्कारवशाच्चक्रभ्रमिवद् धृतशरीरः ॥१९॥

अन्वयः—सम्यग्ज्ञानाधिगमात्, धर्मादीनाम् अकारणप्राप्तौ (अपि) संस्कारवशात् चक्रभ्रमिवत् धृतशरीरः (सन्) तिष्ठति ॥१९॥

सम्यग्ज्ञानाधिगमात्=तत्त्वसाक्षात्कारोदयात् आहोस्वित् सम्यक्=सम्यक् प्रकारेण ज्ञानाधिगमात् विवेकख्यातिप्राप्तेः धर्मादीनां=धर्माधर्मज्ञानाज्ञानवैराग्यावैराग्यैश्वर्यानैश्वर्याणाम् अकारण-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्राप्तौ=दग्धबीजवद्कारणत्वंप्राप्तौ सत्यां संस्कारवशात्=संस्क्रियन्ते भोगा आरभ्यन्तेऽनेनेति संस्कारो देहारम्भकादृष्टं तद्वशात् चक्रभ्रमि-वत्=चक्रभ्रमिरिव धृतशरीरः,धृतं शरीरं येन स धृतशरीर=अवि-मुक्तकलेवरः सन् पुरुषः तिष्ठति=विवेकज्ञाने जातेऽपि प्रारब्धकर्म-फलपरिपाकपर्यन्तं जीवन्नेव तिष्ठति, सद्यो विमुच्यते। यथा कुलाल-व्यापारे निवृत्तेऽपि वेगवशात् किञ्चित् कालं कुलालचक्रं भ्रमदेव तिष्ठति तथा पूर्वकृतयोः धर्माधर्मयोर्बलवत्त्वाद् दुर्बलत्वाच्च ज्ञानस्य उत्पन्नेऽपि ज्ञाने कर्मवशात् पुरुषः शरीरं धारयन् तिष्ठति।

अयं भावः—यथेह लोके बीजानि अग्निदग्धानि न प्ररोहसम-र्थानि भवन्ति, तथा यदा पुरुषेण पञ्चविंशतितत्त्वज्ञानमधिगतं भवति तदा धर्मादीनि अकारणानि प्राप्तानि पुनर्जन्मसमर्थानि न भवन्ति। अतएव "तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये" इति श्रुति-रपि संगच्छते ॥१९॥

प्राप्ते शरीरभेदे चरितार्थत्वात् प्रधानविनिवृत्तौ।
ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति ॥२०॥

अन्वयः—शरीरभेदे प्राप्ते (सति भोगापवर्गयोः) चरितार्थ-त्वात् प्रधानविनिवृत्तौ (सत्याम् पुरुषः) ऐकान्तिकम् आत्यन्तिकम् उभयं कैवल्यम् आप्नोति ॥२०॥

शरीरभेदे व्यक्ताव्यक्तज्ञानां विवेकेन तत्वज्ञाने जाते संचित-कर्मणां दग्धतया बीजभावस्य विनाशात् प्रारब्धकर्मणां भोगेन समाप्तौ सत्यां धृतशरीरस्य पाते जाते सति चरितार्थत्वात् चरितौ निर्वर्तितौ भोगापवर्गात्मकौ अर्थौ यस्या चरितार्था तस्या भावः चरितार्थत्वं तस्मात् चरितार्थत्वात्=कृतप्रयोजनत्वात् प्रधानविनिवृत्तौ प्रधानस्य विनिवृत्तिः प्रधानविनिवृत्तिः तस्यां प्रधानविनिवृत्तौ प्रकृतिवियोगे सति पुरुषः ऐकान्तिकं एक एव अन्तः यस्य तदेकान्तम् एकान्तमेवै-कान्तिकम् अवश्यंभावि ध्रुवमित्यर्थः। आत्यन्तिकम् अत्यन्तमेवात्य-न्तिकम्। अविनाशि चेत्युभयं। द्विविधं कैवलस्य आत्मस्वरूपस्य भावः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कैवल्यम्। दुःखत्रयनिवृत्तिरूपंमोक्षं प्राप्नोति लभते। तथा चोत्पन्नात्मसाक्षात्कारवान् पुरुषः प्रक्षीणाशेषकल्मषः भोगेन प्रारब्धंकर्मणः क्षये सतिः स्वरूपावस्थानं लभते। वस्तुतो मुक्ति तु प्रकृतिरेव विन्दते, पुरुषस्तु स्वरूपप्रतिष्ठो भवति।

इदमस्य तात्पर्यम्—यदा पूर्वक्तयोः धर्माधर्मयोः क्षयो भवति, तदा शरीरं भिद्यते, तस्मिंश्च भिन्ने यत् पार्थिवं तत्त्वं तत् पृथिवीं प्रविशति, एवमन्यानि तत्त्वान्यन्येषु स्वकारेणषु प्रविशन्ति। प्रधानञ्च कृतप्रयोजनं सद् भूयोऽन्यत् शरीरं नारभते। पुरुषश्चैकान्तिकमात्यन्तिकञ्च कैवल्यं लभते ॥२०॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीः ॥

वेदान्त-सार

(प्रश्नोत्तरात्मकः)

प्रश्नः—किं नामानुबन्धचतुष्टयम् ? कतिविधश्च तत् ? वेदान्तसारस्य कानि अनुबन्धानीति समासेन निर्दिशत ?

उत्तरम्—येन ग्रन्थाध्ययने अध्येता प्रवर्तते तदनुबन्धम् । यथा हि ग्रन्थाध्ययनात् प्रागेव पाठको जिज्ञासते—(१) केनायं ग्रन्थः पठितव्य ? (२) किमस्य विषयम् ? (३) अस्याध्ययनस्य किं प्रयोजनम् ? (४) किं वास्य ग्रन्थस्य तेन विषयेण सम्बन्धः ? इति । आसां जिज्ञासानां शान्त्यनन्तरमेवाध्येताऽध्ययनाय प्रवर्तते । एतदेवानुबन्धम् । कस्यापि विषयस्यानुबन्धज्ञानमृते न ह्यध्ययनाय प्रवृत्तिर्जायते । यदुक्तम्—

'प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते ।'

अथवा—'ज्ञातार्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्तते ।
ग्रन्थादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः ॥' इति ।

अयम् अनुबन्धो चतुर्विधो भवति । यथोक्तम्—'तत्रानुबन्धो नामाधिकारिविषयसम्बन्धप्रयोजनानि ।' इति ।

अधिकारी—'अधिकारी तु विधिवदधीतवेदवेदाङ्गत्वेनापाततोऽधिगतवेदार्थोऽस्मिन् जन्मनि जन्मान्तरे वा, काम्यनिषिद्धवर्जनपुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमाता ।' इत्यधिकारिनिर्देशो वेदान्तसारे ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अस्यार्थः—स एव वेदान्तशास्त्रीयस्यास्य ग्रन्थस्याधिकारभाग् भवति—

(१) येन षडङ्गसहितं वेदम् इह जन्मनि जन्मान्तरे वा विधिपूर्वकम् अधीतम् (संस्कारलाभात् जन्मान्तरमप्युक्तम्)।

(२) येन काम्यानि निषिद्धानि च कर्माणि त्यक्तानि। शुभाशुभफलेच्छाभावात्।

(३) यः नित्यानि, नैमित्तिकानि, प्रायश्चित्तोपासनानि, अनुष्ठानानि च यथाकालं विधिवदाचरति। तेनान्तःकरणस्थकालुष्यक्षालनसम्भवः।

(४) साधनचतुष्टयेन—नित्यानित्यवस्तुविवेक—इहामुत्रफलभोगविरागशमादिषट्कसम्पत्तिमुमुक्षत्वं सम्पन्नः। तत्र शमादीनि—शमो दम उपरतिः तितिक्षा समाधानं श्रद्धा च।

एवं गुणगणविशिष्टः प्रमाता एवाधिकारी।

विषयः—विषयो जीवब्रह्मैक्यं शुद्धचैतन्यं प्रमेयम्, तत्रैव वेदान्तानां तात्पर्यात्।' इति सदानन्दस्वामिवर्याः। व्यष्टिसमष्टिगताज्ञानविजृम्भितं किञ्चिज्ज्ञत्वसर्वज्ञत्वादिविरुद्धनानाधर्मं परित्यज्य अवशिष्टं नित्यशुद्ध-बुद्धस्वरूपं शुद्धचैतन्यं तदेवास्य वेदान्तस्य विषयः उपनिषदादिप्रतिपाद्यत्वात्।

सम्बन्धः—ग्रन्थस्यास्य प्रमेयं यत् शुद्धचैतन्यं तस्य तत्प्रतिपादकोपनिषत्प्रमाणस्य च बोध्यबोधक भावोऽत्र सम्बन्धः।

प्रयोजनम्—प्रयोजनन्तु तद्गताज्ञाननिवृत्तिपूर्वकस्वरूपानन्दावाप्तिः।

प्रश्नः २—वेदान्तसारस्याधिकारिणो निरूपणं कुरु।

उत्तरम्—उपनिषत्प्रमाणत्वाद् वेदान्तशास्त्रस्य (प्रकृत-ग्रन्थस्य सारस्य वा) स एवाधिकार्यस्ति, य उपनिषदाम् अधिकारी कथ्यते। तथापि वेदान्तसाराख्ये ग्रन्थे अधिकारिणो निरूपणं कृतम्। तद्यथा—

'अधिकारी तु विधिवदधीतवेदवेदाङ्गत्वेनापाततोऽधिगतवेदा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

र्थोऽस्मिन् जन्मनि जन्मांतरे वा, काम्यनिषिद्धवर्जनपुरस्सरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमाता।' इति।

तत्र इह जन्मनि वेदवेदाङ्गाध्ययनेन वेदान्तज्ञाने सारल्यं, जन्मान्तरे वेदवेदाङ्गध्ययनेन संस्कारलाभः तेन वेदार्थज्ञाने सारल्यं तेन च, वेदान्तशास्त्रविषयिणी जिज्ञासा सम्भवः। काम्यानां कर्मणां (यथा स्वर्गप्राप्त्यै ज्योतिष्टोमादीनि) तथा च निषिद्धकर्मणां (यथा ब्रह्महत्या-सुरापानादयः) सर्वथा परित्याग एवोचितः। काम्यनिषिद्धकर्मणान्तु सर्वथा परित्यागेनैव वेदान्ताधिकारसिद्धिः सम्भाव्यते।

नित्यकर्माणि (यथा सन्ध्यावन्दनादीनि), नैमित्तिकानि (यथा जातेष्ट्यादीनि), प्रायश्चित्तानि (यथा चान्द्रायणादीनि), उपासनानि (यथा शाण्डिल्यविद्यादीनि) यो नित्यमेव सम्पादयति स एव वेदान्ताधिकारभाग्भवति।

साधनचतुष्टयम्—(१) नित्यानित्यवस्तुविवेकः, (२) ऐहिकपारलौकिकफलभोगविरागः, (३) शमादिकषट्कसम्पत्तिः, (४) मुमुक्षुत्वम्—इति एतत् साधनचतुष्टयमिति कथ्यते। तत्र नित्यानित्यवस्तुविवेकस्तु—यथा ब्रह्मैव नित्यं तत्त्वं ततोऽन्यद् निखिलं चराचरं जगत्स्थं वस्तु अनित्यं विनाशशीलत्वात् परिवर्तनशीलत्वाद् वा। अस्यैव ज्ञानस्य वेदान्तशास्त्राधारत्वं कल्प्यते।

ऐहिकामुष्मिकफलभोगविरागस्तावत्—अखिलकर्मफलनिरपेक्षत्वम्। सर्वेषामेव फलानां विनाशित्वम् (पूर्णे जाते तु पुण्यफले स्वर्गादपि भ्रंशसम्भवः), इति फलोपभोगनिरपेक्षत्वमेवोचितम्।

शमादयो यथा—शमो, दमः, उपरतिः, तितिक्षा, समाधानः, श्रद्धा च। शब्दस्पर्शादिविषयेभ्यो मनसः निग्रह एव शम इत्युच्यते। विषयेभ्यो बाह्येन्द्रियाणां निरोधस्तु दमः। निवृत्तानां बाह्यान्तःकरणानां पुनः प्रवृत्तिनिरोध एवोपरतिः। शतोष्णसुखदुःखादीनामात्मन्यत्यन्ताभाव इति मतिं कृत्वा तेभ्यो निरपेक्षत्वं तितिक्षा। शब्दादिवि-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

षयेभ्यः प्रतिनिवृत्तस्य मनसः सच्छास्त्रश्रवणमननादौ योजनं समाधानम् । वेदान्तोपकारकवाक्येषु (गुरुवाक्येषु, उपनिषद्गीता-शारीरकसूत्रेषु च) विश्वासः श्रद्धा च ।

मुमुक्षुत्वञ्च मोक्षेच्छा । संसारस्य दुःखमयत्वं विनाशित्वञ्च मनसि कृत्वा नित्ये, शुद्धे, आनन्दस्वरूपिणि परब्रह्मणि बुद्धिं निवेश्य नितराम्मोक्षायेच्छा मुमुक्षुत्वम् ।

एवं विधगुणगणविभूषितः प्रमाता एव वेदान्तसारज्ञानाधिकारभाग्भवति । यथोक्तम्—

'प्रशान्तचित्ताय जितेन्द्रियाय प्रहीणदोषाय यथोक्तकारिणे ।
गुणान्वितायानुगताय सर्वदा, प्रदेयमेतत् संततं मुमुक्षवे ॥' इति

प्रश्नः ३—वेदान्तसारानुसारं साधनचतुष्टयं व्याख्येयम् ।

उत्तरम्—वेदान्तसारस्याधिकारिनिरूपणप्रसङ्गे साधनचतुष्टयमुल्लिखितमस्ति । तत्र—१. नित्यानित्यवस्तुविवेकः, २. इहामुत्रफलभोगविरागः, ३. शमादिषट्कसम्पत्तिः, ४. मुमुक्षुत्वम्—इति मिलित्वा साधनचतुष्टयमिति कथ्यते । साधनचतुष्टयसम्पन्न एव वेदान्ताध्ययनाधिकारभाग् भवतीति तात्पर्यार्थः ।

१. नित्यानित्यवस्तुविवेकः—वेदान्तानुसारं ब्रह्मैव नित्यं वस्तु ततोऽन्यदखिलम् एतत् चराचरात्मकं जगदनित्यम् । प्रत्यक्षानुमानश्रुत्यादिप्रमाणैः प्रमेयमेतत् सिद्धमेव ।

ब्रह्मणो नित्यत्वेऽत्र श्रुतिवाक्यानि—

१ नित्यं विभुः सर्वगतं सुसूक्ष्मम् ।

२. अजो नित्यः शाश्वतोऽयं पुराणः ।

३. एकं सद्विप्राः बहुधा वदन्ति ।

तदितरानित्यत्वे यथा—

१. यो वै भूमा तदमृतम्, यदल्पं तन्मर्त्यम् ।

२. आत्मा वा इदमेक एवाग्र आसीत् नान्यत् किञ्चन मिषत् ।

३. नेह नानास्ति किञ्चन ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इत्यादिश्रुतिप्रमाणैर्नित्यत्वविवेकः। तथा च प्रत्यक्षप्रमाणेनापि अनित्यत्वं जगतः पुष्टिमाप्नोति। अनुमानश्चात्र—यद्यद् उत्पत्तिमान् तत्तदनित्यम्, यथा शरीरम्। अथवा यद्यत् प्रत्यक्षगोचरं तत्तदनित्यम् इति।

२. इहामुत्रफलभोगविरागः—कर्मजन्यफलस्वरूपत्वाद् भोगं जन्यम्, तथा च यद्यज्जन्यं तत्तदनित्यमिति प्रमाणात् स्वर्गीयफलभोगमप्यनित्यम्। यद्यदनित्यं तत्तत् प्रवृत्तिकरं दुःखकरञ्चेति विवेकात् कर्मफलभोगं निरपेक्षत्वम् अपेक्षते वेदान्तशास्त्राधिकाराय।

३—शमादिषट्कसम्पत्ति—शमादयस्तु—शमो दम उपरतिस्तितीक्षा समाधानः श्रद्धा च। तत्र—

शमः—सांसारिकभोगविषयेभ्यो बलाद..ण मनसः श्रवणमननिदिध्यासनादिभ्यः संयोजनं 'शद' इत्यभिधीयते। यथा हि भोग्यपेयानि बुभुक्षापिपासानिवृत्तिसाधनभूतानि सन्ति, तथैव श्रवणमननादयः तत्त्वज्ञानस्य। अतो श्रवणादिव्यतिरिक्तविषयेभ्यो मनः बलादाकृष्ण भूयोभूयः तत्त्वज्ञानसाधनभूतेषु श्रवणमननिदिध्यासनादिषु नियोज्यते। एवं तत्त्वज्ञानाय रुचिर्जायते।

दमः—श्रवणमननादिव्यतिरिक्तविषयेभ्य इन्द्रियाणां निरोधो दम इत्यभिधीयते। यथा हि मनसः सांसारिकविषयेभ्यः प्रवृत्तिः तथैवेन्द्रियाणामपि, इति भूयोभूयः विषयान् प्रति आकृष्टानाम् इन्द्रियाणां निग्रहो दम इति।

उपरतिः—सांसारिकविषयेभ्यो निग्रहीतानाम् इन्द्रियाणां यया वृत्त्या पुनः प्रवृत्तिंनिरोधः क्रियते सा वृत्तिः उपरतिरिति कथ्यते। अथवा गृहस्थादिभ्यो विहितानां नित्यनैमित्तिकादिकर्मणां संन्यासाश्रमस्वीकारेण विधिना परित्यागः उपरतिः।

मुमुक्षूनां कृते संन्यासमत्यावश्यकमिति श्रुति-स्मृतिषु बहुधा प्रतिपादितम्। यथा—'नकर्मणा न प्रजया धनेन त्यागेनैकेन अमृतत्व-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मानशुः'— इति श्रुतिः, 'नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति' इति च स्मृतिः।

तितीक्षा—शतोष्णमानापमानजन्यसुखदुःखयोर्यदनुभवः, तत् शरीरधर्मं न आत्मनः इति मतिं कृत्वा तेष्य औदासीन्यं तितीक्षा।

समाधानम्—समाधिरिति यावत्। शब्दादिविषयेभ्यो निग्रहीतस्य वशीकृतस्य च मनसो ब्रह्मज्ञानसाधनभूतश्रवणमननादौ योजनं समाधानम्।

श्रद्धा—गुरुवाक्येषु च विश्वासः श्रद्धा।

४. मुमुक्षुत्वम्—मोक्षस्येच्छा मुमुक्षा, मुमुक्षा अस्ति यस्य स मुमुक्षुः, तस्य भावो मुमुक्षुत्वं वेदान्तशास्त्रस्याधिकारार्थं अत्यावश्यकम्, तस्य मोक्षफलत्वात्।

प्रश्नः ४—

'प्रशान्तचित्ताय जितेन्द्रियाय, प्रहीणदोषाय यथोक्तकारिणे।
गुणान्वितायानुगताय सर्वदा, प्रदेयमेतत् सततं मुमुक्षवे॥'

पद्यमेतत् सम्यग्व्याख्येयम्।

उत्तरम्—पद्यमेतद् उपदेशसाहस्र्यां पठितमस्ति। श्रीमता सदानन्दयोगिना वेदान्तसारस्याधिकारिनिरूपणप्रसङ्गे तत उद्धृतम्। तथा हि—"अधिकारी तु विधिवदधीतवेदवेदाङ्गत्वेनापाततोऽधिगतवेदार्थोऽस्मिन् जन्मनि जन्मान्तरे वा, काम्यनिषिद्धवर्जनपुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपासनाऽनुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमाता।" उक्तं च—

'प्रशान्तचित्ताय जितेन्द्रियाय प्रहीणदोषाय यथोक्तकारिणे।
गुणान्वितायानुगताय सर्वदा प्रदेयमेतत्सततं मुमुक्षवे॥'

इति प्रसङ्गनिर्देशेनैव स्पष्टमेतत्। यथा हि प्रशान्तचित्तायेत्यादिवाक्यस्यार्थं पूर्वोक्तपदार्थसमर्थनमेव। तद्यथा—

प्रशान्तचित्ताय—प्रकर्षेण शान्तः प्रशान्तः, प्रशान्तम् चित्तम्=अन्तःकरणं, यस्य सः प्रशान्तचित्तः, तस्मै=शान्तमानसाय। जिते-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

न्द्रियाय—जितानि=वशीकृतानि, इन्द्रियाणि=बाह्यकरणानि, येन तस्मै=निग्रहीतेन्द्रियाय । प्रहीणदोषाय—प्रकर्षेण हीनाः=त्यक्ताः ("त्यक्तं हीनम्" इत्यमरः ।), दोषाः=कल्मषाः, येन सः=क्षीणकल्मषाय । यथोक्तकारिणे=काम्यनिषिद्धवर्जनपुरःसरं ······ इत्याद्यत्र-भ्योक्तानुसारं, सच्छास्त्रानुसारं करोति=आचरति, तस्मै । गुणान्विताय=शमादिगुणयुक्ताय । अनुगताय=गुरोरनुकूलाचरणयुक्ताय । मुमुक्षवे=मोक्षाभिलाषिणे । सर्वदा=सदा । संततं=निरन्तरम् । एतत्=ब्रह्मज्ञानम् । प्रदेयम्=प्रदातव्यम् । इति ।

एवमत्र तात्पर्यम् अवसितम्—उपदेशसाहस्र्यामुक्तं वाक्यं सदानन्दयोगिनोक्तपदार्थमेव संक्षिप्तं निर्दिश्यते ।

प्रश्नः—(५) "अयमधिकारी जननमरणादिसंसारानलतप्तो दीप्तशिरा जलराशिमिवोपहारपाणिः श्रोत्रियं ब्रह्मनिष्ठं गुरुमुपसृत्य तमनुसरति ।"

वाक्यमेतद् व्याख्येयम् ।

उत्तरम्—वेदान्तशास्त्रस्य ज्ञानार्थे गुरूपदेशस्य आवश्यकत्वन्तु निर्विवादमेव, गुरूपदेशं विना ज्ञानोदयं नितरामशक्यमेव । इति विचार्य अधिकारिनिरूपणानन्तरं गुरूपसर्पणप्रकारं निर्दिशन्ति सदानन्दयोगिपादाः—अयमधिकारीति ।

अयम् अधिकारी="अधिकारी तु विधिवदधीतवेदवेदाङ्गत्वेन ·········साधनचतुष्टयसम्पन्नः प्रमाता" इत्यादिपंक्तिभिर्निर्दिष्टगुणसम्पन्नो वेदान्ताधिकारभाक् ।' जननमरणादिसंसारानलतप्तः='पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम्' इत्यादि पंक्तिभिः कथितं पुनः पुनर्जन्मग्रहणात् संसारचक्रजन्यदुःखसन्तप्तः । दीप्तशिरा जलराशिमिव=प्रखरतरसूर्यकिरणौष्ण्यपीडितो मनुष्यः स्वक्लान्तिमपनुनुत्सुः सरोवरमिव । उपहारपाणिः='समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्' (मुण्डक० १–२–१२) इति, 'रिक्तपाणिर्न पश्येत राजानं देवतां गुरुम्' इति च श्रुतिस्मृतिवचनमनुसृत्य सश्रद्धं स्वशक्त्यनुसारं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वा पत्रपुष्पाद्युपहारं पाणौ कृत्वा । श्रोत्रियम्=साङ्गवेदज्ञं वेदान्तविद्यानिष्णातम् । ब्रह्मनिष्ठम्='अहं ब्रह्मास्मि' इत्यादि वेदान्तवाक्यानुसारं सर्वं ब्रह्ममयं पश्यन्तम् । गुरुमुपसृत्य=गुरुसमीपं गत्वा । तमनुसरति=तदुपदिष्टः सन् मनसा वाचा कर्मणा च तं वरिवस्यति इति ।

एवमयमत्र तात्पर्यः । यदा जिज्ञासुः संसारस्य असारतां दुःखमयत्वञ्चावलोक्य पुत्रः पुनर्जननमरणादिकं व्याधिवृद्धत्वादिजन्यं ममत्वपरत्वादिजन्यं वा दुःखमवगत्य सुतरां सन्तप्तो भवति तदा परमपिपासुरिव सरोवरं, परमशान्तिकामनया मोक्षेच्छया वा श्रद्धया उपहारपाणिः ब्रह्मनिष्ठं श्रोत्रियं गुरुम् उपसृत्य तस्यान्तेवासी भूत्वा तस्यानुसरणं कर्तव्यम् ।

प्रश्नः ६—"वस्तुन्यवस्त्वारोपोऽध्यारोपः" : इतिवाक्यांशो व्याख्येयः ।

उत्तरम्—अतस्मिस्तद्बुद्धिरारोपः । कस्मिश्चद्वस्तुनि तत्समानावस्तुभ्रम इति भावः । यथा रज्जौ सर्पस्य शुक्तौ रजतस्य वा भ्रमः । अन्धकारपतितरज्जुदर्शकस्य रज्जुविषयकमज्ञानं सर्पाकारपरिणतिमासादयति किन्तु सावहितरज्जुदर्शनानन्तरं तदज्ञाननिवृत्तौ सर्पभ्रान्तिरपसर्पति । एवं स्वयंप्रकाशानन्तब्रह्मरूपवस्तुनि अज्ञानं तज्जन्यमखिलचराचरप्रपञ्चरूपञ्चावस्तु समभासते किन्तु ब्रह्मरूपवस्तुनि ज्ञाते जगद्रूपावस्तुभ्रान्तिर्निवर्तते । अयमेव ब्रह्मरूपिणि वस्तुनि जगद्रूपावस्तुभ्रमोऽध्यारोपः । अयमेव विवर्तोऽध्यास इति चोच्यते ।

अज्ञान (माया) निरूपणम्—अध्यारोपो वस्त्ववस्त्वपेक्षः । रज्जुसर्पाध्यारोपे रज्जुर्वस्तु सर्पश्चावस्तु । एवं ब्रह्मजगदध्यारोपे स्वयंप्रकाशचैतन्यानन्दस्वरूपं वस्तु अज्ञानं तथा तज्जन्यं दृश्यमानतया सावयवत्वेन च विनश्वरमखिलं जगदवस्तु । एतदेव स्पष्टीकर्त्तुमाह अज्ञानं त्वित्यादिना । अज्ञानस्वरूपम्—तत्र किमित्यज्ञानं नामेति जिज्ञासायां न तत्कमपि परिभाषयितुं शक्यते इति तदनिर्वचनीयमेव

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यत्किंचिदित्युत्तरम् । कथमिति चेद् ? इत्थम्—अज्ञानं न सत् नापि चासत् । सत्त्वे च तस्य सर्वदा सर्वत्र च वर्तमानतया बाधो न स्यात्, किन्तु ब्रह्मबोधानन्तरं तस्य बाधोऽस्तिर्बाधः इति न तत्सत् । न चाप्येतदसत्, तथात्वे च तस्य जडपदार्थाभासकारणत्वानुपपत्तेः (नासत्तस्य वस्तुनः कस्यापि कस्यापि कारणत्वमुपपद्यते) । किञ्च तस्य प्रतीतिर्भवतीति हेतोरपि तस्यासत्त्वं प्रतिपादयितुं न शक्यते । एवञ्च 'तत्सच्चेन्न बाध्येत असच्चेन्न प्रतीयेत' अतः सत्त्वासत्त्वराहित्येनाज्ञानमनिर्वचनीयम् ।

नन्वेवमज्ञानस्यानिर्वचनीयत्वे तस्याभावप्रसङ्ग इत्यत आह-त्रिगुणात्मकमिति । 'अजामेकाम्' इत्यादि श्रुतिभिस्तस्याजत्वसत्त्वरजस्तमोगुणत्वात्मकत्वरूपसत्तावत्त्वप्रतिपादनादिति भावः । नन्वेवमप्याकाशवत्तस्य विभुत्वे संसारात्तदनिवृत्त्यापत्तिरित्यत आह-ज्ञानविरोधीति । अज्ञानस्य तथात्वेऽप्यात्मसाक्षात्कारेण तन्निवृत्तिरिति भावः । यथा चोक्तं गीतायाम्—'मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते' । एवं तस्याज्ञानस्य (मायायाः, अविद्यायाः) त्रिगुणात्मकत्वेऽपि 'इदमित्थम्' 'इयद्धेति' कृत्वा तत्प्रदर्शनासम्भवादाह—यत्किंचिदिति । सर्वशक्तिसम्पन्नं तत् किमपि विचित्रमेव, यतो हि न तत्सत्, नाप्यसत्, न सावयवम्, न निरवयम्, नापि चोभयरूपम् । एवञ्च तस्य सत्त्वेनासत्त्वेन सदसत्त्वेन वा सावयवनिरवयवोभयात्मकत्वेन वा, भिन्नाभिन्नोभयरूपत्वेन वा वक्तुमशक्यत्वेनानिर्वचनीयत्वम् । तस्य ज्ञानञ्च प्रकाशेन तमोदर्शनमिवासम्भवीति । वेदान्तसिद्धान्तमुक्तावल्यामप्यभिहितम्—

अज्ञानं ज्ञातुमिच्छेद्यो मानेनात्यमूढधीः ।
स तु नूनं तमः पश्येद् दीपेनोत्तमतेजसा ॥

एवंभूताज्ञानेऽहमज्ञः, मामहं न जानामीति प्रत्यक्षावभास एव प्रमाणम् । अत एव श्वेताश्वतरोपनिषदि इदमज्ञानम् (माया) 'देवात्मशक्तिं स्वगुणैर्निगूढाम्' (देवस्य स्वयं प्रकाशस्यात्मनः शक्तिम् शक्ति-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वत्परतन्त्राम्, स्वगुणैः शुक्लादिभिः सत्त्वादिभिर्वा निगूढाम् आलिङ्गिताम्) इत्येवंरूपेण प्रतिपादितम् ।

विशेषः—शङ्कराचार्येणाज्ञानार्थेऽविद्या-मायाशब्दौ प्रयुज्य माया भगवतोऽव्यक्तशक्तिरुक्ता । सा सत्त्वरजस्तमोगुणयुक्ता, कार्यानुमेयसत्ता, जगदुत्पादिकाऽनादिशक्तिः—

यथा चोक्तम्—

अव्यक्तनाम्नी परमेशशक्तिरनाद्यविद्या त्रिगुणात्मिका या ।
कार्यानुमेया सुधियैव माया यया जगत्सर्वमिदं प्रसूयते ॥

अपि च—

सेयं भ्रान्तिर्निरालम्बा सर्वन्यायविरोधिनी ।
सहते न विचारं सा तमो यद्वद्दिवाकरम् ॥ ६ ॥

(८) प्रश्नः—अज्ञानस्य स्वरूपं तस्य व्यष्टि-समष्टि-भेदौ च संक्षेपेण निरूप्यताम् ।

उत्तरम्—अज्ञानं तु वेदान्ते पारिभाषिकं शब्दमस्ति । अतो न हि ज्ञानस्याभावः इत्थमयं निर्वचनीयम्, यतो हि अत्राज्ञानं भावरूपमस्ति न तु अभावरूपम् । सत्यपि भावरूपत्वेऽस्य न 'इदमित्थं' रूपेण निर्वचनं कर्तुं न शक्यते । तथापि तत्स्वरूपं व्याख्यातं बहुशो वेदान्ते । तथा हि वेदान्तसारे—'अज्ञानं तु सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि, भावरूपं, यत्किञ्चिदिति वदन्त्यहमज्ञ इत्याद्यनुभवात् ... ।'

अत्रायमर्थः अज्ञानं तु न सत्, नाप्यसत्—'सच्चेन्न बाध्येत असच्चेन्न प्रतीयेत्' इति न्यायात् । तथा चोक्तं श्रीमद्भगवद्गीतायाम्—'नासतो विद्यते भावो नाभावो विद्यते सतः' इति । तदयं यदि सत्स्यात् तर्हि तस्य बाधो न स्यात् भवति च तुरीयावस्थायाम् (मोक्षे) । अतो न तत्सत् । अस्तु तथा, असत् स्याद् इति चेन्न, असतः कदापि भावो न भवति । नायं तथा तस्मान्न तथा असदित्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्रिगुणात्मकं च तदज्ञानं सत्त्वरजस्तमोरूपत्वात्। 'अजामेकां लोहितशुक्लकृष्णाम्' इत्यादि श्रुतेः। सर्वत्र च सुखदुःखमोहावाप्तेः तस्यानुभवात्। ज्ञानविरोधीति ज्ञानेनास्य बाधसम्भवात्। यदा हि ज्ञानाभ्युदयः तदाऽज्ञानस्य सर्वथा निराशयो भवति। यथोक्तम्—'सहते न विचारं सा तमो यद्वद्दिवाकरम्।' सत्यपि ज्ञानविरोधी न हि ज्ञानस्याभावरूपं, अत उक्तं भावरूपम् इति। तथाऽपि 'इदमित्थम्' 'इयद्वेति' वक्तुं न शक्यते, अत एवोक्तं 'यत्किञ्चिदिति'। अथापि अनिर्वचनीयत्वम्—सत्त्वासत्त्वोभयात्मकभिन्नत्वम्, सावयवनिरवयवोभयभिन्नत्वम्, भिन्नाभिन्नोभयभिन्नत्वम्, इत्येवमादिरूपैर्व्याख्यायते।

एवंविधमिदमज्ञानं समष्टिरूपेणैकरूपं व्यष्टिरूपेण चानेकरूपमिति श्रुतिप्रतिपादितम्। 'अजामेकाम्' इत्यादिश्रुतौ एकविधत्वं समष्टिरूपेण। 'इन्द्रो मायाभिः पुरुरूप ईयते' इत्यादिश्रुतौ व्यष्टिरूपेणैकविधत्वम्।

यथा वृक्षाणां भिन्नं, भिन्नजातीयानां सामूहिकरूपेण एकत्वेन वनमिति व्यपदेशः क्रियते, तदेव व्यष्टिरूपेण अनेकत्वेन पृथक् पृथक् आम्रनिम्बादि-व्यवहारो दृश्यते। यथा वा जलानां समष्ट्यभिप्रायेण जलाशय इति एकत्वेन व्यपदेशः। तथैवात्रापि अज्ञाने—प्रतिजीवगतानां नानात्वेन प्रतिभासमानानाम् अज्ञानानां समष्ट्यभिप्रायेणैकत्वव्यपदेशः। तदेव एकत्वेन व्यपदिश्यमानम् अज्ञानं विशुद्धसत्त्वप्रधानं भवति। एतदुपहितं चैतन्यम् उत्कृष्टोपाधिप्रधानतया ईश्वर इति व्यवह्रियते। एतदेव सर्वज्ञः सर्वेश्वरः सर्वनियन्तृरूपेण ज्ञायते। यदा पुनः अज्ञानं व्यष्ट्यभिप्रायेण प्रतिजीवं पृथग् बोध्यते तदा तद् निकृष्टोपाधिप्रधानतया मलिनसत्त्वप्रधानं भवति एतदुपहितं चैतन्यं प्राज्ञ इत्युच्यते।

(९) प्रश्नः—ईश्वरप्राज्ञयोः स्वरूपं निर्दिशत।

अथवा

व्यष्टि-समष्ट्यभिप्रायेण अज्ञानस्योपाधिद्वयी निरूप्यताम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri.

उत्तरम्—"अजामेकां लोहितशुक्लकृष्णाम्" इत्यादिश्रुतिभिः अज्ञानस्यैकत्वे प्रतिपादितेऽपि "इन्द्रो मायाभिः पुरुरूप ईयते" इत्यादिभिः श्रुतिभिः अज्ञानस्य बहुत्वं विवक्षितमिति विरोध उपपद्यते। तदेव परिहर्तुम् अज्ञानस्य व्यष्टिसमष्ट्यभिप्रायेण भेदद्वयं प्रतिपाद्यते।

ईश्वरचैतन्यम्—यथा विविधानाम् आम्रनिम्बपलाशादिवृक्षाणां समूहो वनमिति व्यपदिश्यते, यथा च विविधानां जलानां समूहो जलाशय इति कथ्यते तथैव समष्टिगतमज्ञानमिति। तत्समष्टिभूताज्ञाने रजस्तमोऽनभिभूतस्य सत्त्वगुणस्य प्राधान्यं भवति। एवम्भूत सत्त्वप्रधानाज्ञानसमष्ट्युपहितं चैतन्यं सर्वचराचरप्रपञ्चस्य साक्षितया सर्वज्ञातृत्वेन सर्वज्ञ इति, सर्वेषां जीवानां कर्मफलप्रदायित्वेन सर्वेश्वर इति सर्वेषां च बुद्धिनियामकत्वात् सर्वनियन्ता, सर्वेषाञ्च अन्तःस्थिततया सर्वान्तर्यामीति चोच्यते। अयमेव सम्पूर्णचराचरप्रपञ्चोत्पादकविवर्ताधिष्ठानत्वेनेश्वरश्चोच्यते। एतदेव समष्टिभूताज्ञानोपाध्युपहितं चैतन्यम् ईश्वर इति व्यपदिश्यमानः सन् सामान्यरूपेण सर्वं जानाति न किञ्चित् तदविज्ञातं भवति, अतः 'यः सर्वज्ञः स सर्ववित्' इत्यादि श्रुतिवाक्यमुपपद्यते। तथैव च 'तस्मै सर्वं ततः सर्वं स सर्वं सर्वतश्च सः' इत्यादियोगवासिष्ठवाक्यमपि समष्टिगतं सत्त्वप्रधानाज्ञानोपाध्युपहितं चैतन्यं निर्दिशति।

ईश्वरस्येयं समष्टिः सर्वस्य चराचरस्यास्य जगतः कारणमिति हेतोः कारणशरीरमित्युच्यते, आत्मनः कोशवदाच्छादकत्वाद् आनन्दप्राचुर्याच्चानन्दमयकोश इति च। अस्मिन्नेव जाग्रदवस्थाविशिष्टस्य पञ्चीकृतकार्यस्वरूपस्थूलप्रपञ्चस्य, स्वप्नावस्थाविशिष्टस्य अपञ्चीकृतकार्यस्वरूपस्वाप्नप्रपञ्चस्य लय इति हेतोः सुषुप्तिः (स्थूलसूक्ष्मप्रपञ्चलयस्थानम्) इति चोच्यते।

प्राज्ञचैतन्यम्—यथा वनस्थानां भिन्नभिन्नजातीयानां वृक्षाणां पृथक्त्वेन व्यपदेशे आम्र इति निम्ब इति व्यवहारः। यथा वा सर्वत्र व्याप्तस्याकाशस्य घटाकाश मठाकाश इति पृथक्त्वेन व्यपदेशो भवति,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

थैवं एकस्मिन्नेव अज्ञाने प्रतिजीवपृथक्त्वेन निर्देशे व्यष्टिरूपम् अज्ञा-म् इति बहुत्वव्यवहारः एतदेवाज्ञानम्—'इन्द्रो मायाभिः पुरुरूप यते' इत्यादिश्रुतिभिः प्रतिपाद्यते।

इदमज्ञानं निकृष्टोपाधिप्रधानं भवति । अतोऽत्र रजस्तमोऽभिभूतस्य मलिनसत्त्वस्य प्राधान्यं भवति । एतदज्ञानोपहितं चैतन्य-ल्पज्ञत्वादि-ईश्वरचैतन्यविरुद्धधर्मवान् भवति । तथा हि अयम् अल्प-मनीश्वरमिति, प्रकृष्टेनाज्ञः इत्यर्थे प्राज्ञ इति चोच्यते । किन्तु यथे-रचैतन्यं कारणशरीरम्, आनन्दमयकोशः, सुषुप्तिरित्यादि व्यवहारः याऽत्रापि बोध्यम् । तथोक्तम्—

'लये फेनस्य तद्धर्मा द्रवाद्या स्युस्तरङ्गके ।' इति ।

अतोऽयं प्राज्ञचैतन्यगताज्ञानमपि सुषुप्तिकाले चेन्द्रियाणां बद्-पञाणां च राहित्येन कस्याश्चिदपि असक्तेः अभावाद् आनन्दप्राचु-ण् आनन्दमयम्, प्राज्ञचैतन्याच्छादकत्वेन कोशः स्थूलसूक्ष्मप्रपञ्चल-धारत्वेन सुषुप्तिरिति चोच्यते ।

(१०) प्रश्नः—व्यष्टि-समष्टिरूपाज्ञानयोः ईश्वर-प्राज्ञयोश्च त्त्विकमैक्यं कथमुपपद्यते ? इति विविच्यताम् ।

उत्तरम्—'अजामेकाम्' इति, 'इन्द्रो मायाभिः' इति च श्रुति-तिपादितार्थविरोधनिराशार्थं प्रतिजीवगताज्ञानजनितभिन्न-अहंत्वस-त्वादिप्रतिपादनार्थं च अज्ञानस्य भेदद्वयं प्रतिपादितम्—तद्यथा ष्टिरूपाज्ञानस्य प्रतिजीवभिन्नस्य बहुत्वेन व्यपदेशः, समष्टिगता-ानस्यैकत्वं च । तथा च व्यष्टिगताज्ञानोपाधिविशिष्ट चैतन्यं प्राज्ञ ति समष्टिगताज्ञानोपाधिविशिष्टं चैतन्यम् ईश्वर इति व्यपदिश्यते । स्तुतोऽयं भेद औपाधिक एव न तु वास्तविकः, इति निरूप्यते—

समष्टिव्यष्टिरूपाज्ञानद्वयस्य वनवृक्षवज्जलाशयनदीतडागादि-लवद् वैक्यमिति तदुपहितेश्वरप्राज्ञचैतन्यद्वयस्यापि वनवृक्षावच्छिन्ना-शवदैक्यमिति विवेकः । अत एव माण्डूक्योपनिषदि—"अयमात्मा वेश्वरः" "एष सर्वज्ञः" । "एषोऽन्तर्यामी" त्यादि चोच्यते । ईश्वर-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गताज्ञानस्यैव समष्टिव्यष्ट्यभिप्रायेण भिन्नत्वेन व्यपदिश्यमानस्य वस्तुतो भेदाभावः। वस्तुतो भेदाभावेऽपि संस्कारमात्रावशिष्टे प्राज्ञ गताज्ञाने भेदप्रतीतिः। यथा हि एक एवाकाश घटमठोपाधिभिन्नत्वे सति घटाकाश मठाकाश इति भिन्नवद् व्यवह्रियते, तदेव एकत्वे महाकाश इति समष्ट्यभिप्रायेण निर्दिश्यते। न ह्यत्र घटाकाशमहा काशयोः तात्त्विको भेदः। तथैवात्रापि व्यष्टिगतसमष्टिगताज्ञान वस्तुगत्याऽभिन्नौ सतोऽपि उपाधिभेदेन भिन्नाविव लक्ष्येते। यथा हि प्रतिवृक्षावच्छिन्न आकाशो वनावच्छिन्नाकाशाद् तत्त्वतोऽभिन्न तथैव व्यष्टिसमष्टिगताज्ञानावच्छिन्नचैतन्यौ प्राज्ञेश्वरौ वस्तुतो भिन्नाविव।

(११) प्रश्नः—ईश्वरप्राज्ञयोः स्वात्मानन्दानुभवप्रकारो नि रूपणीयः।

उत्तरम्—समष्टिगताज्ञानोपाध्यवच्छिन्नं चैतन्यम् ईश्वर इति व्यष्टिगताज्ञानोपाध्यवच्छिन्नं चैतन्यं प्राज्ञ इति संज्ञयाऽभिधीयते एतौ ईश्वरप्राज्ञौ स्वात्मानन्दानुभवं कुरुतः। तद्यथा—ईश्वरः प्रलय काले, प्राज्ञश्च सुषुप्तौ एवमुभावप्यानन्दप्राचुर्यात् स्वात्मानन्दमनु भवतः। परमत्रैयं विचिकित्सा स्यात्—प्रलयकाले सुषुप्तौ वा नान्तः करणं न च आनन्दग्राहिका तद्वृत्तिर्वर्तते, तत्कथं तदवस्थयं आनन्दा वाप्तिः इति। एतत्समाधित्सुराह सदानन्दः—"तदानीमेतावीश्वर प्राज्ञौ चैतन्यप्रदीप्ताभिरतिसूक्ष्माभिरज्ञानवृत्तिभिरानन्दमनुभवतः।" इति।

यथा सुखदुःखानुभावयित्री अन्तःकरणवृत्तिर्भवति, तथैव चैतन्य प्रदीप्ताज्ञानस्यापि अतिसूक्ष्मा वृत्तयो भवन्ति, यैः अन्तःकरणवृत्ति रेव ईश्वरप्राज्ञौ आनन्दानुभवः कर्तुं पार्यते। अतः स्वसूक्ष्माज्ञानवृत्ति भिरीश्वरस्तथा प्राज्ञोऽपि प्रलये सुषुप्तौ च स्वस्वरूपानन्दमनुभवतः।

अत्र शयनानन्तरमुत्थितस्य जीवस्य 'सुखमहमस्वाप्सम्' इत्या द्यनुभवो लौकिकं प्रमाणम्, तथा "आनन्दभुक् चेतोमुखः प्राज्ञः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इत्यादि श्रुतिप्रमाणम् । एतैः प्रमाणैर्ज्ञायते यत्सुषुप्तौ प्राज्ञः स्वात्मानन्दमनुभवति इति ।

वस्तुतस्तु अग्नेरौष्ण्यमिव ज्ञानं जीवात्मनो नैसर्गिक एव गुणः । यथा औष्ण्यं विना वह्निः स्थातुं न शक्नोति, तथैव ज्ञानं विना जीवात्माऽपि न तिष्ठति । अत एव सुषुप्तिदशायामपि ज्ञानस्योपपत्तिः । तथापि सुषुप्तिदशायां बाह्यकरणवृत्तीनां विश्रान्तत्वाद् आत्मनो बाह्यज्ञानं न भवति परन्तु तद्दशायाम् आत्मानन्दानुभवरूपमान्तरिकं ज्ञानं जायते । इति सर्वं स्पष्टम् ।

(१२) प्रश्नः—अज्ञानस्य शक्तिद्वयं निरूप्यताम् ।

उत्तरम्—आत्मनः स्वप्रकाशत्वं चैतन्यस्वरूपे च अनेकत्र निरूपितम् । तथापि तस्य स्वविषयकाज्ञानं प्रत्यक्षसिद्धमेव इति सर्वथा विरुद्धमिवेतत् प्रतिभाति, अतोऽज्ञानमत्र कारणत्वेन निरूप्यते । अज्ञानवशाज्जीवात्मनो भ्रान्तिरिति दर्शयितुं तस्य शक्तिद्वयं निरूप्यते—आवरणशक्तिर्विक्षेपशक्तिश्च ।

आवरणशक्तिः—स्वकक्ष्या प्रमातृदृष्टिमवष्टभ्य सच्चिदानन्दस्वरूपपिधायिका शक्तिः 'आवरणशक्तिः' इत्युच्यते । यथा स्वल्पोऽपि मेघखण्डः स्वाकारादनेकगुणितम् आयतमण्डलं सूर्यम् अवलोकयितृनयनपथावरोधकतया आच्छादयति (आच्छादयन्निव प्रतीयते न तु वस्तुतो आच्छादयति) । तथैव अज्ञानस्यावरणशक्तिः स्वयं परिच्छिन्नापि अपरिच्छिन्नं सर्वत्र व्याप्तं वा आत्मतत्त्वं प्रमातृदृष्टिपिधायकतया आवृत्य आच्छादयति । वस्तुतः आत्मा तु सर्वव्यापि स्वयम्प्रकाशरूप एव तथापि अज्ञानावृतः जीवः तं न पश्यति । यद्यपि अपरिच्छिन्नत्वाद् आत्मा परिच्छिन्नया अनया आवरणशक्त्या नाच्छाद्यते, तथापि जीवः तम् आच्छादितमिव मन्यते स्वाज्ञानवशादेव । अथवा अज्ञानेनावृता बुद्धिः आत्मतत्त्वमेव अज्ञानावृतं मन्यते । इति भ्रान्तिमूलकमेव । यथा ज्ञानं विना सर्वथा स्थिरं सूर्यमण्डलं गच्छन्तमिव

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पृथ्वीमण्डलं च चक्रवद्भ्रमन्तं स्थिरमिव पश्यति, तथैवात्र आत्मतत्त्वमेव अज्ञानेनाच्छादितं मन्यते । अत एवोक्तं हस्तामलके—

'घनच्छन्नदृष्टिर्घनच्छन्नमर्कं
यथा मन्यते निष्प्रभं चातिमूढः ।
तथा बद्धवद्भाति यो मूढदृष्टेः
स नित्योपलब्धिस्वरूपोऽहमात्मा ॥'

अस्यार्थः—घनेन=मेघेन, आच्छन्ना=आवृता, दृष्टिः=नेत्रं, यस्य सः=सूर्यनेत्रयोर्मध्ये पतितत्वाद् यस्य नयनपथावरोधो जातः तथाविधः द्रष्टा, अर्कं=सूर्यं, घनच्छन्नम्=मेघावृतमिति, मन्यते । एवमेव अज्ञानस्यावरणशक्त्या आच्छादिता बुद्धिः आत्मतत्त्वं बद्धवद् पश्यति । न तु आत्मा तथा बद्धः, आत्मा तु नित्योपलब्धस्वरूप इति विवेकः ।

अनया आवरणशक्त्या आच्छादितो जीवः आत्मनः अज्ञानवशित्वं कर्तृत्वभोक्तृत्व-सुखित्व-दुःखित्वं च मन्यते, परन्तु न तत्तथा । आत्मा तु सर्वथा निर्लिप्त एव ।

विक्षेपशक्तिः—विक्षेपशक्तिस्तु भ्रमजनिका, यथा रज्जौ सर्पभ्रमः तथा सर्वत्र व्याप्ततत्त्वे आत्मनि नानात्मकस्य नामरूपात्मकस्य जगतो भ्रान्तिः । यद्यपि जगदिदं स्वप्नवन्मिथ्या एव तथापि अज्ञानवशात् तस्य प्रतीतिः । अज्ञानवशादेव आसूक्ष्मशरीराद् ब्रह्माण्डपर्यन्तं नानात्मकं जगत् प्रतीयते ।

एवमयमत्रार्थः—अज्ञानस्यावरणशक्त्या वस्तुतत्त्वम् आत्मा अवलोकयितृनेत्रपथपिधायकतया आवृत्य तस्यैव विक्षेपशक्त्या नानारूपात्मकं सूक्ष्मप्रपञ्चादारभ्य ब्रह्माण्डपर्यन्तं सम्पूर्णं प्रपञ्चं तं दर्शयति । तेन वशीकृतो जीवः स्वयं कर्तृत्वभोक्तृत्व-सुखित्व-दुःखित्वादीन् स्वस्मिन् आरोप्य आत्मतत्त्वमेव सुखी-दुःखीतिरूपेण जानाति । न हि तद्वास्तविकमिति सारम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रश्न—(१३) तुरीयचैतन्यम् निरूपयत ।

अथवा

वनवृक्षतदवच्छिन्नाकाशयोर्जलाशयजलतद्गतप्रतिबिम्बाकाशयोर्वाऽऽधारभूतानुपहिताकाशवदनयोरज्ञानतदुपहितचैतन्ययोराधारभूतं यदनुपहितंचैतन्यं तत्तुरीयमित्युच्यते 'शिवमद्वैतंचतुर्थं मन्यन्ते' इत्यादिश्रुतेः । इदमेव तुरीयं शुद्धचैतन्यमज्ञानादितदुपहितचैतन्याभ्यां तप्तायःपिण्डवदविविक्तं सन्महावाक्यस्य वाच्यं विविक्तं सल्लक्ष्यमिति चोच्यते । इति गद्यखण्डं व्याख्यायताम् ।

उत्तरम्—तुरीयचैतन्यम्- पूर्वोक्तप्रकारेणोपाध्यवच्छिन्नेश्वरप्राज्ञौ निरूप्येदानीं वनवृक्षेत्यादिनाऽनवच्छिन्नचैतन्यं निरूपयति । वनवृक्षतदवच्छिन्नाकाशयोर्जलाशयतडागादितद्गतप्रतिबिम्बाकाशयोर्वा आधारभूतो यथा महाकाशस्तथैवेश्वरप्राज्ञयोरप्याधारभूतमनुपहितं सर्वव्यापि यद्विशुद्धचैतन्यं तत्तुरीयमुच्यते, एतदेव 'शिवमद्वैतं चतुर्थं मन्यन्ते' तथा—'त्रिषु धामसु यद्भोग्यमि' त्यादिना…' श्रुतिभिरपि प्रतिपादितम् । एतदेव विशुद्धचैतन्यं पूर्वोक्ताज्ञानादितदुपहितचैतन्येश्वरप्राज्ञचैतन्यद्वयेन सहाभेदविवक्षायां 'तत्त्वमसी' त्यस्य वाच्यार्थत्वं भेदविवक्षायाञ्च लक्ष्यार्थत्वं भजते । चैतन्यरूपेण त्रयाणां चैतन्यानां यद्यप्येकत्वमेव तथापि अज्ञानानवच्छित्वेन वाच्यत्वं तदवच्छिन्नत्वेन च लक्ष्यत्वमुपपद्यते । अनयोरज्ञानोपहितचैतन्येश्वरप्राज्ञयोर्विशुद्धचैतन्येन सह तथैवैक्यभिन्नत्वव्यपदिष्टिर्यथाऽग्निप्रक्षिप्तायोगोलके सत्यपि भारादिपार्थिवांशेऽग्निगुणदाहकताशक्तिसम्पन्नतयाऽग्निगोलकव्यवहृतिस्तथा तेन दाहे सञ्जाते सत्ययो दहतीति व्यवहारः ।'

प्रश्न—(१४) आत्मनः संसारकारणत्वम् कथमुपपद्यते ? इति स्पष्टी-क्रियताम् ।

अथवा

शक्तिद्वयवदज्ञानोपहितं चैतन्यं स्वप्रधानतया निमित्तं स्वोपाधि-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रधानतयोपादानं च भवति यथा लूता तन्तुकार्यं प्रति स्वप्रधानतया निमित्तं स्वशरीरप्रधानतयोपादानं च भवति । इति गद्यांशस्य व्याख्या कार्या ।

उत्तरम्—नन्वात्मा संसारस्य निमित्तं कारणमाहोस्विदुपादानम् ? 'निमित्तकारणत्वे तत्सृष्ट्वा तदेवानुप्राविशत्' इति तैत्तिरीयोक्तं तस्य कार्यव्यापित्वं न स्यात् निमित्तस्य दण्डादेः स्वकार्यघटादिव्यापित्वाभावदर्शनात् ।

नित्यचैतन्यस्य परमात्मनः उपादानकारणत्वे तु 'कारणगुणाः कार्यगुणानारभन्ते' इति नियमेन सांसारिकजडप्रपञ्चस्यापि नित्यत्वं चेतनत्वञ्चापद्येतेत्युभयोर्न्न कतरदपि सम्भवतीत्यत आह—शक्तिद्वयवदिति । एक एव चेतनात्मा संसारस्य निमित्तमुपादानञ्चोभयं कारणमिति भावः । तदेवोर्णनाभिदृष्टान्तेन स्पष्टीक्रियते—यथा लूता (ऊर्णनाभिः) स्वतन्तुरूपकार्यं प्रति चैतन्यप्रधानतया निमित्तकारणम्, स्वशरीरप्रधानतया चोपादानकारणम् एवमज्ञानोपहितात्मा चैतन्यप्रधानतया सांसारिकप्रपञ्चस्य निमित्तं कारणम् अज्ञानप्रधानतया चोपादानकारणम् । निश्चेतनलूतातनुस्तन्तुं जालं वा निष्पादयितुं न शक्नोति । तत्तन्वभावे च केवलेन चैतन्यांशेनापि तन्तुजालयोरन्यतरदुत्पादयितुं न शक्यतेऽतस्तन्तुजालरूपकार्यं प्रति लूतायास्तनुचैतन्ययोरुभयोः कारणत्वेऽपि चैतन्यप्राधान्येन तनोर्निमित्तत्वम्चैतन्याभावे केवलया तन्वा तन्तुजालनिष्पादनासम्भवात् । तनुप्राधान्ये च तस्याः साक्षात्सम्बन्धितयोपादानत्वम् । एवं शरीरनिष्ठस्यात्मनोऽपि परम्परया तन्तोर्जालस्य चोपादानत्वम् । अनयैव रीत्या ईश्वरः चैतन्यप्राधान्येन चराचरजगतो निमित्तकारणम्, अज्ञानप्राधान्येन चोपादानकारणम् । यतो हि जगदज्ञान (माया) जन्यम् । अज्ञानं (माया) च संसारस्योपादानकारणम् । अज्ञानञ्चात्मनिष्ठमिति मायाविन ईश्वरस्यापि परम्परया जगदुपादानत्वं न विरुध्यते । यथा लूता जालं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तु वा तूलतुरीवेमादिसाधनान्यनपेक्ष्यैव निर्मातुं शक्नोति तथै-श्वरोऽपि सृष्टेरादावेको निःसहायोऽद्वितीयोऽपि स्वमायया सूक्ष्मशरी-रादारभ्याब्रह्माण्डान्तं स्थूलजगदुत्पादयति । एतदेव मुण्डकोपनिषदि यथोर्णनाभिरित्यादिना प्रतिपादितम् ।

एवमीश्वरस्य जगतो निमित्तत्वेऽपि 'तत्सृष्ट्वा तदेवानुप्रावि-शत्' इत्यादि—श्रुतीनामुपादानपरकत्वेनाविरोधः तथात्वे च श्रुतेः परि-णामपरकत्वेन (नापि विवर्तपरकत्वेन) जगतो नित्यत्वं चेतनत्वञ्च स्यात् इति सर्वमनवद्यम् । इदमत्रावधेयम्,—इदं चराचरं जगद् ब्रह्मणो विवर्तो न परिणामः । अतोऽस्य प्रधानकारणाज्ञानापेक्षया (माया-पेक्षया) परम्परया सम्बद्धस्य ब्रह्मणः उपादानत्वेऽपि नास्मिंस्तद्-गतचैतन्यनित्यत्वादिसम्भवः, स्वस्वरूपापरित्यागेन स्वरूपान्तरप्रद-र्शकत्वस्यैव हि विवर्तत्वात्, चैतन्यनिष्ठरज्जुविषयकाज्ञानस्य रज्जु-स्वरूपापरित्यागेन सर्पस्वरूपान्तरप्रदर्शनवत् । इत्थं चैवमेवेश्वरचैत-न्यनिष्ठाज्ञानशक्तेरपि चैतन्यस्वरूपपरित्यागेनाकाशादिस्वरूपान्तरा-कारेणास्य जगतः प्रदर्शकत्वादस्य प्रपञ्चस्य नित्यत्वं न सम्भवति । अज्ञानस्य स्वतो मिथ्यात्वेन तज्जन्याकाशादेरपि मिथ्यात्वात् ।

प्रश्न—(१५) वेदान्तशास्त्रानुसारम् आकाशादि सृष्टिक्रमः निरूप्यताम् ।

उत्तरम् तमःप्रधानविक्षेपशक्तिमदज्ञानोपहितचैतन्यादाकाश आकाशाद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिवी चोत्पद्यते 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूत' इत्यादिश्रुतेः । तेषु जाड्याधिक्य-दर्शनात्तमःप्राधान्यं तत्कारणस्य । तदानीं सत्त्वरजस्तमांसि कारण-गुणप्रक्रमेण तेष्वाकाशादिषूत्पद्यन्ते । एतान्येव सूक्ष्मभूतानि तन्मात्रा-ण्यपञ्चीकृतानि चोच्यन्ते । एतेभ्यः सूक्ष्मशरीराणि स्थूलभूतानि चोत्पद्यन्ते ।

तमोगुणप्रधानात् किन्तु यत्किचिदजःसत्त्वसत्तासम्पन्नाद् विक्षेप-

Kirtikant Sharma Collection, Najafgarh.

CC-0. In Public Domain. Digitization by eGangotri

शक्तिमदज्ञानोपहितचैतन्यादाकाशः आकाशाद्वायुः, वायोरग्निः, अ जलम्, जलात्पृथिवी चोत्पद्यते । आकाशादेर्जडत्वात्तमोगुणप्रधा विक्षेपशक्तिसम्पन्नज्ञानोपहितचैतन्यस्यैवाकाशादिप्रपञ्चजनकत्वं युक्त 'कारणगुणा हि कार्यंगुणानारभन्ते' इति नियमात्, तथा श्रुतिः 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः' । एतेन देवात्मशक्तिं स्व गुणैर्निगूढाम्' इति श्रुत्याऽज्ञानस्य (मायायाः) गुणत्रययुक्तत्वे तमोगुणप्राधान्यादेव कथमाकाशाद्युत्पत्तिरिति शङ्काप्यपास्ता । एव माकाशाद्युत्पत्त्यनन्तरं स्वकारणगुणानुरूपमुत्तरोत्तरं तेष्वाकाशादि सत्त्वरजस्तमसां त्रयाणामपि गुणानामुत्पत्तिः । एतान्येवापञ्चीकृ सूक्ष्मरूपपञ्चभूतानि तथा क्रमशः शब्दस्पर्शरूपरसगन्धतन्मा उच्यन्ते । एभ्य एव सूक्ष्मभूतेभ्यः (अपञ्चीकृतपञ्चभूतेभ्यः) अप ञ्चीकृतसूक्ष्मशरीराणि तथा पञ्चीकृतस्थूलभूतेभ्यः स्थूलशरी चोत्पद्यन्ते ।

प्रश्न—(१६) सूक्ष्म शरीरं तस्योत्पत्ति च निर्दिष्यताम् ।

उत्तरम्—सूक्ष्मशरीराणां सप्तदश अवयवाः । इमान्येव सूक्ष्म शरीराणि लिङ्गशरीराण्युच्यन्ते—लिङ्ग्यते प्रत्यगात्मसद्भाव ए रिति लिङ्गानि, लिङ्गानि न तानि शरीराणि इति लिङ्गशरीरा इति व्युत्पत्तेः । 'सप्तदशः प्रजापतिः' इत्यत्र शतपथब्राह्मणे 'मुख्यं सप्तदशकं प्रथितं हि लिङ्गम्' इत्यत्र सङ्क्षिप्तशारीरकभाष्ये च सूक्ष्मशरीरस्य सप्तदशावयवत्वप्रतिपादनात् । तानि च सूक्ष्मशरीरा 'पञ्चप्राणमनोबुद्धिः—'इत्यादीनि । तेषु च प्राणपञ्चकज्ञानकर्मे न्द्रियदशकबुद्धिमनसामाकाशादिसात्त्विकांशेभ्यः क्रमशः पृथक् पृ गुत्पत्तिः । आकाशीयसात्त्विकांशात् श्रोत्रस्य, वायवीयसात्त्विकांश त्वचः, तैजससात्त्विकांशात् चक्षुषः, जलीयसात्त्विकांशाद्रसनाया पार्थिवसात्त्विकांशाद् घ्राणस्य चोत्पत्तिरिति भावः ।

तत्र 'अहं ब्रह्मैवास्मि', 'इदमित्थमेवं' वंनिश्चयात्मिकान्तःक

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वृत्तिर्बुद्धिः । इदमित्थं न वा (अहं चेतनस्वरूपं शरीरं वा) इति संशयात्मिकान्तःकरणवृत्तिर्मनः । स्मरणात्मकचित्तस्य बुद्धौ गर्वात्मकाहंकारस्य च मनस्येवान्तर्भाव इति न पार्थक्येन तयोर्लक्षणमुक्तम् । मनोबुद्धिचित्ताहंकाराणां चतुर्णामेक मिलितमन्तःकरणं नाम । तस्यैकत्वेऽपि संशयनिश्चयस्मरणगर्वरूपविभिन्नकार्यपरतया भिन्नकार्यपरत्वेन पाठकपांचकयाचकवद् व्यवहारः । एतानि च सर्वाणि व्योमादिगतसात्त्विकांशेभ्यो मिलितेभ्यः समुत्पद्यन्ते । तत्र मनोबुद्धिचित्ताहंकाराः प्रकाशात्मकाः एतदेवैतेषां महाभूतसात्त्विकांशकार्यत्वे प्रमाणम् ।

ज्ञानेन्द्रियसहितबुद्धिर्विज्ञानमयः कोशः उच्यते तद्युक्तं चैतन्यं कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वाद्यभिमानित्वेन स्वार्गादिलोकगामि समष्टित । व्यावहारिकदशायाञ्चैतदेव विज्ञानमयकोशयुक्तं चैतन्यं सूत्रात्मसंज्ञां लभते ।

क्रियात्सत्त्वगुणांशोत्पन्नत्वेन सत्त्वगुणप्रधानं, चक्षुःश्रोत्रादिज्ञानेन्द्रियात्मकन्ञ्च मनो मनोमयकोशः कथ्यते । मनसः सत्त्वगुणांशकार्यत्वेऽपि शरीरविकारेच्छारूपित्वेन सङ्कल्पविकल्पात्मकत्वाद् बुद्ध्यपेक्षयाऽधिकस्थूलत्वाच्चास्मिन्नेष व्यवहारः । बुद्धेश्च निश्चयान्तःकरणवृत्तित्वेन सङ्कल्पविकल्पाभावात् । आत्मनश्च कोशवदाच्छादकत्वादस्मिन् सञ्ज्ञात्वव्यवहारः ।

तैजस इव वागादिकर्मेन्द्रियपञ्चकमाकाशादिरजोगुणांशेभ्यः क्रमशः पार्थमिति, व्रिते । आकाशादिषु सत्त्वरजस्तमसां त्रयाणामपि गुणानां वर्तमत एवऽपि वागादिष्वाकाशादिरजोंऽशाधिक्यमिति रजोगुणप्रधानवायोः घ्राणीन्द्रियम्, रजोगुणप्रधानाग्नेः पादेन्द्रियम् तथा रजोगुणप्रधानजलात् मलविसर्जनेन्द्रियम् एवं रजोगुणप्रधानपृथिव्या मूत्रविसर्जनेन्द्रियञ्चोत्पद्यते ।

प्राणादयः पञ्च वायवः । साङ्ख्यमते नागकूर्मकृकलदेवदत्तधनञ्जयाख्याः अपरेऽपि पञ्च वायवः, तेषु च—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

'उद्गारे नाग आख्यातः कूर्म उन्मीलने स्मृतः ।
कृकलः क्षुत्करो ज्ञेयो देवदत्तो विजृम्भणे ।
न जहाति मृतं चापि सर्वव्यापी धनञ्जयः ॥'

किन्तु वेदान्तिन इमान् सर्वान् प्राणादिष्वेवान्तर्भावयन्ति ।

अस्य प्राणपञ्चकस्योत्पत्तौ रजोगुणप्रधानाकाशादिमिलितांशेभ्यो भवति । कर्मेन्द्रियसहितं तत्प्राणपञ्चकं प्राणमयकोशः कथ्यते । एतञ्च क्रियात्मकमित्यस्य रजोगुणांशकार्यत्वम् । पूर्वोक्तविज्ञानमय-मनोमय-प्राणमयकोशेषु विज्ञानमयः कोशो ज्ञानशक्तिसम्पन्न इति कर्त्ता कथ्यते । मनोमयः कोशो इच्छाशक्तिसम्पन्न इति विवेकसाधकत्वेन करणमुच्यते । प्राणमयकोशश्च गमनादिक्रियासम्पन्न इति कार्यमुच्यते । ज्ञानेन्द्रियसहितो बुद्धिरूपकर्त्ता मनोज्ञानेन्द्रियरूपकरणसाहाय्येन प्राणादिपञ्चकद्वारा कर्मेन्द्रियपञ्चकद्वारा च गमनादिकार्यं करोतीति तत्त्रयम् । तत्तत्कार्यक्षमतानुसारेणैवैते स्वकार्ययोग्यतात् कर्तृ-करण-कार्यनामभाजः । मिलित्वं तत्त्रयं सूक्ष्मशरीरमुच्यते ।

प्रश्न—(१७) व्यष्टि-समष्टिभेदेन सूक्ष्मप्रपञ्चं निरूपयेत सूक्ष्म...

उत्तरम्—सूक्ष्मशरीरं सप्तदशावयवम् । दशेन्द्रियपञ्चप्राणाः एव मनोबुद्ध्यात्मकम् । तदेव लिङ्गशरीरमिति चोच्यते—लिङ्ग्यते प्रत्यगात्मसद्भावः एभिरिति लिङ्गानि, लिङ्गानि च तानि शरीराणि चेति लिङ्ग शरीराणि इति विग्रहात् ।

तत्र श्रोत्र-त्वक्-चक्षु-र्जिह्वा-घ्राणानि पञ्चज्ञानेन्द्रियाणि, वाक्-पाद-पाणिपायूपस्थानि कर्मेन्द्रियाणि, प्राणापानव्यान-समानोदानाः पञ्चप्राणाः निश्चयात्मिकाऽन्तःकरणवृत्तिः बुद्धिः संशयात्मिकाऽन्तःकरणवृत्तिः मनः, इति सप्तदशावयवाः ।

तत्र च ज्ञानेन्द्रियैः सहिता बुद्धिर्विज्ञानमयः कोश इत्युच्यते, ज्ञानेन्द्रियैः सहितं मनः मनोमयः कोश इति, पञ्चकर्मेन्द्रियैः सहिताः पञ्चवायवो मिलिताः सन्तः प्राणमयः कोशः, इति प्राणमनोविज्ञानमयाः कोशा मिलित्वा सूक्ष्मशरीरं लिङ्गशरीरमिति चोच्यते ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एतत् सप्तदशावयवात्मकं सूक्ष्मप्रपञ्चमेव व्यष्टि-समष्टि-रूपेण द्विविधं प्रपञ्चते । वनवृक्षतदवच्छिन्नाकाशवज्जलाशयजलतद्गताकाशवद् समष्टिव्यष्टिभेदेन पृथग्व्यवहारगतोऽपि तत्त्वत एक एव । यथा समष्टिबुद्ध्या वनमिति संज्ञितं व्यष्टिरूपेण आम्रपलाशखदिरादिव्यपदेशभाजां तत्त्वतोऽभिन्ना एव तथा च नदीजल तडागजलानि मिलित्वा जलाशयः इति सञ्ज्ञां भजन्ते तथैवात्रापि ज्ञातव्यम् ।

एवं च समष्टिबुद्ध्या तानि एव सूक्ष्मशरीराणि एकत्वेन व्यवह्रियन्ते व्यष्टिबुद्ध्या च बहुत्वेम् ।

वनवृक्षतदवच्छिन्नाकाशवज्जलाशयजलवत्तद्गतप्रतिविम्बिताकाशवद्वस्तुतोऽभिन्नमपि चैतन्यांशं भिन्नमिव व्यवह्रियते । तत्र समष्टिगतसूक्ष्मशरीरोपहितं चैतन्यं स्रक्सूत्र इव सर्वत्रानुस्यूतत्वात् सूत्रात्मा इति विज्ञानमयं मनोमय-प्राणमयकोशयुक्तत्वात् ज्ञानेच्छाक्रियासम्पन्नत्वाच्च हिरण्यगर्भः प्राणश्चोच्यते । तथा चास्य सूत्रात्मकहिरण्यगर्भस्यैषा समष्टिः स्थूलप्रपञ्चापेक्षया सूक्ष्मत्वात् सूक्ष्मशरीरम्, विराड्रूपेणानुभूतस्थूलप्रपञ्चवासनामयत्वात् स्वप्नः अत एव स्थूलप्रपञ्चलयस्थानमिति चोच्यते ।

यथा समष्टिगतसूक्ष्मशरीरोपहितं चैतन्यं हि हिरण्यगर्भ इति सञ्ज्ञां भजते, एवं चैतद्व्यष्ट्युपहितं चैतन्यं तेजोमयान्तःकरणत्वात् तैजस इत्युच्यते । तथा च स्थूलशरीरापेक्षया सूक्ष्मत्वात् सूक्ष्मशरीरमिति, विश्वचैतन्यानुभूतस्थूलशरीरविषयकवासनामयत्वात् स्वप्नः, अत एव स्थूलशरीरलयस्थानमिति चोच्यते ।

एतौ हिरण्यगर्भतैजसौ स्वप्नकाले सूक्ष्मनोवृत्तिभिर्वासनामयान् शब्दस्पर्शादिविषयान् तथैवानुभवन्ति यथा ईश्वरप्राज्ञौ सुषुप्त्यवस्थायां स्वाज्ञानवृत्तिभिः आनन्दमनुभवतः । यथोक्तम्—

'स्वप्नस्थानोऽन्तःप्रज्ञः सप्ताङ्गः, एकोनविंशतिमुखः प्रविविक्तभुक् तैजसः ।' इति (माण्डू० ३) ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रश्नः—(१८) पञ्चीकरणप्रकारः निरूपणीयः ।

अथवा

'द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः ।
स्वे स्वेतरद्वितीयांशैर्योजनात्पञ्च पञ्च ते ॥'

इति कारिका सोपक्रमं व्याख्येया ।

उत्तरम्—आकाशादीनि महाभूतानि शब्दादिभ्य स्वविषयेभ्य अतिरिक्ता न्यपि विषयाणि क्वचिदंशे धारयन्तीति प्रत्यक्षसिद्धम् । यथा हि पृथिव्यां गन्धः प्रधानभूतः सन्नपि अप्रधानतया शब्दस्पर्शादयः प्रतीतिविषयतां यान्ति । इति जिज्ञासा पञ्चीकरणप्रकारेण समाधीयते । तथा हि स्थूलप्रपञ्चे महाभूतानि स्वशुद्धरूपेण नोपलभ्यन्ते । तत्र तु स्वीयार्द्धांशेन इतराणां प्रत्येकानां च अष्टमांशेन एकं महाभूतं निर्मितं भवति । तदेव निर्दिश्यते—

आकाशादिपञ्चमहाभूतेषु प्रत्येकं समभागेन द्विधा विभज्य तत्र द्वितीयार्द्धस्य प्रत्येकभागस्य चतुर्धा पुनर्विभागं क्रियते । ततः प्रत्येकं स्वकीयेन अर्द्धभागेन तथा इतराणां महाभूतानां द्वितीयार्द्धगतचतुर्थभागेन (अष्टमांशेनेत्यर्थः) संयोजितो भवति । एवं प्रत्येकं महाभूतं स्वीयार्द्धभागेन, अन्यानामष्टमभागेन संयोजिताः सन्तः स्थूलप्रपञ्चे स्वप्रतिष्ठां लभन्ते । इति तदेव "द्विधा विधाय चैकैकम्" इत्यनया कारिकया निर्दिष्टम् । अस्यार्थं विस्तरेणोक्तं सुरेश्वरवार्तिके—

'पृथिव्यादीनि भूतानि प्रत्येकं विभजेद् द्विधा ।
एकैकं भागमादाय चतुर्धा विभजेत्पुनः ॥
एकैकं भागमेकस्मिन् भूते संवेशयेत् क्रमात् ।
ततश्चाकाशभूतस्य भागाः पञ्च भवन्ति हि ॥
वाय्वादिभागाश्चत्वारो वाय्वादिष्वेवमादिशेत् ।'
पञ्चीकरणमेतत्स्यादित्याहुस्तत्त्ववेदिनः ॥ इति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

संक्षेपेण एवमेतत् स्पष्टीक्रियते—

आकाशः		वायुः		अग्निः		अपः		पृथ्वी	अपञ्चीकृतानि / पञ्चीकृतानि
१/२	+	१/८	+	१/८	+	१/८	+	१/८	आकाशः
१/८	+	१/२	+	१/८	+	१/८	+	१/८	वायुः
१/८	+	१/८	+	१/२	+	१/८	+	१/८	अग्निः
१/८	+	१/८	+	१/८	+	१/२	+	१/८	आपः
१/८	+	१/८	+	१/८	+	१/८	+	१/२	पृथ्वी

ननु छान्दोग्योपनिषदि आकाशद् वायुः, वायोरग्निः, अग्नेरापः, इति महाभूतत्रयोत्पत्तिप्रदर्शनानन्तरमेव त्रिवृत्करणमित्युक्तम्—

'तासां त्रिवृतं त्रिवृतमेकैकं करवाणि ।' इति ।

इति कथमत्र पञ्चीकरणमुक्तमिति चेदुच्यते—त्रिवृत्करणमेव पञ्चीकरणस्योपलक्षणं स्थूलसूक्ष्मसृष्टिप्रपञ्चे पञ्चमहाभूतानामेव अपेक्षितत्वात् ।

ननु पञ्चीकरणप्रक्रियया वायौ पृथिव्या संयोगेन कथं न तस्य चाक्षुषं प्रत्यक्षमिति च न वक्तव्यम् । महाभूतेषु स्वांशस्यैव प्राधान्याद् स्वस्वगुणानामेव स्पष्टानुभूतिः सम्भाव्यते । पञ्चानां पञ्चात्मकत्वे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

समानेऽपि स्वस्वार्धभागमाधिक्येन वर्तमानादाकाशादिव्यपदेशोपपत्तिः। स्वस्वकारणगुणैः स्पृष्टे सति आकाशे पञ्चीकृते शब्दः, वायौ शब्दस्पर्शौ, अग्नौ शब्दस्पर्शरूपाणि, जले शब्दस्पर्शरूपरसाः, पृथिव्याञ्च शब्दस्पर्शरूपरसगन्धाः प्रतीयन्ते। इत्यलं विस्तरेण।

प्रश्नः—(१९) स्थूलसृष्टिक्रमप्रदर्शनपूर्वकं स्थूलप्रपञ्चं निरूपयत।

उत्तरम्—अज्ञानविजृम्भितमेतच्चराचरं जगदिति, वेदान्तव्याख्यानसारम्। तत्र तमःप्रधानात् सत्त्वरजोभ्यां किञ्चित्स्पृष्टात् अज्ञानाद् आकाश उत्पद्यते। आकाशाद् वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवीति महाभूतोत्पत्तिक्रमः। यथोक्तं श्रुतौ—

'तस्माद् वा एतस्मादात्मन आकाशः सम्भूतः।' इति।

आकाशादीनां जडत्वात् तमोगुणप्रधानमित्युक्तम्। जगतः त्रिगुणात्मकत्वाच्च सत्त्वरजोभ्यां किञ्चित्स्पृष्टमिति।

एतेभ्योऽपञ्चीकृतेभ्य आकाशादिभ्यः क्रमशः शब्दस्पर्शरूपरसगन्धा उत्पद्यन्ते। पञ्चीकृतेभ्यस्तु तमःप्रधानेभ्यः क्रमशः शब्दस्पर्शादयः सूक्ष्मतन्मात्राः; सत्त्वप्रधानेभ्यः ज्ञानेन्द्रियाणि, रजःप्रधानेभ्यस्तु कर्मेन्द्रियाणीति सूक्ष्मप्रपञ्चः।

एवं पञ्चीकृतेभ्यो महाभूतेभ्यो भूर्भुवःस्वर्महर्जनस्तपःसत्यमिति उपर्युपरि वर्तमानानां लोकानाम् अतलवितलसुतलरसातलमहातलतलातलपातालानामधोऽधो वर्तमानानां लोकानाञ्च उत्पत्तिर्भवति। एवं चतुर्दशलोकात्मकब्रह्माण्डस्योत्पत्त्यनन्तरं तेषु चतुर्विधानां (जरायुजाण्डजस्वेदजोद्भिज्जानाम्) स्थूलशरीराणां तेषां पोषणार्थमन्नपानादीनाञ्च उत्पत्तिर्जायते।

तत्र जरायुजानि जरायुजातानि मनुष्यादीनि, अण्डजानि पक्ष्यादीनि, स्वेदजानि यूकामशकादीनि, उद्भिज्जानि च भूमिमुद्भिद्य जातानि तृणवृक्षादीनि।

इत्येवं स्थूलप्रपञ्चं आकाशादिमहाभूतेभ्य आरभ्य स्थूलभूत

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शरीरिचतुर्विधपर्यन्तं व्यावर्तमानम् । अयञ्च चतुर्विधस्थूलशरीरात्मकप्रपञ्च एकत्वानेकत्वविवक्षया व्यष्टिसमष्टि इति भेदद्वयं भजति । तत्र समष्ट्युपहितं चैतन्यं सर्वप्राणिसमूहेषु अहमित्यभिमानेन वर्ततेऽतो वैश्वानरः, विविधः (नानाप्रकारः सन्) राजते (शोभते) इति विराट् इति च कथ्यते । तथा च व्यष्ट्युपहितं चैतन्यं सूक्ष्मशरीराभिमानमजहत् प्रत्येकस्थूलशरीरे अहमित्येवमभिमत्य वर्तमानमिति विश्वः कथ्यते ।

प्रश्नः—(२०) स्थूलप्रपञ्चोत्पत्तिं निर्दिश्य विश्ववैश्वानरयोः स्वरूपं व्याख्यायताम् ।

उत्तरम्—तमःप्रधानात् सत्त्वरजोभ्यां किञ्चित्स्पृष्टाद् अज्ञानाद् आकाशः, आकाशाद् वायुः वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी उत्पद्यन्ते इति महाभूतोत्पत्तिक्रमः । तेषु महाभूतेषु शब्दस्पर्शादयः ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि पञ्चवायवः जायन्ते । तथा च, तेभ्य एव पञ्चीकृतेभ्यो महाभूतेभ्यो भूर्भुवःस्वर्महर्जनस्तपःसत्यमिति उपर्युपरि विद्यमानानाम् अतलवितलसुतलरसातलमहातलपातालतलातलनामकानाम् अधोऽधो विद्यमानानां लोकानामुत्पत्तिर्जायते । ततश्च तदन्तर्वर्तिजरायुजाण्डजस्वेदजोद्भिज्जानां चतुर्विधशरीरिणाम् उत्पत्तिर्भवति । तत्र जरायुजानि जरायुभ्यो जातानि ('गर्भाशयो जरायुः स्यात्' इति कोशः ।) मनुष्यादीनि । अण्डजानि अण्डेभ्यो जातानि पक्षिपन्नगादीनि । उद्भिज्जानि भूमिम् उद्भिद्य जातानि तृणवृक्षादीनि । स्वेदजानि स्वेदेभ्यो जातानि यूकामशकादीनि ।

एतत्स्थूलप्रपञ्चं व्यष्टिसमष्टिरूपम् एकत्वबहुत्वविवक्षायां वनवद्वृक्षवद् वा व्यवह्रियते । यथा वृक्षाणां समष्टितया एकत्वविवक्षायां वनमिति, बहुत्वविवक्षायां व्यष्टिरूपेण आम्र-पलाशखदिर इत्यादि संज्ञां भजते । तथैव अत्रापि व्यष्टिसमष्टिभेदम् ।

एतत्समष्ट्युपहितं चैतन्यं सर्वप्राणिसमूहेषु 'अहम्' इत्यभिमानेन वर्ततेऽतो वैश्वानरः, विविधं राजते अत एव विराट् इति च कथ्यते ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चतुर्विधस्थूलशरीरसमष्टितया स्थूलशरीरम् इति मातृपितृभुक्तान्नोत्पन्नत्वेनात्मच्छादकत्वेन चान्नमयः कोशः, सुखदुःखादिभोगाधारत्वेन तत्तदिन्द्रियैस्तत्तद्विषयोपलब्धेश्च जाग्रदित्युच्यते।

तदेव व्यष्टिगतं चैतन्यं सूक्ष्मशरीराभिमानमत्यजन् अनेकस्थूलशरीरे "अहम्" इत्यभिमत्य विद्यमानमतो विश्व इति कथ्यते। अज्ञानस्य इयं व्यष्टिः स्थूलशरीरम्, अन्नमयकोशः, जाग्रदिति च कथ्यते।

एतौ वैश्वानरविश्वौ दिग्वायुसूर्यवरुणाश्विभिः क्रमान्नियन्त्रितेन श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणेन्द्रियपञ्चकेन क्रमशः शब्दस्पर्शरूपरसगन्धान् अनुभवतः। तथा च अग्नीन्द्रोपेन्द्र-यम-प्रजापतिभिः क्रमान्नियन्त्रितैर्वाक्पाणिपादपायूपस्थैर्वचनादानगमनमलत्यागानन्दान् अनुभवतः। एवमेव इन्द्रब्रह्माशङ्करविष्णुभिः क्रमान्नियन्त्रितैर्मनोबुद्ध्यहङ्कारचित्तैश्च सङ्कल्पनिश्चयोऽहङ्कारचैतान् सर्वानेतान् स्थूलविषयान् अनुभवतः। यथा

नियन्तारः	करणानि	विषयाणि
दिक्	श्रोत्रम्	शब्दम्
वायुः	त्वक्	स्पर्शम्
सूर्यः	चक्षुः	रूपम्
वरुणः	जिह्वा	रसम्
अश्विनौ	घ्राणम्	गन्धम्
अग्निः	वाक्	वचनम्
इन्द्रः	पाणिः	आदानम्
उपेन्द्रः	पादः	गमनम्
यमः	पायुः	मलत्यागः
प्रजापतिः	उपस्थः	आनन्दम्
इन्द्रः	मनः	सङ्कल्पः
ब्रह्मा	बुद्धिः	निश्चयः
शङ्करः	अहङ्कारः	अहङ्कारम्
प्रजापतिः	चित्तः	चैतम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रश्नः—(२०) विश्ववैश्वानरयोः स्वरूपं प्रदर्श्य तयोर्विषयानुभवप्रकारं वर्णयत ।

उत्तरम्—जरायुजाण्डस्वेदजोद्भिज्जेति देहचतुष्टयात्मकम् एतत्स्थूलप्रपञ्चं वनवृक्षतदवच्छिन्नाकाशवज्जलाशयजलवत्तद्गतप्रतिबिम्बिताकाशवद् वा व्यष्टिसमष्टिरूपम् । तत्र यथा आम्र-पलाश-खदिरादिविविधवृक्षाणां व्यष्ट्यपेक्षया वृक्षं वृक्षमिति बहुत्वेन पृथक्पृथग्व्यपदेशः, तेषामेव समष्ट्यपेक्षया एकत्वेन वनमिति सञ्ज्ञा भवति, तथैव स्थूलप्रपञ्चस्य व्यष्ट्यपेक्षया पृथक् पृथग् बहुत्वेन, तथा समष्ट्यपेक्षया च एकत्वेन व्यपदेशो जायते ।

तत्र समष्ट्युपहितं चैतन्यं वैश्वानरः (विश्वे=सर्वे, नराः अस्येति व्युत्पत्तेः) विराड् (विविधं=नाना प्रकारकं सद् राजते=शोभते इति व्युत्पत्तेः) इति चोच्यते । स्थूलप्रपञ्चस्यैषा समष्टिः सूक्ष्मप्रपञ्चापेक्षया स्थूलत्वात् स्थूलशरीरम्, मातृपितृभुक्तान्नपरिणामत्वाद् आत्मनः कोशवदाच्छादकत्वाद् अन्नमयकोशः । सुखदुःखादिभोगाधारत्वेन तत्तदिन्द्रियैः तत्तद्विषयोपलब्धेश्च जाग्रदिति चोच्यते ।

तेषामेव स्थूलशरीराणां व्यष्ट्युपहितं चैतन्यं 'विश्व' इत्युच्यते । सोऽपि वैश्वानरवद् अन्नमयकोशः, जाग्रदिति चोच्यते ।

एतौ विश्ववैश्वानरौ जाग्रदवस्थायां दिगादिनियन्त्रितैः श्रोत्रादिभिः शब्दादीन् विषयान् अनुभवतः । तद्यथा—दिङ्नियन्त्रितेन श्रोत्रेण शब्दम्, वायुनियन्त्रितेन त्वचा स्पर्शम्, सूर्यनियन्त्रितेन नेत्रेण रूपम्, वरुणनियन्त्रितया जिह्वया रसम्, अश्विनीनियन्त्रितेन घ्राणेन गन्धम्, अग्निनियन्त्रितेन वाचा वचनम्, इन्द्रनियन्त्रितेन पाणिना आदानम्, उपेन्द्रनियन्त्रितेन पादेन गमनम्, यमनियन्त्रितेन पायुना मलत्यागम्, प्रजापतिनियन्त्रितेन उपस्थेन आनन्दम्, चन्द्रनियन्त्रितेन मनसा सङ्कल्पम्, ब्रह्मनियन्त्रितेन बुद्ध्या निश्चयम्, शङ्करनियन्त्रितेन अहङ्कारेण अहङ्कार्यम्, विष्णुनियन्त्रितेन चित्तेन चैत्तम्, एवंविधान् स्थूलविषयान् अनुभवतः । यथाह श्रुतिः—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

'जागरितस्थानो बहि:प्रज्ञः, सप्ताङ्ग एकोनविंशतिमुखः ।' इति ।

अस्यार्थः—जागरितं स्थानम् अवस्था यस्य सः, बहिः स्वात्मव्यतिरिक्तविषयेषु प्रज्ञा बुद्धिर्यस्य सः, सप्ताङ्गः—शीर्ष-नेत्र-घ्राण-जिह्वा-श्रोत्र-नाभि-पृथिव्यात्मकः (अथवा—अग्निसूर्यवायुवेददिगाकाशपृथिवीदेवताकः) एकोनविंशतिमुखः—पञ्चप्राण दशेन्द्रिय-चतुर्विधान्तःकरणात्मकः स्थूलभुग्वैश्वानर इति ।

प्रश्न—(२१) महाप्रपञ्चनिरूपणम् निरूपयत् ।

उत्तरम्—एतावता ग्रन्थेन कारणसूक्ष्मस्थूलप्रपञ्चं पार्थक्येन निरूप्येदानीं तेषामपि समष्टिव्यष्टिनिरूपणं क्रियते एतेषामिति । पलाशखदिरादिवृक्षावान्तरवनानां समष्टिरेकं महद्वनं भवति, यथा वा वापीकूपतड़ागाद्यवान्तरजलाशयानामेको महान् जलाशयो भवति तथैव रीत्या कारणसूक्ष्मस्थूलशरीराणां समष्ट्या एको महान् प्रपञ्चो भवति । यथा वनावच्छिन्नाकाशवृक्षावच्छिन्नाकाशयोर्जलगतजलाशयगतप्रतिबिम्बाकाशयोश्च यथा न कोऽपि भेदस्तथैव तन्महाप्रपञ्चसमष्टिव्यष्ट्योस्तदुपहितचैतन्येश्वरप्राज्ञयोः, हिरण्यगर्भतैजसयोः, वैश्वानरविश्वयोश्च न कोऽपि भेदः ।

एतन्महाप्रपञ्चेन तथा तदुपहितचैतन्येन चाभिन्नं सदनुपहितचैतन्यं (शुद्धचैतन्यम्) 'सर्वं खल्विदं ब्रह्म' इत्यस्य वाच्यार्थस्तथा भिन्नं सल्लक्ष्यार्थो भवति अर्थात् यथा अग्निप्रक्षिप्तेन ज्वलदङ्गारतापन्नेनायसा दग्धः "अहमयसा दग्धः" इति व्याहरति वस्तुगत्या दाहकता तु वह्निनिबन्धनैव नायोनिबन्धना प्रत्युताग्निसम्पर्कणैवान्ययसोस्तादात्म्याध्यासस्तथैव महाप्रपञ्चेन तदवच्छिन्नचैतन्येन चान्योन्यतादात्म्याध्यासापन्नं यदनुपहितं चैतन्यं तदेव 'सर्वं खल्विदं ब्रह्म' इत्यस्य वाच्यार्थतां तथा पूर्वोक्तप्रपञ्चेन विविक्तं सत्तस्य लक्ष्यार्थताञ्च भजते । अयमाशयः—सर्वम् अर्थात् महाप्रपञ्चः, तदुपहितं चैतन्यम् तदनुपहितं चैतन्यञ्च कथमेकं स्यादिति विचिकित्सायां मुख्यार्थस्य बाध इति लक्षणया सर्वं खल्विदं रूपविशेषेणांशं परित्यज्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तन्यांशमात्रग्रहणेन. महाप्रपञ्चोपहितचैतन्यतदनुपहितचैतन्ययोश्चै-त्वं निर्विवाद स्यात् । यथाऽयो दहतीत्यस्य लक्षणयाऽयोगताग्निर्दह-तीत्यर्थस्तथैव सर्वस्यैतत्प्रपञ्चस्य ब्रह्मत्वाभावे 'सर्वं खल्विदं ब्रह्म' इति वाक्येऽपि सर्वं खल्विदमित्यस्य चैतन्यांशे लक्षणया सर्वप्रपञ्चतद-तचैतन्ययोश्चैकत्वं सिद्ध्यति ।

प्रश्न—(२३) पुत्रादीनामात्मत्वम् आशङ्क्य तन्निराक्रिय-ताम् ।

अथवा

आत्मतत्त्वार्थविषये पूर्वपक्षं प्रदर्श्य वेदान्तसारदिशा तन्निर-स्यताम् ।

अथवा

विविधदर्शनानुमतप्रत्यक्चैतन्यस्वरूपं निरस्य वेदान्ताभिमतं सिद्धान्तपक्षं स्थापयत ।

उत्तरम्—दुर्लभमात्मज्ञानमवबोधनाय वेदान्तसारे अरुन्धती-दर्शनन्यायेन क्रमशः पुत्रादिष्वात्मत्वबोधकपूर्वपक्षं प्रदर्श्य तन्निराक-रणपूर्वकं सिद्धान्तपक्षं प्रदर्शितम् । तत्र चार्वाकबौद्धतार्किकादिमतप्रदर्श-नद्वारा पूर्वपक्षं तदनन्तरञ्च सिद्धान्तपक्षं प्रस्तूयते ।

पूर्वपक्षम्—(१) पुत्र-आत्मवादी चार्वाकमतम् केचित् चार्वा-काः 'आत्मा वै जायते पुत्रः' इति श्रुतेरनुरोधात् पुत्रविषये हार्दिक्या-वस्थाद्वा गृहादीनां नाशे जाते लोकः पुत्रान् रक्षति, इति लोकप्रमाण-वाद् वा, पुत्रे पुष्टे नष्टे आत्मनः पुष्टिं नाशं वा अनुभवतो लोकस्य-दर्शनाच्च पुत्र एवात्मेति कथयन्ति ।

(२) देहात्मवादी चार्वाकमतम्—अन्ये चार्वाकाः तन्न मन्यन्ते । लोको हि गृहादिनाशादिकष्टकाले लोकः पुत्रानपि परित्यज्य स्वशरीर-रक्षापरो दृश्यते । 'स वा एष पुरुषोऽन्नरसमयः' इति श्रुतिप्रमा-णात् । स्थूलोऽहं कृशोऽहमित्यादि अनुभवबलाच्च स्थूलशरीर एव आत्मा इति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(३) इन्द्रियात्मवादी चार्वाकमतम्—अपरे चार्वाकाः त[…] स्वीकुर्वन्ति। यतो हि सुषुप्तौ इन्द्रियाणां निष्क्रियत्वे सति शरीरस्य गमनादयः न सम्भाव्यन्ते। 'ते ह प्राणाः प्रजापतिं पितरमेत्य ब्रूयुः' इति श्रुतिः, न हि इन्द्रियं विना गमनादिक्रिया सम्भाव्यते इति श्रुतिबलात्, 'काणोऽहं, बधिरोऽहम्' इत्याद्यनुभवाच्च इन्द्रिय एव आत्मा इति।

(४) प्राणात्मवादी चार्वाकमतम्—इतरे चार्वाकाः तदप्यस्वीकुर्वन्तः प्राण एव आत्मा इति स्वीकुर्वन्ति। 'अन्योऽन्यतर आत्मा प्राणमयः' इति श्रुतिप्रमाणात्, अशनायावानहम्, पिपासावानहमित्यादि अनुभवबलाच्च प्राण एव आत्मा इति।

(५) मन-आत्मवादी चार्वाकमतम्—तदप्यस्वीकुर्वन्त अन्ये चार्वाकाः मन एव आत्मा इति कथयन्ति। 'अन्योऽन्यतर आत्मा मनोमयः' इति श्रुतिबलात् सङ्कल्पवानहम्, विकल्पवानहम् इत्याद्यनुभवाच्च।

(६) विज्ञानात्मवादी बौद्धमतम्—योगाचारमतावलम्बिनः विज्ञानवादिनो बौद्धास्तु चार्वाकमतं निराकुर्वन्ति। तन्मतानुसारं तु देहादयस्तु करणानि न तु कर्तारः, यः कर्ता, अर्थवान् स एव आत्मा इति। 'अहं कर्ता, अहं भोक्ता' इत्याद्यनुभवात् 'अन्योऽन्यतर आत्मा विज्ञानमयः' इति श्रुतिप्रमाणाच्च विज्ञान एव आत्मा इति।

(७) प्रभाकरमतं मीमांसकमतञ्च—विज्ञानवादीन् बौद्धान् मीमांसकाः प्रभाकरमतानुयायिनो निराकुर्वन्ति। तन्मतेन तु विज्ञानं तु धर्मं न हि धर्मी, आत्मा तु धर्मी एव। यत्तु अहं कर्ता अहं भोक्ता इत्यनुभवस्तद्धि भ्रान्तिजन्यमेव। "अन्योऽन्यतर आत्माऽऽनन्दमयः" इति श्रुतिप्रमाणात्, 'अहमज्ञः' इत्याद्यनुभवाच्च अज्ञानमात्मा इति।

(८) भाट्टमतम्—कुमारिलभट्टमतानुयायिनो मीमांसकाः अज्ञानसंवलित चैतन्यम् एव आत्मेति स्वीकुर्वन्ति। 'सुखमहमस्वाप्सं न किञ्चिदवेदिषम्' इति अनुभवपरामर्श एवात्र प्रमाणम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(६) माध्यमिकतावलम्बिनो बौद्धाः—माध्यमिकतावलम्बिनो बौद्धास्तु शून्यमेतत्सर्वमिति मन्यमानः शून्य एव आत्मा इति मन्यते। 'असदेवेदमग्र आसीद्' इति श्रुतिप्रमाणात्, सुषुप्तौ सर्वाभावाच्च शून्य एव आत्मा इति स्वीकुर्वन्ति।

उत्तरपक्षस्तु—अत्र पुत्रादारभ्य शून्यपर्यन्तं भिन्न-भिन्नप्रकारेण आत्मतत्त्वं निरूपितं तत्तु पूर्वपूर्वमतानामुत्तरोत्तरमतैः स्वयमेव खण्डनं कृतम्। यतो हि 'पुत्र नैवात्मा' इति देहात्मवादिनो स्पष्टीकुर्वन्ति, एवमेवान्यत्र ज्ञातव्यम्।

इति सर्वमेतत् स्वयं निराकृतत्वात् किं तदात्मेति जिज्ञासते। उच्यते—अन्नमयादि-आनन्दमयकोशव्यतिरिक्तं नित्यं शुद्धं बुद्धं प्रकाशस्वरूपं मुक्तस्वभावं आत्मा। अहं ब्रह्मास्मीति, विद्वदनुभवगतप्रबलप्रमाणसाहाय्याद् बहुत्र श्रुतिप्रमाणाच्च। तदत्र केचिदितरे श्रुतयो प्रदर्श्यन्ते —

कश्चिद्धीरः प्रत्यगात्मानमैक्षत् (कठ० ४।१)। अस्थूलमनणु-ह्रस्वमदीर्घम् (बृह० ३।८।८)। अचक्षुःश्रोत्रं तदपाणिपादम् (मुण्डक० १।१।६)। अप्राणो ह्यमनाः शुभ्रः (मुण्डक० २।१।२)। अनन्तश्चात्मा विश्वरूपो ह्यकर्ता (श्वेता० १।६) न चास्ति वेत्ता मम चित्सदाऽहम् (कैवल्य० २।१) तदेव सौम्येदमग्र आसीत् (छान्दो० ६।२।१)।

अत्र किमर्थम् "अन्नमयः" "प्राणमयः" आत्मा इत्यादि श्रुतिवाक्येषूक्तम् इति चेदुच्यते। अत्र अरुन्धतीप्रदर्शनन्यायेनैतत्सर्वमुक्तम्। यथा अरुन्धती प्रदर्शनाय कश्चित् प्रथमं चन्द्रमसं ततः सप्ततारा:, ततः त्रितारा:, तस्मै मध्यस्थं सूक्ष्मं तारकं दर्शयति तथैवात्रेति ज्ञातव्यम्।

प्रश्नः—(२३) अपवाद पदार्थं सम्यग्व्याख्यायताम्।

अथवा

अपवादो नाम रज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्ववद्वस्तुविवर्त-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्यावस्तुनोऽज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वम् । इति गद्य खण्डम् सम्यग् व्याख्यायताम् ।

उत्तरम्—कार्यस्य कारणमात्रावशेषणमपवादः—अवस्तुनिसञ्जाताया वस्तुबुद्धेरपसारणपूर्वकं सत्यवस्तुमात्रस्थापनमिति भावः। यथा रज्जौ सर्पस्य शुक्तौ रजतस्य वा प्रतीतौ तदपसारणपूर्वकं रज्जुशुक्त्यन्यतरस त्यवस्तुमात्रज्ञापनमपवादः । एवमेव ब्रह्मरूपसत्यवस्तुनि या अज्ञानादि प्रपञ्चमिथ्याप्रतीतिस्तदपसारणपूर्वकं ब्रह्मरूपसत्यवस्तुज्ञापनमेवाप वादः । यथार्थरूपेणावस्थिते वस्तुनि मिथ्याप्रतीतिरूपान्यथाभावो द्विधा भवति ।

(१) परिणामभावेन (विकारभावेन) (२) विवर्तभावे च विवर्तः, अध्यास इति चानर्थान्तरम्; तत्र—(१) परिणामभावः— वस्तुनः, स्वयथार्थरूपं परित्यज्य स्वरूपान्तरासत्तिः, परिणामः, यथा दुग्धस्य दधिरूपासक्तिः। (२) विवर्तभावः—वस्तुनः स्वरूपापरि त्यागेन वस्त्वन्तरमिथ्याप्रतीतिर्विवर्तः यथा रज्जावहेः, शुक्तौ रजतस्य वा प्रतीतिः। एतदेवोभयं निम्नलिखितकारिकायामित्थं प्रतिपादितम्

स तत्त्वतोऽन्यथा प्रथा विकार इत्युदीरितः ।
अतत्त्वतोऽन्यथा प्रथा विवर्त इत्युदाहृतः ॥

अयं सांसारिकप्रपञ्चो ब्रह्मणो विवर्तो न परिणामः। परिणाम स्वीकारे ब्रह्मण्यनित्यत्वादिदोषप्रसङ्गात् । विवर्तस्वीकारे तु ना दोषः । ब्रह्मरूपसत्यवस्तुनि प्रपञ्चस्य प्रतीतिमिथ्या; तामपसार्य ब्रह्म मात्रप्रतीतिरपवादः स्वस्वकारणे सम्पूर्णसांसारिकप्रपञ्चविलयनप्रका सम्यग्ज्ञाते सति पूर्वोक्तमिथ्याप्रतीतिर्नश्यति ब्रह्ममात्रं चावशिनष्टि अयमेव लयप्रकारो मूले तथाहीत्यादिना स्पष्टीकृतः—

दुःखसुखादिभोगायतनमेतच्चतुर्विधसकलस्थूलशरीरजातम्, एतन् भोग्यरूपमन्नपानादिकम्, तदाश्रयभूतं भूरादिचतुर्दशलोकसहितं ...दस्य श्रयम्, तदाधारभूतं ब्रह्माण्डञ्चैतत्सर्वं स्वकारणरूपपञ्चीकृतमहा... विलाप्यते । तदनन्तरं शब्दादिविषयसहितानि पञ्चीकृतमहा... भिन्न

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सप्तदशावयवं सर्वं सूक्ष्मशरीरञ्च स्वकारणभूतापञ्चीकृतमहाभूतेषु विलीयन्ते। ततः सत्त्वादिगुणसहितानि तानि सर्वापञ्चीकृतमहाभूतानि स्वकारणभूतेऽज्ञानोपहितचैतन्ये विलीयन्ते। एतदज्ञानं तदुपहितं सर्वज्ञत्वादिगुणविशिष्टं चैतन्यमीश्वरादि चैतत्स्वाधारभूतानुपहितचैतन्यरूपतुरीये ब्रह्मणि विलीयन्ते। इत्थमन्ते सर्वं स्वस्मिन् समावेश्य ब्रह्ममात्रमवशिनष्टि।

महाभारतीयशान्तिपर्वण्युत्पत्तिव्युत्क्रमेणायं पृथिव्यादीनां परब्रह्मणि लयो 'जगत्प्रतिष्ठा देवर्षे' इत्यारभ्य 'सम्प्रलीयते' इत्यन्तेन प्रतिपादितः।

प्रश्नः—(२४) अध्यारोपापवादाभ्यां 'तत्त्वमसि' इत्यत्र तत्त्वंपदार्थौ निर्दिश्यताम्।

उत्तरम्—वस्तुनि अवस्त्वारोपः अध्यारोपः। अध्यारोपनिराकरणं यथावद् वस्तुस्वरूपज्ञानम् अपवादः। तथा हि सच्चिदानन्दस्वरूपे ब्रह्मणि चराचरजगत्प्रपञ्चस्याभास अध्यारोपः, तत्रैव चराचरप्रपञ्चनिराशपूर्वकं स्वयंप्रकाशस्वरूपब्रह्ममात्रात्मकं ज्ञानमपवादः।

आभ्यामध्यारोपापवादाभ्यां यथार्थवस्तुज्ञानेन चराचरप्रपञ्चात्मकस्य जगतो भ्रान्तिरूपत्वे ज्ञाने सति, सच्चिदानन्दस्वप्रकाशस्वरूपस्य यथावद् ज्ञानं जायते। तेन च छान्दोग्योपनिषदि श्वेतकेतुं प्रति उद्दालकऋषिप्रोक्तस्य तत्त्वमसीति महावाक्यस्य तद्गतयोश्च तत्त्वंपदयोः सम्यगर्थः ज्ञायते।

अज्ञानं महाभूतानि, सूक्ष्मस्थूलशरीरसमष्टिस्तदुपहितचैतन्यं सर्वज्ञत्वादिविशिष्ट ईश्वरः सूत्रात्मा वैश्वानरश्चैतन्यं, तदनुपहितचैतन्यं, तुरीयचैतन्यञ्चेति समेषां तप्ताय:पिण्डवदेकत्वेनावभासनं तत्पदस्य वाच्यार्थः। तथा च अज्ञानावच्छिन्नमीश्वरचैतन्याधारभूतं तदनुपहितं चैतन्यं तस्याज्ञानं तथा तदवच्छिन्नेश्वरचैतन्येन विविक्ते सति अभिन्नत्वेनावभासनं तत्पदस्य लक्ष्यार्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एवमेव—अज्ञानं सूक्ष्मस्थूलशरीराणां व्यष्टिः प्राज्ञतैजसविश्व-चैतन्यं तदनुपहितचैतन्यञ्चैतेषां तप्तायःपिण्डवदभेदविवक्षया एकत्वेन अवभासनं त्वम्पदस्य वाच्यार्थः। तथा च व्यष्टिभूतं यदज्ञानं, सूक्ष्म-स्थूलशरीराणां व्यष्टिः तदुपहितं जीवचैतन्यं तदाधारभूतं यदनु-पहितं तुरीयचैतन्यं सर्वेषां भेदविवक्षया पृथक्पृथगवभासनं त्वम्पदस्य लक्ष्यार्थः।

एतदत्र तात्पर्यम्—तत्त्वम्पदयोः प्रत्येकयोर्द्वौ द्वावर्थौ—एको, वाच्यार्थः, अपरो लक्ष्यार्थः। अज्ञानसमष्टितदवच्छिन्नेश्वरहिरण्यगर्भ-वैश्वानरचैतन्यं तदनवच्छिन्नं च चिन्मात्रम् एतेषां तप्तायःपिण्वदेकत्वेन यदाऽवभासो जायते, तदेव तत्पदस्य वाच्यार्थः। अज्ञानं तत्कार्यभूत-प्रपञ्चावच्छिन्नमीश्वरादिचैतन्याधारभूतं यदनुपहितचैतन्यं तदेव तत्पदस्य लक्ष्यार्थः। एवमेव व्यष्टिभूतमज्ञानं तदवच्छिन्नं अल्पज्ञत्वा-दिविशिष्टं यत्प्राज्ञतैजसविश्वचैतन्यं तदाधारभूतञ्चानुपहितचैतन्यं एतत्त्रयाणां तप्तायःपिण्डवदेकत्वेन यदवभासः तदेव त्वम्पदस्य वाच्यार्थः॥ अज्ञानं तदुपहितं प्राज्ञतैजसविश्वचैतन्यं तदाधारभूतमनु-पहितचैतन्यञ्चेति सर्वेषां पृथक्पृथगवभासः तदेव त्वम्पदस्य लक्ष्यार्थः इति स्पष्टम्।

प्रश्न—(२८) महावाक्यार्थबोधप्रकारं लक्ष्यीकृत्य पूर्वपक्ष-निराकरणपूर्वकं जहदजहल्लक्षणां स्पष्टयत।

अथवा

'तत्त्वमसी'ति वाक्ये वाक्यार्थबोधप्रकारो लेख्यम्।

उत्तरम्—'तत्त्वमसि' इति वाक्यं छान्दोग्योपनिषदि उद्दालकेन श्वेतकेतुं प्रति प्रयुक्तम् अस्ति। तत्रास्यार्थः—हे श्वेतकेतो! त्वं (प्रत्यक्षत्वाल्पज्ञत्वादिविशिष्टं व्यष्टिभूताज्ञानोपहितं चैतन्यम्) तत् (परोक्षत्वसर्वज्ञत्वादिविशिष्टं समष्टिगतम् ईश्वर-प्राज्ञ-हिरण्यगर्भ-तैजस-विश्व-वैश्वानराणामाधारभूतं तुरीयं चैतन्यम्) एव असि अथवा तत् त्वम् एव असि। अनयोः तत्त्वम्पदार्थयोर्न कश्चिद् भेद इति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अत्र यत् तत्पदवाच्यम् स कथं त्वम्पदवाच्यं भवेदिति स्पष्टमेव विरोधः । अत एवात्र वाक्यार्थज्ञानस्य किञ्चित् प्रयत्नोऽपेक्ष्यते ।

पूर्वपक्षम्—(१) विशेषणविशेष्यभावसम्बन्धनिराशः—'तत्त्वमसी'ति वाक्ये नीलमुत्पलमिव विशेष्यभावसम्बन्धेन वाक्यार्थं न सङ्गच्छते । ननु नीलमुत्पलमित्यत्र यन्नीलं तदेवोत्पलम् इति, यदुत्पलं तदेव नीलमिति परस्परान्योऽन्याश्रितौ शब्दौ । तथैव तत्त्वमसीति वाक्येऽपि यत् तत् (परोक्षत्वसर्वज्ञत्वादिविशिष्टं चैतन्यं) तदेव त्वम् (अपरोक्षत्वाल्पज्ञत्वादिविशिष्टं चैतन्यम्) असि । इति कथं न वाक्यार्थं सङ्गच्छते इति चेत् ? न, तत्र हि नीलं गुणम् उत्पलं द्रव्यम् । नात्र तथा । अत्र तु तत् त्वं च उभावेव द्रव्यौ । विशेषणविशेष्यभावसम्बन्धन्तु गुणगुणिनोरेव स्यात् । तत्त्वमसीति वाक्ये तच्च उभावपि गुणिनावेव इति नात्र विशेषणविशेष्यभावसम्बन्धः सङ्गच्छते ।

(२) जहल्लक्षणानिराशः—अत्र तत्त्वमसीति वाक्ये 'गङ्गायां घोषः' इतिवज्जहल्लक्षणापि न सम्भाव्यते ।

यत्र वाक्ये अन्वयानुपपत्त्या तात्पर्यानुपपत्त्या वा मुख्यार्थस्य बाधे जाते वाक्यार्थबोधाय शब्दः स्वार्थं परित्यज्य स्वसम्बन्धिनं कञ्चिदन्यमेवार्थं सङ्केतयति तत्र जहल्लक्षणा स्यते । यथा 'गङ्गायां घोषः' इत्यत्र भगीरथरथरथाङ्गखातावाच्छिन्नजलप्रवाहरूपमुख्यार्थे घोषाधारत्वासम्भवाद् गङ्गाशब्दः तीररूपम् अर्थं सङ्केतयति । अतोऽत्र जहल्लक्षणा स्यात् ।

अत्र तत्त्वमसीति वाक्ये तथाविधं जहल्लक्षणा च सङ्गच्छते । गङ्गायां घोष इत्यत्र गङ्गाशब्दः प्रवाहरूपं स्वार्थं सर्वथा न त्यजतः । त्वम्पदस्य तत्पदस्य च वाच्यार्थौ तावेवात्र अंशतो लक्ष्यौ इति भेदः । यतो हि पदः स्वार्थं सर्वथा न जहति अतो जहल्लक्षणा न स्यात् । इति स्पष्टमेव ।

(३) अजहल्लक्षणानिराकृतः—ननु यदि जहल्लक्षणा न स्यात् ततो अजहल्लक्षणा सङ्गच्छेद् इति च न वक्तव्यम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यत्र पदः स्वार्थमत्यजन् स्वसिद्धये स्वसम्बन्धिनम् इतरम् अर्थम् आक्षिपति तत्र अजहल्लक्षणा स्यात्—

'स्वसिद्धये पराक्षेपः'।

इति लक्षणात् '। यथा 'शोणो धावति' इत्यत्र शोणगुणस्य गमनक्रियायां प्रत्यक्षसम्बन्धासम्भवात् शोणशब्दः स्वार्थमत्यजन् स्वाश्रयमश्वादिकम् आक्षिपति। अतोऽत्र अजहल्लक्षणा अस्ति।

तत्त्वमसि इति वाक्ये न तथा तत्पदं त्वम्पदं वा स्वसिद्धये स्वेतरम् अर्थम् आक्षिपतः। अत्र तु यत्तद् (परोक्षत्वसर्वज्ञत्वादिविशिष्टं चैतन्यं) तदेव त्वम् (अपरोक्षत्वादिल्पत्वाविशिष्टं चैतन्यं) असि। इति विरुद्धं वाक्यार्थ स्वपदार्थमत्यजन्नपि स्वेतरमर्थं न आक्षिपतः, इति न अजहल्लक्षणा सङ्गच्छते।

उत्तरपक्षम्—जहदजहल्लक्षणास्थापनम्—यत्र वाक्ये पदानि स्वार्थं कुत्रचिदंशे त्यजन्तः अन्यम् अविरुद्धं स्वार्थमेव स्वीकुर्वन्ति तत्र किञ्चिदंशं जहत् किञ्चिदंशञ्चाजहद् जहदजहल्लक्षणा भवति इदमेव भागलक्षणा इति च कथ्यते।

यथा 'सोऽयं देवदत्त' इत्यत्र यः सः (तत्काल-तद्देशविशिष्टं देवदत्त) सः अयम् (एतत्काल-एतद्देशविशिष्टं) कथं स्यादिति स्पष्टमेव विरोधः। तत्र विरुद्धार्थं परित्यज्य देवदत्तमात्रे सङ्केते देवदत्तत्वजातिग्रहणाद् वाक्यार्थ निष्पद्यते। अतोऽत्र जहदजहल्लक्षणा भवति।

तथाऽत्रापि तत्त्वमसीति वाक्ये तत्-त्वं च पदौ स्वार्थे परस्परविरुद्धांशे त्यजतः ततश्च अविरुद्धांशमात्रे सङ्केतत्वाद् अत्र जहदजहल्लक्षणा भवति। यथा हि अत्र यत् तत्—परोक्षत्वसर्वज्ञत्वादिविशिष्टं चैतन्यं यच्च त्वम्—अपरोक्षत्व-अल्पज्ञत्वादिविशिष्टं चैतन्यम् इत्युभावपि शब्दौ स्वविरुद्धांशौ परोक्षत्वापरोक्षत्वौ सर्वज्ञत्वाल्पज्ञत्वादीन् व त्यजतः। ततश्च अविरुद्धमंशम्—चैतन्यमात्रं यत् नित्यं शुद्धं बुद्धं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मुक्तमिति गृह्यते। अतोऽत्र जहदजहल्लक्षणा भवति। इति सर्वमुपपन्नम्।

एवं तत्त्वम्पदार्थयोः सम्यग्वाक्यार्थे उपपन्ने सति तत्त्वम्पदज्ञानपूर्वकतत्तादात्म्यज्ञाने जाते—

'इत्थमन्योऽन्यतादात्म्यप्रतिपत्तिर्यदा भवेत्।
अब्रह्मत्वं त्वमर्थस्य व्यावर्त्येत तदैव हि॥
तदर्थस्य च पारोक्ष्यं यद्येवं किं ततः शृणु।
पूर्णानन्दैकरूपेण प्रत्यग्बोधोऽवतिष्ठते॥
प्रत्यग्बोधो य आभाति सोऽद्वयानन्दलक्षणः।
अद्वयानन्दरूपश्च प्रत्यग्बोधैकलक्षणः॥'

तथा चोक्तं पञ्चदश्याम्—

'एकमेवाद्वितीयं सन्नामरूपविवर्जितम्।
सृष्टेः पुराऽधुनाऽप्यस्य तादृक्त्वं तदितीर्यते॥
श्रोतुर्देहेन्द्रियातीतं वस्त्वत्र त्वम्पदेरितम्।
एकता ग्राह्यतेऽसीति तदैक्यमनुभूयताम्॥' इति।

प्रश्नः—(२६) 'तदा पटकारतन्तुदाहे पटदाहवदखिलकारणेऽज्ञाने बाधिते सति तत्कारणस्याखिलस्य बाधितत्वात्तदन्तर्भूताखण्डाकाराकारिता चित्तवृत्तिरपि बाधिता भवति। तत्र प्रतिबिम्बितं चैतन्यमपि यदा दीपप्रभादित्यप्रभावभासनासमर्था सती तयाभिभूता भवति तथा स्वयम्प्रकाशमानप्रत्यगभिन्नपरब्रह्मावभासनानर्हतया तेनाभिभूतं सत्त्वोपाधिभूताखण्डचित्तवृत्तेर्बाधितत्वाद्दर्पणाभावे मुखप्रतिबिम्बस्य मुखमात्रत्ववत्प्रत्यगभिन्नपरब्रह्ममात्रं भवति।'

इति गद्यखण्डो व्याख्येयः।

उत्तरम्—यदा अध्यारोपापवादपूर्वक
चराचरप्रपञ्चपूर्णमज्ञानं बाधते। तथा सति अहं
स्वभावपरमात्मानन्ताद्वयं ब्रह्मास्मीत्यखण्डाकार
देति अर्थात् नित्यशुद्धबुद्धस्वरूप ब्रह्म प्रकाश

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

काराकारिता जायते । ननु चित्तवृत्तिस्तु अचेतना एव तत्कथं चित्तवृत्त्या दीपप्रभया स्वयम्प्रकाशस्वरूपः सूर्यमण्डल इव ब्रह्म प्रकाशते ? इति चेत्; उच्यते—चित्तवृत्तिस्तु नित्यशुद्धप्रकाशात्मानं ब्रह्म नैव विषयीकरोति । सा ह्यत्र अज्ञानविशिष्टं प्रत्यगभिन्नं परब्रह्म विषयीकुर्वाणा चैतन्यप्रतिबिम्बेन च सहिता प्रत्यक्चैतन्यगतमखिलमज्ञानं विनाशयति । एतदज्ञानावरणविनाशमेव अखण्डाकाराकारितचित्तवृत्तेरुदयस्य प्रयोजनम् अस्ति । निवृत्ते चाज्ञानावरणे 'अहं नित्यशुद्धबुद्धस्वरूपो ब्रह्मास्मी'ति अनुभूयते ।

ननु अज्ञाने निवृत्तेऽपि सति अज्ञानाकार्यभूतं सकलप्रपञ्चं कथं न भासते ? इति चेत्, उच्यते—तदेति । अज्ञाने निवृत्ते सति अज्ञानविजृम्भितं सकलप्रपञ्चं तथैव तिरोभवति यथा तन्तुदाहे जाते तत्कार्यभूतं पटं स्वयमेव नश्यति । अत्र कारणकार्यभाव एव कारणम् । उपादानकारणस्य नाशे सति कार्यमपि नश्यति । अत्रापि कार्यं चराचरप्रपञ्चं कारणञ्चाज्ञानम् । कारणभूतस्याज्ञानस्य निवृत्ते सति कार्यभूतं जगत्प्रपञ्चमपि निवर्तते ।

ननु अज्ञानेऽपि निवृत्ते सति अखण्डाकाराकारितावृत्तिस्त्ववशिष्यते एव, एवं सति कथमद्वैतसिद्धिर्जायते ? इति चेत्, न । चित्तवृत्तेरपि अज्ञानप्रपञ्चान्तर्गतत्वेन न साऽवशिष्यते । एवं च अज्ञानस्य तत्कार्यभूतप्रपञ्चस्य, अखण्डाकाराकारितचित्तवृत्तेश्च सममेव निवृत्तिर्भवति । तथा च अखण्डाकाराकारितः चित्तवृत्तिप्रतिबिम्बितस्य चैतन्याभासस्य प्रधानचैतन्ये विलयं जायते यथा हि बिम्बप्रतिबिम्बमध्यस्थस्य दर्पणस्य नाशे सति बिम्बमेवावशिष्यते एवमेवात्र ब्रह्ममात्रावशिष्टत्वं ज्ञेयम् । तथा च यथा दीपप्रभा सूर्यमण्डलं न प्रकाशितुं शक्नोति, तथापि स्वयं सूर्यप्रभया प्रकाशमाना जायते तथा जीवात्मनो विषयेऽत्रावगन्तव्यम् ।

एवं सति नित्यशुद्धब्रह्मस्वयम्प्रकाशात्मकस्य ब्रह्ममात्रस्यावशिष्टे सति—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri.

'अहं भोजकं नैव भोज्यं न भोक्ता ।
चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥'

इति स्पष्टं प्रतीयते ।

प्रश्नः—(२७) 'मनसैवानुद्रष्टव्यम्' 'यन्मनसा न मनुते' इत्यनयोर्विरोधो निराक्रियताम् ।

उत्तरम्—यदा खलु अज्ञानावरणो भिद्यते तदा चैतन्यप्रतिबिम्बसहिताखण्डाकाराकारितचित्तवृत्त्या प्रत्यक्चैतन्यगताज्ञाननाशे जाते सति प्रत्यगभिन्नं परब्रह्ममात्रमवशिष्यते । यतो हि स्वयम्प्रकाशमानत्वात् चित्तवृत्तिगतचैतन्याभासेन तस्य प्रकाशनासम्भवः । तदा खलु वृत्तिप्रतिबिम्बितचैतन्याभासेन अज्ञानावच्छिन्नचैतन्यस्य अज्ञाननिवृत्तिपूर्वकं स्वरूपावभासं लक्ष्यीकृत्य—'मनसैवानुद्रष्टव्यम्' 'मनसैवेदमाप्तव्यम्' "दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः' बुद्ध्यालोकनसाध्येऽस्मिन् वस्तुन्यस्तमिता यदि' 'बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव' इत्यादयः श्रुति स्मृति-वाक्यानि चरितार्थानि भवन्ति, तदेव स्वयम्प्रकाशशीलस्य परब्रह्मणोऽन्येन प्रकाशनासम्भवात्, तस्य मनोऽहङ्कारबुद्धिभिरसम्भवत्वाच्च 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' 'यन्मनसा न मनुते' 'अनाशिनोऽप्रमेयस्य' इत्यादिश्रुतयः कृतार्था भवन्ति । एवं श्रुतिस्मृतिवाक्यानां परस्परविरोधः परिहृतो भवति । यथोक्तं पञ्चदश्याम्—

'फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितम् ।
ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता ॥
चक्षुर्दीपावपेक्ष्येते घटादेर्दर्शने यथा ।
न तथा दीपदर्शने चक्षुरेकमपेक्ष्यते ॥
स्वयं स्फुरणरूपत्वान्नाभास उपयुज्यते ।
स्थितोऽप्यसौ चिदाभासो ब्रह्मण्येकीभवेत्परम् ।
न तु ब्रह्मण्यतिशयं फलं कुर्याद् घटादिवत् ॥'

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यथा घटादिजडपदार्थविलोकनाय चक्षुर्दीपौ द्वावेवापेक्षेते न तदा दीपदर्शने दीपस्य स्वयम्प्रकाशत्वात् चक्षुरेवानापेक्षते । तथैव अज्ञानावच्छिन्न-जीवचैतन्यगताज्ञानं निरस्य ब्रह्ममात्रावशेषं विधातुम् 'अहं ब्रह्मास्मी'त्येतदाकाराकारिता चित्तवृत्तिः तद्गतचिदाभासश्च द्वावेवापेक्षेते । तत्रैव ब्रह्ममात्रावशेषे जाते स्वयम्प्रकाशमानत्वान्नात्र चिदाभास अपेक्षते, परन्तु तत्र चिदाभास ब्रह्मणि लीयते, तथा च तदाकाराकारिता सती तं प्रकाश्य स्वयमेव नश्यति ।

यथा हि कतकचूर्णं जलगतमलं निरस्य स्वयं च नश्यति, यथा वा अरणिस्थितोऽग्निं अरणितोत्पन्ना सती अरणिं नाशयित्वा स्वयमपि प्रशाम्यते तथैवायं चित्तवृत्तिर्ब्रह्ममात्रं स्वयं विलीयते । इति स्पष्टं सर्वम् ।

प्रश्न—(२८) 'बुद्धितत्स्थचिदाभासौ द्वावेतौ व्याप्नुतो घटम् ।
तत्राज्ञानं धिया नश्येदाभासेन घटनः स्फुरेत् ॥'

इति कारिका सविस्तरं व्याख्येया ।

उत्तरम् - यदा चित्तवृत्तिः घटादिजडपदार्थविषयिणी भवति । अर्थात् घटाद्याकाराकारिता चित्तवृत्तिः सञ्जायते । तदा 'घटविषयकज्ञानवनाहम्' इत्येवंविधा चित्तवृत्तिरुदयं याति । तदा सा वृत्तिः घटावच्छिन्नचैतन्यावरकाज्ञानं विनाशयति, तथा सा एव वृत्तिर्वृत्तिस्थचिदाभासेन घटमपि प्रकाशयति । एतदेवोक्तं पञ्चदश्याम्—

'बुद्धितत्स्थचिदाभासौ द्वावेतौ व्याप्नुतो घटम् ।
तत्राज्ञानं धिया नश्येद् आभासेन घटः स्फुरेत् ॥' इति ।

अस्यायमर्थः—बुद्धिः=चित्तवृत्तिः, तत्स्थचिदाभासः=चित्तवृत्तिप्रतिबिम्बितचैतन्याभासः, इमौ द्वावेव घटं व्याप्नुतः=स्वविषयं कुरुतः । तत्र अज्ञानं=घटविषयकमज्ञानं, धिया=बुद्ध्या नश्येत् आभासेन=चित्तवृत्तिप्रतिबिम्बितचैतन्याभासेन, घटः स्फुरेत्=प्रकाशं यातीत्यर्थः ।

यदा दीपः प्रथमं घटगतमन्धकारं नाशयति पुनः स्वयमेव तं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रकाशयति, तथैव चित्तवृत्तिः प्रथमं घटविषयकम् अज्ञानं निराकरोति पुनश्च स्वयं घटं प्रकाशयति इति ।

प्रश्नः—(२६) वेदान्तसारानुसारं श्रवणं व्याख्यायताम् अथवा तात्पर्यनिर्णयकानि लिङ्गानि उपक्रमोपसंहारादीनि वर्णयत ।

एवंपूर्वोदितोदितयाऽन्तःकरणवृत्त्या प्रत्यगभिन्नचैतन्यसाक्षात्कृतौ तत्साधनभूतश्रवणादीनामनुष्ठानस्यापेक्षितत्वात्तेऽपीह प्रदर्श्यन्ते—

उत्तरम्—षड्विधलिङ्गैरशेषवेदान्तवाक्यानामेकस्मिन्नद्वितीयब्रह्मणि तात्पर्यावधारणम् । तत्र लीनमर्थं गमयतीति लिङ्गशब्दव्युत्पत्त्या षड्विधलिङ्गानि ब्रह्मात्मैकत्वावबोधकोपक्रमोपसंहारादीनि तैरित्यर्थः । तानि च—"उपक्रमोपसंहारा"वित्यादिना प्रदर्शितपूर्वाणि । तद्यथा—

उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् ।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ॥

(१) उपक्रमोपसंहारौ—प्रकरणप्रतिपाद्यविषयमादावुपक्रम्यान्ते तस्यैवोपपादनमुपक्रमोपसंहारौ, यथा छान्दोग्ये षष्ठाध्याये—प्रकरणप्रतिपाद्यमद्वितीयं वस्तु 'एकमेवाद्वितीयम्' इत्येवमादावुपक्रम्य 'ऐतदात्म्यमिदं सर्वम्' इत्येवंरूपेणान्ते तस्यैवोपपादनम् ।

(२) अभ्यासः—स्पष्टोऽर्थः ।

(३) अपूर्वता—प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुनः प्रमाणान्तराविषयताऽपूर्वता । यथा छान्दोग्ये एव—'त त्वौपनिषदं पुरुषं पृच्छामी'त्यादिश्रुतिभिर्ब्रह्मण उपनिषन्मात्रप्रामाण्यप्रतिपादनेन तद्विषये प्रमाणान्तराभावप्रतिपादनम् ।

(४) फलम्—प्रकरणप्रतिपाद्यस्यात्मज्ञानस्य तदनुष्ठानस्य वा श्रूयमाणं यत्प्रयोजनं तत्फलम्, यथा 'ब्रह्मविद् ब्रह्मैव भवति, तरति शोकमात्मवित्' इत्यादिरूपेणाद्वितीयवस्तुज्ञानस्य प्रयोजनमद्वितीयवस्तुप्राप्तिरुक्ता ।

(५) अर्थवादः—प्रकरणप्रतिपाद्यस्य वस्तुनः स्थाने स्थाने

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रशंसनमर्थवादः, यथा 'उत तमादेशमप्राक्ष्यः'—इत्यादावद्वितीयवस्तु-ब्रह्मणः प्रशंसा।

(६) **उपपत्तिः**—प्रकरणप्रतिपाद्यविषयं प्रमाणीकर्तुं या युक्ति-रूपस्थाप्यते सा उपपत्तिः, यथा जगतो ब्रह्मविवर्तसाधनाय 'यथा सौम्यैकेन'—इत्यादिश्रुतिरुपपत्तिः, अर्थात् यथा एकेनैव मृत्पिण्डेन निर्मितं घटशरावादिवस्तु विकारानुकूलनाममात्रेण भिन्नमपि मृद्रूपमेवेति सत्यम् एवमेवैतत्सकलं नामरूपात्मकं जगद् ब्रह्मणो निवर्त्तो नान्यदिति तद्विवर्तस्य प्रपञ्चस्य विकारनामधेययोर्वाचारम्भणमात्रत्वात्तन्मात्रमेव सत्यमिति युक्तिः।

मननम्—षड्विधलिङ्गतात्पर्यावबोधपूर्वकवेदान्तानुकूलयुक्तिभिरद्वितीयवस्तुनो (ब्रह्मणः) निरन्तरमनुचिन्तनम्।

निदिध्यासनम्—देहादिबुद्धिपर्य्यन्तविभिन्नजडपदार्थेषु तद्विभिन्नतानिराकरणपूर्वकं सर्वत्रैकाद्वितीयब्रह्मैक्यप्रत्ययप्रवाहीकरणम्।

समाधिः—ज्ञेयरूपे चित्तस्य निश्चलावास्थितिः समाधिः। स द्विविधः—

(१) सविकल्पकः (२) निर्विकल्पकश्च। तत्र—

(१) **सविकल्पकः**—ज्ञातृ-ज्ञान-ज्ञेयत्रिपुटीभेदभानपूर्वकमद्वितीयवस्तुन्यहं ब्रह्मास्मीति तदाकाराकारितायाश्चित्तवृत्तेरवस्थानम्।

ननु सकलभेदनिराकरणपूर्वकमद्वैतवस्तुमात्रभानार्थमेवोक्तसमाध्योः प्रवर्त्तनमिति तदवस्थायामपि ज्ञात्रादिभेदभानेऽद्वैतवस्तुसिद्ध्यभावस्समाधेरनुपयुक्तिश्चेत्यत आह—तदेति। **तदा अर्थात्**—सविकल्पकसमाध्यनुभवकाले मृण्मयगजादिभानेऽपि मृद्भानवद् ज्ञात्रादिभेदभानस्य वाचारम्भणमात्रत्वाद द्वैतमेव वस्तु भासते। एतदेव 'दृशिस्वरूपमि'त्यादिना स्पष्टीकृतम्—

'यत् साक्षिस्वरूपम्' यच्चाकाशवत्सर्वत्र व्याप्तम्—एवं सर्वथा निर्लिप्तम्, यच्च सर्वदा एकरूपेणैवावभासमानम्—न चन्द्रादिप्रकाशवत्कदाचित्क्षीणप्रकाशं कदाचिच्चाधिकप्रकाशम्, यच्च न कदापि

Kirtikant Sharma Collection, Najafgarh.

CC-0. In Public Domain. Digitization by eGangotri

जायते, यच्चाक्षरम्; अविनश्वरम् एवमलेपकम् अविद्यादिदोषरहितम्, यच्च सर्वगतम् सर्वत्र वर्तमानम् एवं सजातीयविजातीयभेदशून्यम्; यच्च सर्वथा कार्यकारणोपाधिनिर्मुक्तम् एवं निरतिशयानन्दस्वरूपं यत्परं ब्रह्म (ॐ) तदहमिति भावः। अत्र यथा परमात्मनो भिन्न-भिन्नोपाधीनां निर्देशेऽपि वस्तुगत्या सर्वोपाधयः एकस्यैव परब्रह्मणो विभिन्न-नामानीति सदेकत्वं न विरुध्यते तथैव सविकल्पकसमाधौ ज्ञात्रादिभेदभानेऽपि तत्सर्वमद्वैतं ब्रह्मैवेति भिन्नतायामप्येकताया एवानुभवेऽद्वैतस्य भानं न विरुध्यते।

निर्विकल्पकसमाधिः अत्र ज्ञातृ ज्ञान-ज्ञेयभेदभावभानाभाव इत्यद्वितीयवस्तुनि तदाकाराकारितचित्तवृत्तेरतितरामेकीभावेनावस्थानम्। अर्थात् चिराभ्यासवशादस्मिन् समाधौ संस्कारा लुप्यन्तीति, ज्ञातृज्ञानज्ञेयभेदभावलुप्त्या यथा जलाकाराकारितलवणस्य न पृथगवभासोऽपि तु जलमात्रस्यैवावभासस्तथैवास्मिन् समाधावद्वितीयवस्त्वाकाराकारितचित्तवृत्तिरपि न पृथगवभासतेऽपि च त्वद्वितीयवस्तुमात्रमेवावभासते। ननु सुषुप्तावपि वृत्त्यभानादिदानीं समाधावपि च तथात्वप्रतिपादनादुभयोरेकीभावः स्यादिति चेन्न समाधि सुषुप्त्योरुभयत्र वृत्त्यभाने समानेऽपि समाधौ जलाकाराकारितलवणमिवाद्वितीयवस्तुन्यतितरामेकीभावेनानवभासमानवृत्तेः सद्भावात्सुषुप्तौ च सर्वथा तदभावाद्भेदोपपत्तेः।

प्रश्नः—(३०) निर्विकल्पकसमाधेरङ्गानि निर्दिश्यताम्।

उत्तरम्—निर्विकल्पकसमाधेः अष्टाङ्गानि भवन्ति। ते यथा—यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयः। तत्र—

(१) यमाः—अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाः यमाः।

(२) नियमाः—शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः।

(३) आसनानि—करचरणादिसंस्थानविशेषलक्षणानि पद्मस्वस्तिकादीनि आसनानि।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(४) प्राणायामाः—रेचकपूरककुम्भकलक्षणाः प्राणनिग्रहोपायाः प्राणायामाः ।

(५) प्रत्याहाराः—इन्द्रियाणां स्वस्वविषयेभ्यः प्रत्याहरणं प्रत्याहाराः ।

(६) धारणा—अद्वितीयवस्तुनि अन्तरिन्द्रियधारणं धारणा ।

(७) ध्यानम्—अद्वितीयवस्तुनि विच्छेद्यविच्छिद्यान्तरिन्द्रियवृत्तिप्रवाहो ध्यानम् ।

(८) समाधिः—ज्ञेयरूपे वस्तुनि चित्तस्य निश्चलतावस्थितिः समाधिः । अत्र समाधि-शब्देन सविकल्पक-समाधिरेवोच्यते । इति सर्वं स्पष्टम् ।

प्रश्नः—(३१) निर्विकल्पकसमाधेः के विघ्नाः ? इति विविच्यताम् ।

उत्तरम्—निर्विकल्पकसमाधिं प्रदर्श्य वेदान्तशास्त्रे तत्र प्रत्यूहा अपि सम्यक् प्रतिपादिताः । तत्र वेदान्तसारे महर्षिणा सदानन्दयोगिना चत्वारो विघ्ना वर्णिताः । अर्थात् निर्विकल्पकस्य लयविक्षेपकषायरसास्वादलक्षणाश्चत्वारो विघ्नाः सम्भवन्ति । तत्र —

(१) लयः—आलस्यवशाच्चित्तवृत्तिः शब्दादिबाह्यविषयाणां ग्रहणे उपेक्षिता भवति, किन्त्वेवं कृते प्रत्यगात्मस्वरूपोऽपि नावभासते । अत एव चित्तवृत्तिर्नितरां निद्रिता सञ्जायते । इयमेव दशा लय इत्युच्यते ।

(२) विक्षेपः—अखण्डवस्तुज्ञानाय अन्तर्मुखतया प्रवृत्ता सती अपि चित्तवृत्तिर्यदा तदवलम्बने असमर्था सती पुनः बहिर्मुखतया प्रतिनिवर्तते, तदेव विक्षेप इत्युच्यते ।

(३) कषायः—लयविक्षेपरूपविघ्नयोरभावेऽपि उद्बुद्धरागादिवशात् तत्स्तब्धीभावमापन्नयोश्चित्तवृत्तेरद्वितीयवस्तुनोऽवलम्बनं कषायः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(४) रसास्वादः—निर्विकल्पकसमाध्यारम्भकालेऽनुभूयमानो यो सविकल्पकानन्दस्तत्परित्यागानन्तरं पुनस्तस्यैवास्वादनं रसास्वादः ।

अस्यार्थः—निर्विकल्पकसमाधिदशाप्राप्तिपूर्वं यः सविकल्पकसमाधिरूपलभ्यते तत्र ब्रह्मानन्दभ्रमेण भूयो भूयः भ्रमणं निर्विकल्पकसमाधेर्विघ्नरूपो जायते । अत एव रसास्वादे मग्नः सन् जीवः सविकल्पकदशां या निर्विकल्पकसमाधिप्राप्तेः अङ्गरूपेण वर्तते विघ्नमिव करोति इति स्पष्टार्थः ।

प्रश्नः—(३२) 'लये सम्बोधयेच्चित्तं विक्षिप्तं शमयेत् पुनः ।
स कषायं विजानीयाच्छमप्राप्तं न चालयेत् ॥
नास्वादयेद्रसं तत्र निःसङ्गः प्रज्ञया भवेत् ।
यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता ॥'

इतीमे कारिके व्याख्येये ।

उत्तरम्—लयविक्षेपकषायरसास्वादाः चत्वारो विघ्ना निर्विकल्पकसमाधेः । तैर्विघ्नैः रहितः सत् चित्तः यदा अद्वितीये ब्रह्मणि निश्चलो भवेत् तदैव जीवः कृतार्थः स्यादिति एतद् विघ्नचतुष्टयं वेदान्तशास्त्रे । तत्रैवोक्तम्—लये सम्बोधयेदिति ।

लये सम्बोधयेत् चित्तम्—निद्रारूपे लये चित्ते निमग्ने सति तं पुनः पुनः प्रबोधयेत्, जागरणाय प्रोत्साहयेत् । समाधि-अवस्थाप्राप्त्यर्थं पुनः पुनः प्रेरितव्यमित्यर्थः ।

विक्षिप्तं शमयेत्—विक्षेपरूपे विघ्ने उपस्थिते सति अर्थात् बाह्यवस्तून्मुखे चित्ते जाते वैराग्यादिद्वारा पुनः पुनः तं शमयेत् । धैर्यावलम्बनेन पुनः ब्रह्मण्युन्मुखं प्रवर्तयेद् ।

'न कषायं विजानीयाच्छमप्राप्तं न चालयेत्'—कषायरूपविघ्ने समुपस्थिते एवं चिन्तयेत्—कलुषितं मे चित्तम्, अस्यां च रागादिवासनायां बाह्यविषयप्रापकत्वेन नानयाऽखण्डवस्तुप्राप्तिरिति । एवं चावधार्य चित्तं प्रत्यक्प्रवणं कुर्यात् । एवं कृते सति चित्तं शमप्राप्तं स्यात्तदा तस्मान्न चालयेत् । तत्रैव स्थिरीकरणाय प्रयतेयेदिति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नास्वादयेद् रसं तत्र—रसास्वादरूपविघ्ने समुपस्थिते चित्तं तस्मान्निवारयेत्। सविकल्पकसमाधिदशायाम् आत्मानं कृतकृत्यं न मन्येत्। पुनरपि निर्विकल्पकसमाधिदशाप्राप्त्यर्थं प्रयत्नः कर्तव्यमिति तात्पर्यः।

एवं निर्विकल्पकसमाधेर्विघ्नान् दूरीकृत्य यदा तत्स्थितिं प्राप्नोति निवातस्थ दीप इव निश्चलः शान्तश्च भवति। इति सर्वमुपपन्नम्।

बुद्धाद्वैतसतत्त्वस्य यथेष्टाचरणं यदि।
शुनां तत्वदृशां चैव को भेदोऽशुचिभक्षणे॥

इति स्पष्टमेवार्थः।

अत एवोक्तं नैष्कर्म्यसिद्धा—उत्पन्नात्मावबोधस्येति। उत्पन्नात्मावबोधस्य—ज्ञातात्मतत्त्वस्य परब्रह्ममात्रे लग्ना चित्तवृत्तिर्यस्य तस्य संज्ञद्वेषादयो गुणा यत्नं विनैव भवन्ति। न हीने अनभिमानित्वाद्वेष्टृत्वादयो सद्गुणास्तस्य ज्ञानसाधनता सन्तीत्यर्थः।

प्रश्नः—(३३) अधोलिखित विषयेषु टिप्पणीदेया—

१—काम्यकर्माणि	२—नित्यकर्माणि	३—उपासना कर्माणि
४—निषिद्धकर्माणि	५—नैमित्तिककर्माणि	६—प्रायश्चित्तकर्माणि
७—अध्यारोप:	८—अपवाद:	९—परिणाम:
१०—विवर्त:	११—तुरीय चैतन्यम्	१२—ईश्वर चैतन्यम्
१३—प्राज्ञचैतन्यम्	१४—आवरणशक्ति:	१५—विक्षेपशक्ति:
१६—पञ्चवायव	१७—वैश्वानरचैतन्यम्	१८—विश्वचैतन्यम्

काम्य कर्माणि—यत्किञ्चित्फलकाङ्क्षया क्रियमाणानि कर्माणि काम्यानि।

यथा—स्वर्गप्राप्तीच्छया क्रियमाणानि ज्योतिष्टोमयागादीनि

ननु ज्योतिष्टोमादीनां धर्मसाधत्वेन पुण्यप्रदायकत्वेन

KIrtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शुभकर्मतया कथं तेषा वेदान्तविद्याधिकारित्वे प्रतिबन्धकत्वमिति च्छृणु, ज्योतिष्टोमादीनां शुभकर्मत्वेऽपि तत्फलभोगार्थं जन्ममरणहेतुतया मोक्षावरोधकत्वेन निषिद्धकर्मवत्तेषामपि वेदान्तविद्याधिकारित्वे प्रतिबन्धकत्वम् ।

(२) नित्यकर्माणि—येषां करणे विशेषपुण्याभावेऽप्यकरणे प्रत्यवायः—तानि नित्यानि, यथा सन्ध्यावन्दन-पञ्चमहायज्ञादीनि ।

[दैनिकगृहमार्जनस्नानदन्तधावनादिकरणे , विशेषपुण्याभावेऽप्यकरणे मालिन्यजन्यकीटाणुनिमित्तसम्भावनेति तानि नित्यं निष्पाद्यन्ते । एवमेव प्रतिदिनकृतज्ञाताज्ञातपापानस्द्धार्थं प्रतिदिनं क्रियमाणानि यानि सन्ध्यावन्दनादीनि तानि नित्यकर्माण्युच्यन्ते]

उपासनाकर्माणि—उपासनानि—'सर्वं खल्विदं ब्रह्म' इत्यादिशास्त्रीयप्रमाणैः सकलचराचरप्रपञ्चस्य ब्रह्मणो रूपत्वे निश्चिते सगुणे ब्रह्मणि चिरकालपर्यन्तमात्मनो मनोवृत्तिं स्थिरीकर्तुं क्रियमाणानि कर्माणि उपासनानि, यथा—शाण्डिल्यविद्यादीनि ।

[छान्दोग्योपनिषदि—'सर्वं खल्विदं ब्रह्म' एतदारभ्य 'अस्य न विचिकित्सास्तीति ह स्माह शाण्डिल्यः' (३। १४।१, २) एतत्पर्यन्तं शाण्डिल्यर्षिणा ब्रह्मोपासनोक्तेति सा शाण्डिल्यविद्योच्यते, आदिना शतपथब्राह्मणोक्ताः 'स आत्मानमुपासीत, मनोमयम्', तथा बृहदारण्यके—'मनोमयोऽयं पुरुषो भाःरूपः' इत्यादयो ग्राह्याः । बुद्धिशुद्ध्यर्थं नित्यनैमित्तिकप्रायश्चित्तकर्माणि तथा चित्तैकाग्रतार्थमुपासनादिकर्माणि क्रियन्ते, 'तमेतमात्मानम्'—इत्यादिश्रुतिः 'तपसा कल्मषं हन्ति'—इत्यादि-स्मृतिश्चात्र प्रमाणम् । पितृलोकसत्यलोकावाप्तिस्तेषां नित्यनैमित्तिकोपासनकर्मणामवान्तरफलम् । प्रधानफलम् तेषां बुद्धिशुद्धिश्चित्तैकाग्रतैवेति गौणरूपेणानयोर्मोक्षसाधनत्वम् ।]

(४) निषिद्धकर्माणि—यानि कर्माणि अधर्मजनकत्वात् निरयप्राप्तिसाधनानि, तानि निषिद्धानीति कथ्यन्ते, शास्त्रेषु निषिद्धत्वात् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain: Digitization by eGangotri

यथा-ब्रह्महत्यासुरापानादि कर्माणि । वेदादिषु सर्वथा निषिद्धानि सन्तोऽपि ते रागद्वेषादिवशाज्जनैर्विधीयन्ते । एतैर्निषिद्धकर्मैः चित्त-कालुष्यं, इह लोके दुःखम्, अन्ते च निरयपातो जायते । इति तानि सर्वथा त्याज्यानि ।

(५) नैमित्तिककर्माणि—केनचिन्निमित्तेन विधीयमानानि कर्माणि नैमित्तिकानीति संज्ञयाऽभिधीयन्ते । यथा—पुत्रजन्मे जातेष्ट्यादीनि पुत्रजन्मनो निमित्तत्वात् तत् नैमित्तिकमिति कथ्यते ।

(६) प्रायश्चित्तकर्माणि—मानवो नित्यमेव सहजप्रवृत्तिवशात् ज्ञाताज्ञातानि बहुविधानि पापानि करोत्येव । एवंविधानां सहज-प्रवृत्तिवशात् क्रियमाणानां कर्मणां दोषप्रक्षालनार्थं विहितकर्माणि प्रायश्चित्तानीति कथ्यन्ते । 'प्रायः पापं विजानीयात् चित्तं तस्यैव शोधनम् ।' इति । यथा—चान्द्रायणादीनि ।

(७) अध्यारोपः—असर्पभूतायां रज्जौ सर्पवद् अवस्तुनि वस्त्वारोपः अध्यारोपः । इति अध्यारोपविषये महर्षिणा सदानन्दस्वामिनोक्तम् । तत्राऽयमर्थः—

यथा—मार्गे पतितं रज्जुपदार्थं दृष्ट्वा कश्चिद् बुद्धिभ्रमवशात् तं सर्पं मन्यमानः पलायितुमुपक्रमते । पश्चाच्च निवृत्ते असत्यज्ञाने तमेव रज्जु ज्ञात्वा आत्मन्युपहसतीव । यथा वा शुक्तिं दूरतः प्रकाशे कान्तिमानां दृष्ट्वा रजतमिति विचारयन् गृह्णाति, अज्ञाननिवृत्ते च जहाति । तथैव असत्यभूतम् अज्ञानविजृम्भितं चराचरात्मकं स्थूल सूक्ष्मकारणात्मकं च जगदेतत् सत्यमिव मत्वा अहंत्वेन ममत्वेन व जीवः आत्मानं बध्नातीव । उदिते च ज्ञाने तन्निवृत्ते सति स्वात्मा 'अहं ब्रह्मास्मी'ति मत्वा निवर्तते ।

अयमेव अज्ञानवशात् नित्यशुद्धबुद्धे ब्रह्मतत्त्वे जगतः आरोप अध्यारोप इति कथ्यते ।

(८) अपवादः—अपवादो नाम रज्जुविवर्तस्य सर्पस्य रज्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मात्रत्ववद्वस्तुविवर्तस्यावस्तुनोऽज्ञानादेः प्रपञ्चस्य वस्तु (ब्रह्म) मात्रत्वम् इति । अस्यायमर्थः—

अपवादो हि अध्यारोपनिवृत्तिः । यथा असर्पभूतायां रज्जौ सर्पभ्रान्तौ जाते, द्रष्टा भयात् पलायते लङ्घयते वा । निवृत्ते च भ्रान्तौ यथार्थं जानाति । यथा वा शुक्तौ रजतभ्रमाद् ग्रहणबुद्धिः, भ्रान्तिनिवृत्ते च उपेक्षाभावो जायते । अयं भ्रान्तिनिवृत्ते यथार्थज्ञानमेव अपवाद इति कथ्यते ।

(९) परिणामः—अयमेव विकार इत्यप्युच्यते ।

'सतत्त्वतोऽन्यथा प्रथा विकार इत्युदीरितः ।'

इति वस्तुनः स्वरूपत्यागपूर्वकं रूपान्तरापत्तिः परिणाम इत्युच्यते । यथा दुग्धस्य दधिरूपेण परिणतिः, बीजस्य वृक्षरूपेण वा ।

(१०) विवर्तः—वस्तुनो यथार्थस्वरूपापरित्यागेन वस्त्वन्तरस्य मिथ्याप्रतीतिर्विवर्त इत्युच्यते । यथा रज्जौ अयथार्थतया वस्त्वन्तरप्रतीतिपूर्वकं सर्पप्रतीतिः । यदुक्तम् —

'अतत्त्वतोऽन्यथा प्रथा विवर्त इत्युदाहृतः ।'

अय चराचरात्मकं सांसारिकप्रपञ्चः ब्रह्मणो विवर्त एव । ब्रह्मणि जगतो अयथार्थप्रतीतिरित्यर्थः ।

(११) तुरीयं चैतन्यम्—यथा वनवृक्षतदवच्छिन्नाकाशयोर्जलाशयजलतत्प्रतिबिम्बिताकाशयोर्वा आधार एको महाकाशो भवति, तथैव समष्टिगताज्ञानोपहितं चैतन्यं य ईश्वरो व्यष्टिगताज्ञानोपहितं च प्राज्ञः अनयोराधारभूतम् उपाधिरहितं यद् विशुद्धं चैतन्यं तदेव तुरीयचैतन्यमित्यभिधीयते । यथाह श्रुतिः—

'शिवमद्वैतं चतुर्थं मन्यते ।'

तथा च स्मृतौ—

'त्रिषु धामसु यद्भोग्यं भोक्ता भोग्यश्च यद् भवेत् ।
तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिवः ॥'

एतदेव विशुद्धचैतन्यं पूर्वोक्ताज्ञानादितदुपहितचैतन्येश्वरप्राज्ञ-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चैतन्यद्वयेन सहाभेदविवक्षायां 'तत्त्वमसी'ति महावाक्यस्य वाच्यार्थत्वं भेदविवक्षायां च लक्ष्यार्थत्वं भजते।

(१२) **ईश्वरचैतन्यम्**—अस्मिन् समष्टिभूताज्ञाने रजस्तमोऽभिभूतसत्त्वगुणस्य प्राधान्यम् । एवंभूतसत्त्वप्रधानाज्ञानसमष्ट्युपहितचैतन्यं सर्वचराचरप्रपञ्चस्य साक्षितया-सर्वज्ञातृत्वेन **सर्वज्ञः** तथा सर्वेषां जीवानां कर्मानुरूपफलदातृत्वेन **सर्वेश्वरः**, सर्वेषां प्राणिनामन्तःस्थित्वा तद्बुद्धिनियामकत्वेन **सर्वान्तर्यामी**, एवंसम्पूर्णचराचरात्मकप्रपञ्चोत्पादकविवर्ताधिष्ठानत्वेनेश्वरश्चोच्यते । तच्च समष्टिभूताज्ञानस्यावभासकम् । सामान्यरूपेण स सर्वं जानाति विशेषरूपेणापि च न किञ्चित्तदविज्ञातं वर्तते, 'यः सर्वज्ञः सर्ववित्' एषा श्रुतिरिदम्परा। 'तस्मै सर्वं ततः सर्वं स सर्वं सर्वतश्च सः' इत्यादियोगवाशिष्ठवाक्यमप्येतत्परकमेव ।

ईश्वरस्येयं समष्टिः (समुदायोपाधिः) सर्वस्य कारणमिति कारणशरीरम्, आनन्दप्राचुर्यादानन्दमयः आत्मनः कोशवदाच्छादकत्वाच्च कोश इति चोच्यते । अत्रैव हि जाग्रदवस्थाविशिष्टपञ्चीकृतभूतकार्यस्वरूपस्थूलप्रपञ्चस्य, स्वप्नावस्थाविशिष्टापञ्चीकृतभूतकार्यस्वरूपसूक्ष्मस्वाप्नप्रपञ्चस्य च लय इत्येषा सुषुप्तिः, स्थूलसूक्ष्मप्रपञ्चलयस्थानमिति चोच्यते । कारणावस्थायां प्रकृतिपुरुषावतिरिच्य स्थूलसूक्ष्मकार्यप्रपञ्चं न किमपि तिष्ठतीति तत्रानन्दप्राचुर्यम् । यथा च त्वक् शरीरमाच्छादयति तथैवाज्ञानमप्यात्मानमावृणोतीति कोशः, तथा सम्पूर्णस्थूलसूक्ष्मोपाधयोऽस्मिन्नेव कारणोपाधौ विलीयन्तेऽतः सुषुप्तिरित्युच्यते ।

प्राज्ञचैतन्यम्—भिन्नजातीयतरुषु सामूहिकरूपेण यथा वनमिति व्यवहृतिः, पार्थक्येन च प्रत्येकवृक्षजिज्ञपयिषया यथा तत्राम्रः, खदिरः, पलाश इत्यादिव्यवहृतिः, यथा वा सर्वेषां जलानामेकत्वबुबोधयिषया जलाशय इति व्यपदिष्टिः पार्थक्येन च प्रत्येकजलजिज्ञपयिषया नदीः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तडागादिव्यपदिष्टिः। एवमखिलप्रपञ्चकारणभूताज्ञाने समष्टिरूपेणाज्ञानमिति व्यवहारः किन्तु जीवगताहंकारादिकारणभूताज्ञाने व्यष्टिरूपेण भिन्नत्वविवक्षया बहुत्वव्यवहारः। एतदेव 'इन्द्रो मायाभिः पुरूरूप ईयते' (इन्द्रः परमेश्वरः, मायाभिः अज्ञानैः, पुरूरूपः बहुरूपः, ईयते प्रकाशते), इति श्रुत्यापि स्पष्टीकृतम्। इदञ्चज्ञानस्य व्यष्टिरूपं निकृष्टस्य (जीवस्य) चोपाधिः। इत्थञ्चाज्ञानस्य (अविद्यायाः), एकत्वेऽपि सामूहिकरूपेण दृश्यमानाखिलप्रपञ्चस्य हेतुतया पार्थक्येनाहङ्कारादीनामपि कारणत्वेन च तस्मिन्मृत्पिण्डवन्मृद्घटादिवद् वा स्वर्णपिण्डवत्तन्निर्मितकटककुण्डलवद् वाऽभेदभेदविवक्षया समष्टिव्यष्टिताव्यवहारो न विरुध्यते।

जीवगताहङ्कारादिकारणभूतस्याज्ञानस्यास्य व्यष्टौ रजस्तमोऽभिभूतस्य मलिनसत्त्वस्य प्राधान्यम्। तदुपहितचैतन्यमप्यल्पज्ञतयाऽनीश्वरतयैकाज्ञानस्यैकांशावभासकत्वेन च (भिन्नभिन्नजीवगताज्ञानावभासकत्वेन) प्रकृष्टेन अज्ञः प्राज्ञः उच्यते। किन्तु यथेश्वरचैतन्यगताज्ञाने कारणशरीरम्, आनन्दमयकोशः, सुषुप्तिरित्यादिव्यवहृतस्तथैव प्राज्ञचैतन्यगताज्ञानेऽपीति बोध्यम्। यतो हि यथा प्रलयकाले ईश्वरचैतन्यगताज्ञानं सम्पूर्णप्रपञ्चस्य हिरण्यगर्भादिरुत्पादकत्वेन कारणशरीरम्, उच्यते तदानीं प्रकृतिपुरुषावतिरिच्यान्यस्य स्थूलसूक्ष्मप्रपञ्चस्याभावादानन्दमयत्वम्, तथा स्थूलसूक्ष्माखिलोपाधीनां विलयनाधारत्वात्सर्वप्रपञ्चलयस्थानं सुषुप्तिरिति चोच्यते तथैव प्राज्ञचैतन्यगताज्ञानमपि सुषुप्तिकालेऽज्ञानादिशरीरोत्पादकमिति करणशरीरम्, सुषुप्तिकाले चेन्द्रियाणां तद्विषयाणां च राहित्येन कस्याश्चिदप्यासक्तेरभावादानन्दप्राचुर्येणानन्दमयम्, प्राज्ञचैतन्याच्छादकत्वेन च कोशः एवं स्थूलसूक्ष्मशरीरविलयनाधारत्वात् स्थूलसूक्ष्मशरीरलयस्थानमिति सुषुप्तिश्चोच्यते।

[पञ्चीकृतस्थूलशरीरं (व्यावहारिकसत्ता) अपञ्चीकृतसूक्ष्म-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शरीरे (प्रातिभासिकसत्तायाम्) विलीयते । तदनन्तरं तस्यापि च (प्रातिभासिकप्रपञ्चस्य) स्वकारणभूताज्ञाने विलीनत्वात्सर्वोपरिलः । यथा चोक्तं वाक्यसुधायाम्—

'लये फेनस्य तद्धर्मा द्रवाद्याः स्युस्तरङ्गके' इत्यादि ।

फेनो हि यदा जले विलीयते तदा तदीयांशिकद्रवत्वादितरङ्गेष्ववशिनष्टि । तस्मिन्नपि च द्रवत्वादौ जले सर्वथाविलीने पूर्ववच्छुद्धजलमेवावतिष्ठते । एवमेव पूर्वव्यावहारिकसत्ता प्रातिभासिकसत्तायां विलयं याति ततस्तस्यामपि च विलीनायां शुद्धचैतन्यमात्रमवतिष्ठते इति भावः ।

(१४) आवरणशक्तिः—स्वशक्त्या प्रमातुर्दृष्टिमवष्टभ्य सच्चिदानन्दस्वरूपपिधायिका शक्तिरावरणशक्तिः । यथा स्वल्पोऽपि पयोदखण्डः सूक्ष्मक्षमागत्यानेकयोजनमायतमप्यादित्यमण्डलमवलोकयितृनेत्रपथतोऽवरुणद्धि तथैवाज्ञानस्य परिच्छिन्नत्वेऽपि स्वावरणशक्त्या तत्प्रमातृबुद्धिमावृत्यापरिच्छिन्नमसंसारिणमात्मानं तद्दृष्टेरवरुणद्धि । वस्तुगत्या स आत्मा नित्योपलब्धिस्वरूप इति न केनापि कदापि कथमपि पिधातुं शक्यो नापि च सांसारिकबन्धनैर्बद्धुं शक्यः । केवलं मूर्खबुद्ध्यैव स तथा प्रतीयते । हस्तामलके—'घनच्छन्नदृष्टिर्घनच्छन्नमर्कम् …' इत्यादिना अयमेव भावः स्पष्टीकृतः ।

अज्ञानस्यानयैवावरणशक्त्या युक्त आत्मा सांसारिकविषयेषु कर्तृत्वभोक्तृत्व सुखित्वदुःखित्वादिकञ्च भजते किन्त्वेतत्सर्वं रज्वावहिविभावनमिव मिथ्या । वस्तुगत्या नामरूपात्मकमखिलं जगद् ब्रह्मैव संसारबुद्धिश्च तदज्ञाननिबन्धनैवेति बोध्यम् ।

(१५) विक्षेपशक्तिः—ब्रह्मणः प्रभृति स्थावरपर्यन्तस्याखिलनामरूपात्मकजगतः समुत्पादिका शक्तिर्विक्षेपशक्तिः । यथा रज्जुविषयकमज्ञानं स्वशक्त्याऽज्ञानावृतरज्जावहिं विभावयति तथैवात्मविषयकज्ञानमात्मशक्त्याऽज्ञानावृतात्मनि विक्षेपशक्त्या सूक्ष्मशरीरा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नारभ्य ब्रह्माण्डपर्यन्तमाकाशादिप्रपञ्चमुद्भावयति। दृग्दृश्यविवेके-ऽज्ञानशक्तिद्वय्येषा—'शक्तिद्वयं हि मायाया विक्षपावृतिकारणम्'—इत्यादिना निर्दिष्टा।

(१६) **पञ्चवायवः**—प्राणापान - व्यानोदान - समानानि पञ्चवायवः, पञ्चप्राणा इति वा कथ्यन्ते। एता रजोगुणोपेतैः पञ्चमहाभूतैर्मिलितैरुत्पद्यन्ते। तत्र—प्राग्गमनवान् वायुः प्राणो नासादिस्थानवर्ती, अर्वाग्गमनवानपानः पाय्वादिस्थानवर्ती, विष्वग्गमनवान् व्यानः अखिलशरीरवर्ती, ऊर्ध्वगमनवान् उत्क्रमणवायुरुदानः कण्ठस्थानवर्ती, अशितपीतान्नादिसमीकरणकरः समानः नाभिस्थानवर्ती इति।

केचिदन्ये नागकूर्मादीन् पञ्चवायवः कथयन्ति तेषान्तु नागादीनां प्राणादिष्वेव अन्तर्भाव इति इतरे मन्यन्ते। तत्र नागादयो यथा—

'उद्गारे नाग आख्यातः कूर्म उन्मीलने स्मृतः।
कृकलः क्षुत्करो ज्ञेयो देवदत्तो विजृम्भणे।
न जहाति मृतं वाऽपि सर्वव्यापी धनञ्जयः॥' इति

(१७) **वैश्वानरचैतन्यम्**—जरायुजाण्डज - स्वेदजोद्भिज्जेति स्थूलदेहचतुष्टयात्मकम् एतत् स्थूलप्रपञ्चम्। अस्य स्थूलप्रपञ्चस्यैकत्वेन या समष्टिः तदुपहितं चैतन्यम् वैश्वानरचैतन्यमित्यभिधीयते। विश्वे=सर्वे, नराः अस्येति व्युत्पत्तेः। अयमेव विविधं=नानाप्रकारं सद् राजते=शोभते इत्यर्थे विराड् इति चाभिधीयते।

स्थूलप्रपञ्चस्यैषा समष्टिः सूक्ष्मप्रपञ्चापेक्षया स्थूलत्वात् स्थूलशरीरम्, मातृपितृभुक्तान्नपरिणामत्वाद् आत्मनः कोशवदाच्छादकत्वाद् अन्नमयकोशः, सुखदुःखादिभोगाधारत्वात् तत्तदिन्द्रियैः तत्तद्विषयोपलब्धेश्च जाग्रदिति चोच्यते।

(१८) **विश्वचैतन्यम्**—चराचरात्मकं [illegible]

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

व्यष्टिरूपेण विवक्षया यन्निर्देशः तदुपहितं चैतन्यमित्युच्यते तदेव विविधं सद् राजते इति विराडिति चोच्यते ।

स्थूलप्रपञ्चस्यैषा व्यष्टिः स्थूलरूपत्वात् स्थूलशरीरम्, अन्नमयकोशः जाग्रदिति चोच्यते ।

(१६) **कारणशरीरम्**—स्थूलसूक्ष्मकारणात्मकानां मध्येऽन्यतमं कारणशरीरम् अज्ञानात्मकं, समुदायोपाधिभूतं (समष्टिरूपं) ईश्वरचैतन्याधारम् इति । अयं सर्वस्य कारणमिति हेतोः कारणशरीरमित्युच्यते । यथा वृक्षाणां समष्टयभिप्रायेण विवक्षया वनमिति व्यपदेशः क्रियते, न हि तत्र वनवृक्षयोः तात्त्विको भेदः तथैव ईश्वरस्य अज्ञानात्मकं समष्टिर्व्यष्टिभूतादज्ञानान्न भिद्यते ।

★

Kirtikant Sharma Collection, Najafgarh